॥ अथ वृहज्ज्योतिषार्णवेधर्मस्कन्धे हनुमदुपासनाऽध्यायः॥

श्रीः ॥

अथ बृहज्ज्योतिषार्णव ग्रंथस्थ धर्मस्कंधांतर्गत–हनुमदुपासना नाम तृतीयस्तबकस्य विषयानुक्रमणिका.

विषय.	पृष्ठांक.
इष्ट देवता स्तवनम्, उपोद्घात प्रकरणम्.	१
ग्रंथ कर्तृ नाम निर्देशः	,,
श्रीहनुमत्कवचम् समंत्रम्.	,,
पंचमुखी हनुमत्कवचम् समंत्रम्.	५
एकादशमुख हनुमत्कवचम् समंत्रम्.	७
हनुमत्सहस्रनाम स्तोत्रम्.	८
सुदर्शनसंहितोक्तं हनुमत्स्तोत्रम्	१३
विचित्र वीर हनुमन्मालामंत्रः.	१४
हनुमद्दीपदानविधिः.	१५
हनुमत्पताकाव्रतम्.	१७
हनुमत्कल्पः.	१९
सुदर्शनसंहितोक्त हनुमद्गह्वरम्.	२०
नाना भेद सहितं हनुमत्पटलम्.	२८
पंचमुखि ध्यानम्.	३६
हनुमत्पूजा पद्धतिः	,,
अथर्वण रहस्यान्तर्गत सप्तमुखी हनुमत्कवचम्.	४४
रुद्रयामलोक्तं हनुमत्सहस्रनाम स्तोत्रम्.	४६

विषय.	पृष्ठांक.
हनुमत्स्तवराजः	५१
हनुमतःशत्रुञ्जयस्तोत्रम्.	५५
द्वितीयं हनुमत्स्तोत्रम्.	५६
हनुमदुपनिषद्.	५७
नानावर्णावृत्त्यायुक्तं तृतीयं हनुमत्स्तोत्रम्.	,,
सुदर्शन संहितोक्तं आंजनेयास्त्रम्.	५८
हनुमद्घोरास्त्रम्.	५९
हनुमल्लक्षप्रदक्षिणाविधानम्.	६०
लक्ष प्रदक्षिणा प्रयोगः.	६१
हनुमद्व्रत पूजापद्धतिः.	,,
हनुमद्व्रतोद्यापनविधिः.	६५
हनुमद्व्रतकथा.	६६
हनुमद्व्रतोद्यापनकल्पः	६८
हनुमत्सहस्र नामावलिः	६९
हनुमज्जन्म माहात्म्यकथा.	७६
ग्रंथसमाप्ति श्लोकाः	७७

इत्यनुक्रमणिका समाप्ता ॥

पुस्तक मिलनेका ठिकाना– खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" मुद्रणालयाध्यक्ष मुंबई.

॥ श्रीगणेशायनमः ॥ वृषवाहनविघ्नेशौहंसवाहंसरस्वतीम् ॥ स्वेष्टंश्रीबटुकंनत्वापितरंव्यंकटंततः ॥ १ ॥
श्रीगौतमकुलोत्पन्नोज्योतिर्विद्व्यंकटात्मजः ॥ हरिकृष्णःकरोत्यत्रवायुसूनोर्महात्मनः ॥ २ ॥ उपासना
संग्रहमितिशेषः ॥ एतदुपासनायांवैसाधारणमपेक्षितम् ॥ तत्सर्वंपूर्वमेवोक्तंविज्ञेयमिहचादरात् ॥ ३ ॥ पूर्वो
क्तानांपदार्थानामत्रवक्ष्याम्यनुक्रमम् ॥ लक्षणंगुरुशिष्याणांदीक्षाग्रहणनिर्णयः ॥ ४ ॥ पारायणविधानंचाभि
षेकस्यविधानकम् ॥ बीजानांलक्षणंचैवपुरश्चर्याविधिस्तथा ॥ ५ ॥ स्थानस्यनिर्णयश्चैवासनस्यचाविनिर्णयः ॥
मुद्राणांलक्षणाध्यायोमालानिर्णयएवच ॥ ६ ॥ जपस्यलक्षणंचैवह्यजपाजपलक्षणम् ॥ तांत्रिकंस्नानसं
ध्यादिनित्यकर्मनिरूपणम् ॥ ७ ॥ भूशुद्धिद्वारपूजादिदेहरक्षानिरूपणम् ॥ भूतशुद्धिश्चप्राणानांप्रतिष्ठा
विधिरेवच ॥ ८ ॥ न्यासानांनिर्णयश्चैवमातृकान्यासनिर्णयः ॥ अनेकविधन्यासानांसप्रमाणंनिरूपणम् ॥ ९ ॥
अर्चनंद्विविधंचैववामदक्षिणभेदतः ॥ वामेनवादक्षिणेनपूजनंतुयथारुचि ॥ १० ॥ पात्राणांलक्षणंचैवपात्रस्थाप
ननिर्णयः ॥ शुद्धिःपंचमकाराणांयावामेपरिकीर्तिता ॥ ११ ॥ पात्राणांग्रहणंचैवतिरस्करणिपूजनम् ॥ अंतर्या
गविधानंचवैश्वदेवनिरूपणम् ॥ १२ ॥ बहिर्यागविधानंचदेवतापीठनिर्णयः ॥ सर्वयंत्रप्रतिष्ठाचसापिभेदद्वया
त्मिका ॥ १३ ॥ इष्टदेवस्थापनार्थंप्रथमंयंत्रपूजनम् ॥ वश्याद्यनेककार्येषुयानियंत्राणिसंतिहि ॥ १४ ॥ तेषांचैवप्रति
ष्ठाचयंत्रंसिद्धिकरंयतः ॥ अनेकविधपूजायाभेदलक्षणवर्णनम् ॥ १५ ॥ शंखघंटापूजनंचतन्माहात्म्यनिरूपणम् ॥

१ टिप्पणी–येषु शब्देषु उपरि अंकाः संति ते अध्यायसूचकाः संतीति बोध्यम् ॥

उपासनाप्रभेदेनभस्मरुद्राक्षधारणम्॥१६॥गोपीचंदनमाहात्म्यंतुलसीकाष्ठधारणम् ॥ निर्णयश्चैवसंप्रोक्तोह्या
वाहनविसर्जने॥१७॥आसनस्यचध्यानस्यतथार्घ्यपाद्यनिर्णयः॥विधिराचमनीयस्यमधुपर्कस्यानिर्णयः ॥१८॥
विधिःस्नानाभिषेकस्यजलाहरणनिर्णयः ॥ वस्त्रस्यचोपवीतस्यतथालंकरणस्यच ॥ १९ ॥ गंधाक्षतानांपुष्पा
णांपत्राणांचविनिर्णयः ॥ धूपदीपविधानंचनैवेद्यस्यविनिर्णयः ॥ २० ॥ फलतांबूलयोश्चैवदक्षिणायाश्चनिर्णयः॥
आरार्तिकमंत्रपुष्पप्रदक्षिणविनिर्णयः ॥ २१ ॥ प्रणामस्यप्रार्थनायास्तीर्थस्यचविनिर्णयः ॥ अंगपूजाऽऽवर्णपू
जाबलिदानादिनिर्णयः ॥ २२ ॥ कुमारिकादिपूजायाःशक्तिपूजननिर्णयः ॥ स्तोत्रादिपठनंचैवतीर्थग्रहणनि
र्णयः ॥ २३ ॥ होमस्यचविधानंवैकुंडमंडपलक्षणम् ॥ तर्पणस्यमार्जनस्यद्विजसंतर्पणस्यच ॥२४॥ विधानंच
पृथक्प्रोक्तंनिर्णयश्चपृथक्पृथक् ॥ मंत्रस्यशीघ्रसिद्ध्यर्थंविधिरुक्तोमयानृणाम् ॥२५॥ सर्वसिद्धिकरःसाक्षान्मं
त्रसंस्कारपूर्वकः ॥ मूलिकाग्रहणेमंत्रादिशांनियमएवच ॥ २६ ॥ ऋतुमासर्क्षवाराणांतिथीनांनियमस्तथा ॥
अंगुलीनिर्णयश्चैववंदाग्रहणनिर्णयः ॥ २७ ॥ सिद्धार्यादिचक्रेमार्गशोधनंसाधकेष्टयोः ॥ शापोद्धारोत्कीलनेच
सूतकादिविनिर्णयः ॥ २८ ॥ नपुंसकादिभेदाश्चमंत्राणांयेप्रकीर्तिताः ॥ पुरश्चरणतःपूर्वंकृत्यंयच्चांतिमेतथा ॥
॥ २९ ॥ तत्सर्वमपिग्रंथेस्मिन्पूर्वमेवप्रकीर्तितम् ॥ आवर्णदेवतानांचयजनार्थविशेषतः ॥३०॥ उद्धारश्चैवयंत्रा
णांमंत्रोद्धारस्तथैवच ॥ सर्वेषांचैवदेवानांगायत्रीमंत्रसंग्रहः ॥३१॥ चक्रपूजाविधिश्चैवकाम्यपूजाविधिस्तथा॥
नैमित्तिकार्चनविधिर्विशेषेणनिरूपितः ॥ ३२ ॥ गर्भाधानादिसंस्कारास्तांत्रिकाश्चनिरूपिताः ॥ दीक्षितस्यो

पासकस्यह्यंत्येष्टिकैर्मनिर्णयः ॥३३॥ कौलमार्गप्रकाशश्चकौलखंडनमेवच ॥ पूजांपराधाःसंप्रोक्ताःस्वस्तिका
दिनिरूपणम् ॥३४॥ देवालयस्यमर्यादासेवनंचनिरूपितम्॥निर्णयश्चाधिकारस्यशब्दसृष्टिनिरूपणम् ॥ ३५॥
पडाम्नायस्यचोत्पत्तिःपवित्रंदमनार्चनम्॥मूर्त्तीनांलक्षणंचैवतपोमार्गनिदर्शनम् ॥३६॥ जातिस्मरस्यचोपायाः
प्रशंसाचनिरूपिता॥दुष्कर्मप्रायश्चित्तानिनित्यशिक्षानिरूपणम्॥३७॥शरीरस्यस्वरूपंचकामनाभेदनिर्णयः॥
पृथक्पृथक्कथाध्यायैःसर्वेषांनिर्णयःस्फुटः ॥ ३८ ॥ परिभापाभिधेध्यायेकेषांचिन्निर्णयस्तथा ॥ कृतस्तदनु
रोधेनप्रयोगःसिद्धिदोनृणाम् ॥ ३९ ॥ अदृष्टेवविधानंतुकृतश्चेन्नैवसेत्स्यति ॥ एपांसर्वोपासनेपुह्युपयोगोभवे
त्किल ॥ ४० ॥ तेपांसर्वपदार्थानांपूर्वमेवनिरूपणम् ॥ कृतंतस्माद्विशेपेणदृष्ट्वोपासनमारभेत् ॥ ४१ ॥ सर्वेशा
क्ताद्विजाःप्रोक्तानशैवानचवैष्णवाः ॥ आदिदेवीमुपासंतेगायत्रींवेदमातरम् ॥ ४२ ॥ तस्मादादौप्रयत्नेनगाय
त्रींप्रयुतंजपेत् ॥ पटलंपद्धतीवर्मतथानामसहस्रकम् ॥४३॥ स्तोत्राणिचेतिपंचांगंदेवतोपासनेस्मृतम्॥कवचंदे
वतागात्रंपटलंदेवताशिरः ॥ ४४॥ पद्धतिर्देवहस्तौतुमुखंसाहस्रकंस्मृतम् ॥ स्तोत्राणिदेवतापादौपंचांगपंचभिः
स्मृतम्॥४५॥ जपोहोमस्तर्पणंचमार्जनंविप्रभोजनम्॥आराधनंपंचविधंदेवतानांप्रकीर्तितम् ॥४६॥ पंचांगैस्स
हितंत्वेतद्दशांगंकथ्यतेबुधैः॥हृदयंदीपदानंचस्तवराजादिकंतथा ॥४७॥ मालामंत्रस्तथाकल्पःसर्वमेतद्ब्रवीम्य
हम्॥उपासनाशरांगेषुयाप्रोक्तापद्धतिःपुरा ॥४८॥ इष्टदेवार्चनार्थंवैद्वितीयांगंचतत्स्मृतम्॥तस्योपयोगिकंह्येत
त्सर्वपूर्वमयोदितम्॥४९॥सविस्तरंचतद्दृष्ट्वाकार्यापद्धतिरुत्तमा॥सनिर्णयांचसर्वत्रलिखामियदिपद्धतिम् ॥५०॥

तदाग्रंथोमहानेवभवेत्तस्माच्चपूर्वतः ॥ लिखित्वानिर्णयंपश्चात्कवचादिकमत्रवै ॥ ५१ ॥ प्रवक्ष्यामिविशेषे
णग्रंथानालोक्ययत्नतः ॥ तस्माद्यत्नपरोभूयात्स्वस्यसिद्ध्यैनसंशयः ॥ ५२ ॥ इतिश्रीज्योतिर्वित्कुलावतं
सव्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिपार्णवेधर्मस्कंधेउपासनास्तबकेश्रीहनुमदुपासनाध्यायेउ
पोद्घातप्रकरणंप्रथमम् ॥ १ ॥ ॥ अथश्रीहनुमत्कवचम् ॥ ॥ उक्तंचानंदरामायणे ॥ ॥ रामदासउवाच ॥
॥ एकदासुखमासीनंशंकरंलोकशंकरम्॥पप्रच्छगिरिजाकांतंकर्पूरधवलंशिवम् ॥१॥ पार्वत्युवाच ॥ भगवन्देव
देवेशलोकनाथजगत्प्रभो॥शोकाकुलानांलोकानांकेनरक्षाभवेद्ध्रुवम् ॥ २ ॥ संग्रामेसंकटेघोरेभूतप्रेतादिकेभये॥
दुःखदावाग्निसंतप्तचेतसांदुःखभागिनाम् ॥३॥ श्रीमहादेवउवाच ॥ शृणुदेविप्रवक्ष्यामिलोकानांहितकाम्यया॥
विभीपणायरामेणप्रेम्णादत्तंचयत्पुरा ॥ ४ ॥ कवचंकपिनाथस्यवायुपुत्रस्यधीमतः ॥ गुह्यंतत्तेप्रवक्ष्यामिवि
शेषाच्छृणुसुंदरि ॥ ५ ॥ उद्यदादित्यसंकाशमुदारभुजविक्रमम् ॥ कंदर्पकोटिलावण्यंसर्वविद्याविशा
रदम् ॥ ६ ॥ श्रीरामहृदयानंदंभक्तकल्पमहीरुहम् ॥ अभयंवरदंदोर्भ्यांकलयेमारुतात्मजम् ॥ ७ ॥
हनुमानंजनीसूनुर्वायुपुत्रोमहाबलः ॥ रामेष्टःफाल्गुनसखापिंगाक्षोऽमितविक्रमः ॥ ८ ॥ उदधिक्रमणश्चैव
सीताशोकविनाशनः ॥ लक्ष्मणप्राणदाताचदशग्रीवस्यदर्पहा ॥ ९ ॥ एवंद्वादशनामानिकपींद्रस्यमहात्मनः ॥
स्वापकालेप्रबोधेचयात्राकालेचयःपठेत् ॥ १० ॥ तस्यसर्वभयंनास्तिरणेचविजयीभवेत् ॥ राजद्वारेगह्वरे
चभयंनास्तिकदाचन ॥११॥उल्लंघ्यसिंधोःसलिलंसलीलंयःशोकवह्निंजनकात्मजायाः ॥ आदायतेनैवददाहलं

कांनमामितंप्रांजलिरांजनेयम् ॥ १२ ॥ ॐनमोहनुमतेसर्वग्रहान् भूतभविष्यद्वर्तमानान् समीपस्थान् सर्व
कालदुष्टबुद्धीनुच्चाटयोच्चाटयपरबलान्क्षोभयक्षोभय ममसर्वकार्याणिसाधय साधय ॐह्रांह्रींह्रूंफट् ॥ घेघेघे
ॐशिवसिद्धं ॐह्रांॐह्रींॐह्रूंॐह्रैंॐह्रौंॐह्रः स्वाहा॥ परकृतयंत्रमंत्रपराहंकारभूतप्रेतपिशाचदृष्टिसर्वविघ्नदुर्ज
नचेष्टाकुविद्यासर्वोग्रभयानिनिवारयनिवारय बंधबंधलुंठलुंठविलुंचविलुंचकिलिकिलिकिलि सर्वकुयंत्राणि
दुष्टवाचम् ॐ हुंफट्स्वाहा ॥ ॐ अस्यश्रीहनुमत्कवचस्तोत्रमंत्रस्य ॥ श्रीरामचंद्रऋषिः॥श्रीहनुमान्परमात्मा
देवता ॥ अनुष्टुप्छंदः ॥ मारुतात्मजइतिबीजम् ॥ अंजनीसूनुरितिशक्तिः ॥ लक्ष्मणप्राणदातेतिकीलक
म् ॥ रामदूतायेतिअस्त्रम् ॥ हनुमान्देवताइतिकवचम् ॥ पिंगाक्षोऽमितविक्रमइतिमंत्रः ॥ श्रीरामचंद्रप्रेरणया
रामचंद्रप्रीत्यर्थंममसकलकामनासिद्ध्यर्थंजपेविनियोगः ॥ अथांगुलिन्यासः ॐ ह्रांअंजनीसुतायअंगुष्ठाभ्यां
नमः ॥ ॐह्रीं रुद्रमूर्तयेतर्जनीभ्यांनमः ॥ ॐह्रूंरामदूतायमध्यमाभ्यांनमः ॥ॐह्रैं वायुपुत्रायअनामिकाभ्यांन
मः ॥ ॐह्रौंअग्निगर्भायकनिष्ठिकाभ्यांनमः ॥ ॐह्रः ब्रह्मास्त्रनिवारणायकरतलकरपृष्ठाभ्यांनमः ॥ एवंहृदया
द्यंगन्यासंकृत्वा ॥ अथध्यानम् ॥ ध्यायेद्बालदिवाकरद्युतिनिभंदेवारिदर्पापहं देवेंद्रप्रमुखं प्रशस्तयशसं
देदीप्यमानंरुचा ॥ सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं संरक्तारुणलोचनं पवनजं पीतांबराल
कृतम् ॥ १३ ॥ उद्यन्मार्तंडकोटिप्रकटरुचियुतं चारुवीरासनस्थं मौंजीयज्ञोपवीताभरणरुचिशिखं शोभितं
कुंडलांकम् ॥ भक्तानामिष्टदंतंप्रणतमुनिजनंवेदनादप्रमोदं ध्यायेदेवंविधेयं प्लवगकुलपतिं गोष्पदीभूतवा

धिम् ॥१४॥ वज्रांगंपिंगकेशाढ्यंस्वर्णकुंडलमंडितम् ॥ निगूढमुपसंगम्यपारावारपराक्रमम् ॥१५॥स्फटिकाभं
स्वर्णकांतिंद्विभुजंचकृतांजलिम् ॥ कुंडलद्वयसंशोभिमुखांभोजंहरिंभजे ॥ १६ ॥ सव्यहस्तेगदायुक्तंवामहस्ते
कमंडलुम्॥ उद्यद्दक्षिणदोर्दंडंहनुमंतंविचिंतयेत् ॥ १७ ॥ अथमंत्रः ॥ ॐनमोभगवतेहनुमदाख्यरुद्रायसर्वदुष्ट
जनमुखस्तंभनंकुरु२ॐह्रांह्रींह्रूं ठंठंठंफट्स्वाहा॥१॥ॐनमोहनुमतेशोभिताननाययशोलंकृतायअंजनीगर्भसंभू
तायरामलक्ष्मणानंदकायकपिसैन्यप्राकारायपर्वतोत्पाटनायसुग्रीवसाह्यकरणायपरोच्चाटनायकुमारब्रह्मचर्या
यगंभीरशब्दोदयायॐह्रांह्रींह्रूंसर्वदुष्टग्रहनिवारणायस्वाहा ॥२॥ ॐनमोहनुमतेसर्वग्रहान्भूतभविष्यवर्तमान
दूरस्थसमीपस्थान्छिंधि २ भिंधि२सर्वकालदुष्टबुद्धिमुच्चाटयोच्चाटय परबलान्क्षोभयक्षोभयममसर्वकार्याणि
साधय२ॐह्रांह्रींह्रूंफट्देहि ॐशिवंसिद्धिं ॐह्रांह्रींह्रूंस्वाहा ॥३॥ॐनमोहनुमतेपरकृतयंत्रमंत्रपराहंकारभूतप्रेत
पिशाचपरदृष्टिसर्वविघ्नतर्जनचेटकविद्यासर्वग्रहभयंनिवारयनिवारयवधवधपचपचदलदलविलय२सर्वाणिकु
यंत्राणिकुट्टय २ ॐह्रांह्रींह्रूंफट्स्वाहा ॥४॥ ॐनमोहनुमतेपाहिपाहिएहिएहिसर्वग्रहभूतानांशाकिनीडाकिनी
नांविषमदुष्टानांसर्वेषामाकर्षयाकर्षयमर्दयमर्दयछेदयछेदयमृत्यून्मारयमारयशोपयशोपय प्रज्वलप्रज्वल
भूतमंडलपिशाचमंडलनिरसनायभूतज्वरप्रेतज्वरचातुर्थिकज्वरविष्णुज्वरमहेशज्वरंछिंधिछिंधि भिंधिभिं
धिअक्षिशूलपक्षशूलशिरोभ्यंतरशूलगुल्मशूलपित्तशूलब्रह्मराक्षसकुलपिशाचकुलछेदनंकुरुप्रबलनागकुलविषं
निर्विषंकुरु २ झटितिझटिति ॥ ॐ ह्रांह्रींह्रूंफट्सर्वग्रहनिवारणायस्वाहा ॥ ५ ॥ ॐनमोहनुमतेपव

नपुत्रायवैश्वानरमुखायपापदृष्टिचोरदृष्टिहनुमदाज्ञास्फुरॐस्वाहा ॥ ६ ॥ स्वगृहेद्वारेपट्टकेतिष्ठतिष्ठे
तितत्ररोगभयंराजकुलभयंनास्तितस्योच्चारणमात्रेणसर्वेज्वरानश्यंति ॥ ॐह्रांह्रींह्रूंफट्घेघेस्वाहा ॥ ७ ॥
॥ श्रीरामचंद्रउवाच ॥ ॥ हनुमान्पूर्वतःपातुदक्षिणेपवनात्मजः ॥ पातुप्रतीच्यांरक्षोघ्नःपातुसागरपारगः ॥
॥ १८ ॥ उदीच्यामूर्ध्वतःपातुकेसरिप्रियनंदनः ॥ अधस्तुविष्णुभक्तस्तुपातुमध्यंचपावनिः ॥ १९ ॥ अवांतर
दिशःपातुसीताशोकविनाशकः ॥ लंकाविदाहकःपातुसर्वापद्भ्योनिरंतरम् ॥ २० ॥ सुग्रीवसचिवःपातुमस्तकं
वायुनंदनः ॥ भालंपातुमहावीरोभ्रुवोर्मध्येनिरंतरम् ॥ २१ ॥ नेत्रच्छायापहारीचपातुनःप्लवगेश्वरः ॥ कपोले
कर्णमूलेचपातुश्रीरामकिंकरः ॥ २२ ॥ नासाग्रमंजनीसूनुःपातुवक्त्रंहरीश्वरः ॥ वाचंरुद्रप्रियःपातुजिह्वांपिंगल
लोचनः ॥ २३ ॥ पातुदंतान्फाल्गुनेष्टश्चिबुकंदैत्यपादहृत् ॥ पातुकंठंचदैत्यारिःस्कंधौपातुसुरार्चितः ॥ २४ ॥
भुजौपातुमहातेजाःकरौचचरणायुधः ॥ नखान्नखायुधःपातुकुक्षौपातुकपीश्वरः ॥ २५ ॥ वक्षोमुद्रापहारीचपातु
पार्श्वेभुजायुधः ॥ लंकानिभंजनःपातुपृष्ठदेशेनिरंतरम् ॥ २६ ॥ नाभिंचरामदूतस्तुकटिंपात्वनिलात्मजः ॥
गुह्यंपातुमहाप्राज्ञोलिंगंपातुशिवप्रियः ॥ २७ ॥ ऊरूचजानुनीपातुलंकाप्रासादभंजनः ॥ जंघेपातुकपिश्रेष्ठोगु
ल्फौपातुमहाबलः ॥२८॥ अचलोद्धारकःपातुपादौभास्करसन्निभः ॥ अंगान्यमितसत्वाढ्यःपातुपादांगुलीस्त
था ॥ २९ ॥ सर्वांगानिमहाशूरःपातुरोमाणिचात्मवित् ॥ कुमारःकन्यकांपातुपिंगाक्षःपातुवैपशून् ॥ ३० ॥
वायुसूनुःसुतान्पातुमार्गंपातुमहाबली ॥ द्रोणाचलसुरस्थायीराजद्वारेपरिक्षमाम् ॥ ३१ ॥ जानकीशोकभयहृ

त्कुटुंबंकपिवल्लभः ॥ रक्षाहीनंतुयत्स्थानंरक्षतांयमकिंकरः ॥ ३२ ॥ हनुमत्कवचंयस्तुपठेद्विद्वान्विचक्षणः ॥
सएवपुरुषश्रेष्ठोभुक्तिंमुक्तिंचविंदति ॥ ३३ ॥ त्रिकालमेककालंवापठेन्मासत्रयंनरः ॥ सर्वान्रिपून्क्षणाज्जित्वा
सपुमाञ्छ्रियमाप्नुयात् ॥ ३४ ॥ मध्यरात्रेजलेस्थित्वासप्तवारंपठेद्यदि ॥ क्षयापस्मारकुष्ठादितापत्रयनिवार
णम् ॥ ३५ ॥ अश्वत्थमूलेऽर्कवारेस्थित्वापठतियःपुमान् ॥ अचलांश्रियमाप्नोतिसंग्रामेविजयंतथा ॥ ३६ ॥
रामाग्रेहनुमदग्रेयःपठेच्चनरःसदा ॥ लिखित्वापूजयेद्यस्तुसर्वत्रविजयीभवेत् ॥ ३७ ॥ यःकरेधारयेन्नित्यंसर्वा
न्कामानवाप्नुयात् ॥ ३८ ॥ बुद्धिर्बलंयशोवीर्यंनिर्भयत्वमरोगता ॥ सुदार्ढ्यंवाक्स्फुरत्वंचहनुमत्स्मरणाद्भ
वेत् ॥ ३९ ॥ मारणंवैरिणांसद्यःशरणंसर्वसंपदाम् ॥ शोकस्यहरणेदक्षंवंदेतंरणदारुणम् ॥ ४० ॥ लिखित्वापू
जयेद्यस्तुसर्वत्रविजयीभवेत् ॥ यःकरेधारयेन्नित्यंसपुमाञ्छ्रियमाप्नुयात् ॥ ४१ ॥ स्थित्वातुबंधनेयस्तुजपंका
रयतिद्विजैः ॥ तत्क्षणान्मुक्तिमाप्नोतिनिगडात्तुतथैवच ॥ ४२ ॥ ॥ ईश्वरउवाच ॥ ॥ भान्विदुचरणारविंद
युगुलंकौपीनमौंजीधरंकांचीश्रेणिधरंदुकूलवसनंयज्ञोपवीताजिनम् ॥ हस्ताभ्यांधृतपुस्तकंचविलसद्धाराव
लिंकुंडलंयश्चालंविशिखंप्रसन्नवदनंश्रीवायुपुत्रंभजेत् ॥ ४३ ॥ योवारांनिधिमल्पपल्वलमिवोल्लंघ्यप्रतापान्वि
तोवैदेहीघनशोकतापहरणोवैकुंठभक्तिप्रियः ॥ अक्षाद्यूर्जितराक्षसेश्वरमहादर्पापहारीरणेसोयंवानरपुंगवोऽ
वतुसदायोऽस्मान्समीरात्मजः ॥ ४४ ॥ वज्रांगंपिंगनेत्रंकनकमयलसत्कुंडलाक्रांतगंडंदंभोलिस्तंभसारप्रह
रणसुवशीभूतरक्षोधिनाथम् ॥ उद्यल्लांगूलसप्तप्रचलचलधरंभीममूर्तिंकपींद्रंध्यायेत्तंरामचंद्रंभ्रमरद्दढकरंस

त्वसारंप्रसन्नम् ॥ ४५ ॥ वज्रांगंपिंगनेत्रंकनकमयलसत्कुंडलैःशोभनीयंसर्वापीठ्यादिनाथंकरतलविधृतंपू
र्णकुंभंदृढांगम् ॥ भक्तानामिष्टकारंविदधतिचसदासुप्रसन्नंहरीशंत्रैलोक्यंत्रातुकामंसकलभुविगतंरामदूतंन
मामि ॥४६॥ वामेकरेवैरिभिदंवहंतंशैलंपरंशृंखलहारकंठम् ॥ दधानमाच्छाद्यसुवर्णवर्णभजेज्ज्वलत्कुंडलमांज
नेयम् ॥ ४७ ॥ पद्मरागमणिकुंडलत्विषापाटलीकृतकपोलमंडलम् ॥ दिव्यदेहकदलीवनांतरेभावयामिपवमान
नंदनम् ॥४८॥यत्रयत्ररघुनाथकीर्तनंतत्रतत्रकृतमस्तकांजलिम् ॥बाष्पवारिपरिपूर्णलोचनंमारुतिंनमतराक्षसां
तकम् ॥४९॥ मनोजवंमारुततुल्यवेगंजितेंद्रियंबुद्धिमतांवरिष्ठम्॥वातात्मजंवानरयूथमुख्यंश्रीरामदूतंशिरसा
नमामि ॥ ५० ॥ विवादेयुद्धकालेचद्यूतेराजकुलेरणे ॥ दशवारंपठेद्रात्रौमिताहारोजितेंद्रियः ॥ ५१ ॥ विजयंल
भतेलोकेमानवेषुनरेषुच ॥ भूतेप्रेतेमहादुर्गेऽरण्येसागरसंप्लवे ॥ ५२ ॥ सिंहव्याघ्रभयेचोग्रेशरशस्त्रास्त्रपातने ॥
शृंखलाबंधनेचैवकारागृहादियंत्रणे ॥ ५३ ॥ कोपस्तंभेवह्निचक्रेक्षेत्रेघोरेसुदारुणे ॥ शोकेमहारणेचैवब्रह्मग्रह
निवारणे ॥ ५४ ॥ सर्वदातुपठेन्नित्यंजयमाप्नोतिनिश्चितम् ॥ भूर्जेवावसनेरक्तेक्षौमेवातालपत्रके ॥ ५५ ॥ त्रिगं
धिनावामष्यावाविलिख्यधारयेन्नरः॥पंचसप्तत्रिलोहैर्वागोपितःसर्वतःशुभम् ॥५६॥ करेकट्यांबाहुमूलेकंठेशिर
सिधारितम्॥सर्वान्कामानवाप्नोतिसत्यंश्रीरामभाषितम्॥५७॥अपराजितनमस्तेस्तुनमस्तेरामपूजित ॥प्रस्था
नंचकरिष्यामिसिद्धिर्भवतुमेसदा ॥५८॥ इत्युक्त्वायोव्रजेद्ग्रामंदेशंतीर्थांतरंरणम्॥आगमिष्यतिसशीघ्रंक्षेमरू
पोगृहंपुनः ॥५९॥ इतिवदतिविशेषाद्राघवेराक्षसेंद्रःप्रमुदितवरचित्तोरावणस्यानुजोहि॥ रघुवरपदपद्मंवंदयामा

सभूयः कुलसहितकृतार्थः शर्मदं मन्यमानः ॥ ६० ॥ तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं शर्मांवरं सुरमुनींद्रनुतं कपींद्रम् ॥
कृष्णत्वचं कनकपिंगजटाकलापं व्यासं नमामि शिरसा तिलकं मुनीनाम् ॥ ६१ ॥ य इदं प्रातरुत्थाय पठते कवचं सदा ॥
॥ आयुरारोग्य संतानैस्तस्य स्तन्यं स्तवो भवेत् ॥ ६२ ॥ एवं गिरींद्रजे श्रीमद्धनुमत्कवचं शुभम् ॥ त्वया पृष्टं मय
प्रीत्या विस्तराद्धि निवेदितम् ॥ ६३ ॥ रामदासउवाच ॥ एवं शिवमुखाच्छ्रुत्वा पार्वती कवचं शुभम् ॥ हनूमतः सदा
भक्त्या पपाठ तन्मनाः सदा ॥ ६४ ॥ एवं शिष्य त्वयाप्यत्र यथा पृष्टं तथा मया ॥ हनुमत्कवचं चेदं तवाग्रे विनिवेदितम् ॥
॥ ६५ ॥ इदं पूर्वं पठित्वा तु रामस्य कवचं ततः ॥ पठनीयं नरैर्भक्त्या नैकमेव पठेत्कदा ॥ ६६ ॥ हनुमत्कवचं चात्र
श्रीरामकवचं विना ॥ ये पठंति नराश्चात्र पठनं तद्वृथा भवेत् ॥ ६७ ॥ तस्मात्सर्वैः पठनीयं सर्वदा कवचद्वयम् ॥
रामस्य वायुपुत्रस्य सद्भक्तैश्च विशेषतः ॥ ६८ ॥ उल्लंघ्य सिंधोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः ॥
आदाय तेनैव ददाह लंकां नमामि तं प्रांजलिरांजनेयम् ॥ ६९ ॥ ॥ इति श्रीह० बृ० ध० उपासनास्तबके श्रीहनुमदु
पासनाध्याये आनंदरामायणोक्त हनुमत्कवचनिरूपणं नाम प्रकरणं द्वितीयम् ॥ २ ॥ ॥ श्लो० १२१ ॥ ॥ अथ
श्रीपंचमुखीहनुमत्कवचम् ॥ ॥ उक्तं च सुदर्शनसंहितायाम् ॥ ॥ ईश्वरउवाच ॥ ॥ अथ ध्यानम् ॥ ॥ अथ
ध्यानं प्रवक्ष्यामि शृणु सर्वांगसुंदरि ॥ यत्कृतं देवदेवेशि ध्यानं हनुमतः परम् ॥ १ ॥ पंचवक्त्रं महाभीमं त्रिपंचनयनैर्यु
तम् ॥ बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम् ॥ २ ॥ पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम् ॥ दंष्ट्राकरालवद
नं भृकुटीकुटिलेक्षणम् ॥ ३ ॥ अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् ॥ अत्युग्रतेजवपुषं भीषणं भयनाशनम् ॥ ४ ॥

पश्चिमंगारुडंवक्रंवज्रतुंडंमहाबलम् ॥ सर्वनागप्रशमनंविषभूतादिकृंतनम् ॥५॥ उत्तरंशौकरंवक्रंकृष्णंदीप्तंनभो
पमम् ॥ पातालसिद्धिवेतालज्वररोगादिकृंतनम् ॥६॥ उर्ध्वंहयाननंघोरंदानवांतकरंपरम् ॥ खड्गंत्रिशूलखट्वांगं
पाशमंकुशपर्वतम् ॥७॥ मुष्टिद्रुमगदाभिंदिपालज्ञानेनसंयुतम् ॥ एतान्यायुधजालानिधारयंतंयजामहे ॥ ८ ॥
प्रेतासनोपविष्टंतंसर्वाभरणभूषितम् ॥ दिव्यमालांबरधरंदिव्यगंधानुलेपनम् ॥ ९ ॥ सर्वाश्चर्यमयंदेवंहनु
मद्विश्वतोमुखम् ॥ १० ॥ पंचास्यमच्युतमनेकविचित्रवर्णचक्रंसुशंखविधृतंकपिराजवर्यम् ॥ पीतांबरादि
मुकुटैरुपशोभितांगंपिंगाक्षमाद्यमनिशंमनसास्मरामि ॥ ११ ॥ मर्कटेशंमहोत्साहंसर्वशोकविनाशनम् ॥
शत्रुसंहारमांरक्षश्रियंदापयमेहरिम् ॥ १२ ॥ हरिमर्कटमर्कटमंत्रमिदंपरिलिख्यतिलिख्यतिभूमित
ले ॥ यदिनश्यतिनश्यतिशत्रुकुलंयदिमुंचतिमुंचतिवामकरः ॥ १३ ॥ ॐहरिमर्कटमर्कटायस्वाहा ॥ ॐन
मोभगवतेपंचवदनाय ॥ पूर्वकपिमुखेसकलशत्रुसंहारणायस्वाहा ॥ ॐनमोभगवतेपंचवदनायदक्षिणमुखेक
रालवदनायनरसिंहायसकलभूतप्रेतप्रमथनायस्वाहा ॥ ॐनमोभगवतेपंचवदनायपश्चिममुखेगरुडायसकल
विषहरायस्वाहा ॥ ॐनमोभगवतेपंचवदनायउत्तरमुखेआदिवराहायसकलसंपत्करायस्वाहा ॥ ॐनमोभग
वतेपंचवदनायऊर्ध्वमुखेहयग्रीवायसकलजनवशीकरणायस्वाहा ॥ अथन्यासध्यानादिकम् ॥ दशांशंतर्पणंकु
र्यात् ॥ ॐअस्यश्रीपंचमुखीहनुमत्कवचस्तोत्रमंत्रस्य ॥ रामचंद्रऋषिः ॥ अनुष्टुप्छंदः ॥ श्रीसीतारामोदेव
ता॥ममसकलभयविनाशार्थेजपेविनियोगः॥ॐहंहनुमानितिबीजम्॥ॐवायुदेवताइतिशक्तिः॥ॐअंजनीसूनुरि

तिकीलकम् ॥ श्रीरामचंद्रप्रसादसिद्ध्यर्थेहनुमत्कवचमंत्रजपेविनियोगः॥ॐ हंहनुमान्अंगुष्ठाभ्यांनमः॥ॐवा
युदेवतातर्जनीभ्यां० ॥ ॐअंजनीसुतायमध्यमा० ॥ ॐरामदूतायअनामिका० ॥ ॐश्रीहनुमंतायकनिष्ठि०॥
ॐरुंरुद्रमूर्तयेकरतलकरपृष्ठाभ्यांनमः ॥ एवंहृदयादि ॥ ॐपंचमुखीहनुमंतायइतिदिग्बंधः ॥ अथध्यानम् ॥
श्रीरामचंद्रदूतायआंजनेयायवायुसुतायमहाबलायसीतादुःखनिवारणायलंकोपदहनायमहाबलप्रचंडायफा
ल्गुनसखायकोलाहलसकलब्रह्मांडविश्वरूपायसप्तसमुद्रनीरालंघितायपिंगलनयनामितविक्रमायसूर्यबिंबफ
लसेवनायदृष्टिनिरालंकृतायसंजीविनीनांनिरालंकृतायअंगदलक्ष्मणमहाकपिसैन्यप्राणनिर्वाहकायदशकंठ
विध्वंसनायरामेष्टायमहाफाल्गुनसखायसीतासमेतश्रीरामचंद्रवरप्रसादकायपट्प्रयोगागमपंचमुखीहनुमंत
मंत्रजपेविनियोगः॥ ॐह्रींहरिमर्कटमर्कटायवंवंवंवंवंवषट्स्वाहा ॥१॥ ॐ ह्रींहरिमर्कटमर्कटायफंफंफंफंफंफट्
स्वाहा ॥२॥ ॐ ह्रींहरिमर्कटमर्कटायहुंहुंहुंहुंहुंद्विपट्स्वाहा ॥ ३ ॥ ॐह्रींहरिमर्कटमर्कटायखेंखेंखेंखेंखेंमारणा
यस्वाहा ॥ ४ ॥ ॐह्रींहरिमर्कटमर्कटायठंठंठंठंठंस्तंभनायस्वाहा ॥ ५॥ ॐह्रींहरिमर्कटमर्कटायआकर्षिसक
लसंपत्करायस्वाहा ॥ ६ ॥ ॐह्रींऊर्ध्वमुखायहयग्रीवायरुंरुंरुंरुंरुद्रमूर्तयेपंचमुखीहनुमंतायसकलजननिराल
करणायउच्चाटनंकुरुरुस्वाहा ॥ ७॥ ॐह्रींठंठंठंठंठंकूर्ममूर्तयेपंचमुखीहनुमंतायपरयंत्रपरतंत्रपरमंत्रउच्चाटना
यस्वाहा॥८॥ॐह्रींकंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंळंक्षंस्वाहा ॥९॥ॐदिग्बंधः॥
ॐह्रींपूर्वेकपिमुखायपंचमुखीहनुमतेटंटंटंटंटंसकलशत्रुसंहारणायस्वाहा ॥ १० ॥ ॐह्रींदक्षिणमुखेपंचमुखीह

नुमंतायकरालवदनायनारसिंहायहांहांहांहांसकलभूतप्रेतदमनायस्वाहा ॥ ११ ॥ ह्रींपश्चिममुखेवीरगरुडायपंचमुखीवीरहनुमंतायमंमंमंमंमंसकलविषहरणायस्वाहा ॥ १२ ॥ ह्रींउत्तरमुखेआदिवराहायलंलंलंलंलंसिंहनीलकंठमूर्तयेपंचमुखीहनुमंतायअंजनीसुतायवायुपुत्रायमहाबलायरामेष्टायफाल्गुनसखायसीताशोकदुःखनिवारणायलक्ष्मणप्राणरक्षकायदशग्रीवहरणायरामचंद्रपादुकायपंचमुखीवीरहनुमंतायनमः॥१३॥भूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकिनीअंतरिक्षग्रहपरयंत्रपरतंत्रपरमंत्रसर्वग्रहोच्चाटनायसकलशत्रुसंहारणायपंचमुखीहनुमानसकलवशीकरणायसकललोकोपकारणायपंचमुखीहनुमानवरप्रसादकायमहासर्वरक्षायजंजंजंजंजंस्वाहा॥१४॥एवंपठित्वा ॥ यइदंकवचंनित्यंप्रपठेत्प्रयतोनरः॥एकवारंपठेत्स्तोत्रंसर्वशत्रुनिवारणम् ॥ ॥ १५ ॥ द्विवारंचपठेन्नित्यंपुत्रपौत्रप्रवर्द्धनम् ॥ त्रिवारंतुपठेन्नित्यंसर्वसंपत्करंप्रभुम् ॥ १६ ॥ चतुर्वारंपठेन्नित्यंसर्वरोगनिवारणम् ॥ पंचवारंपठेन्नित्यंपंचाननवशीकरम् ॥ १७ ॥ षड्वारंचपठेन्नित्यंसर्वसौभाग्यदायकम् ॥ सप्तवारंपठेन्नित्यमिष्टकामार्थसिद्धिदम् ॥ १८ ॥ अष्टवारंपठेन्नित्यंसर्वसौभाग्यदायकम् ॥ नववारंपठेन्नित्यंराज्यभोगंसमारभेत् ॥ १९ ॥ दशवारंचप्रजपेत्त्रैलोक्यज्ञानदर्शनम् ॥ त्रिसप्तनववारंचराजभोगंचसंभवेत् ॥ ॥ २० ॥ द्विसप्तदशवारंतुत्रैलोक्यज्ञानदर्शनम् ॥ एकादशंजपित्वातुसर्वसिद्धिकरंनृणाम् ॥ २१ ॥ इतिश्रीह० बृ० ध० उपा० स्तबकेश्रीहनुमदुपा० ध्यायेसुदर्शनसंहितायांरामोक्तश्रीपंचमुखीहनुमत्कवचनिरूपणंनाम प्रकरणंतृतीयम् ॥३॥ ॥ श्लो० १३३ ॥ ॥ अथश्रीएकादशमुखहनुमत्कवचम्॥ ॥ उक्तंचागस्तिसंहितायाम्॥

॥ लोपामुद्रोवाच ॥ कुंभोद्भवदयासिंधोश्रुतंहनुमतःप्रभो ॥ यंत्रमंत्रादिकंसर्वंत्वन्मुखोदीरितंमया ॥ १ ॥
दयांकुरुमयिप्राणनाथवेदितुमुत्सहे ॥ कवचंवायुपुत्रस्यएकादशमुखात्मनः ॥ २ ॥ इत्येवंवचनंश्रुत्वाप्रियायाः
प्रश्रयान्वितम् ॥ वक्तुंप्रचक्रमेतत्रलोपामुद्रांप्रतिप्रभुः ॥ ३ ॥ ॥ अगस्त्यउवाच ॥ ॥ नमःकृत्वारामदूतं
हनुमंतंमहामतिम् ॥ ब्रह्मप्रोक्तंतुकवचंशृणुसुंदरिसादरात् ॥ ४ ॥ सनंदनायचमहच्चतुराननभाषितम् ॥ क
वचंकामदंदिव्यंरक्षःकुलनिबर्हणम् ॥ ५ ॥ सर्वसंपत्प्रदंपुण्यंमर्त्यानांमधुरस्वरे ॥ ॐअस्यश्रीकवचस्यैकाद
शवक्रस्यधीमतः ॥ ६ ॥ हनुमत्कवचमंत्रस्यसनंदनऋषिःस्मृतः ॥ प्रसन्नात्माहनूमांश्चदेवतात्रप्रकीर्तितः ॥
॥ ७ ॥ छंदोनुष्टुप्समाख्यातंबीजंवायुसुतस्तथा ॥ मुख्यात्रप्राणशक्तिश्चविनियोगःप्रकीर्तितः ॥ ८ ॥ स्फें
बीजशक्तिधृक्पातुशिरोमेपवनात्मजः ॥ ॥ इतिअंगुष्ठाभ्यांनमः ॥ क्रौंबीजात्मानयनयोःपातुमांवानरेश्वरः ॥
॥ ९ ॥ ॥ इतितर्जनीभ्यांनमः ॥ ॥ ॐक्षंबीजरूपीकर्णौमेसीताशोकविनाशनः ॥ ॥ इतिमध्यमाभ्यां० ॥
ॐ ग्लौंबीजवाच्योनासांमेलक्ष्मणप्राणदायकः ॥ ॥ इतिअनामिकाभ्यांनमः ॥ १० ॥ ॐ वंबीजार्थश्चकंठं
मेअक्षय्याक्षय्यकारकः ॥ ॥ इतिकनिष्ठिकाभ्यांनमः ॥ ॥ ॐ रांबीजवाच्योहृदयंपातुमेकपिनायकः ॥
॥ इति करतलकरपृष्ठाभ्यांनमः ॥११॥ ॐ वंबीजकीर्तितःपातुबाहुंमेचांजनीसुतः ॥ ॐ ह्रांबीजंराक्षस्येंद्रस्यदं
र्पहापातुचोदरम् ॥ १२ ॥ सौंबीजमयोमध्यंमेपातुलंकाविदाहकः ॥ ह्रींबीजधरोगुह्यंमेपातुदेवेंद्रवंदितः
॥ १३ ॥ रंबीजात्मासदापातुचोरूमेवार्धिलंघनः ॥ सुग्रीवसचिवःपातुजानुनीमेमनोजवः ॥ १४ ॥ आपादम

स्तकंपातुरामदूतोमहाबलः ॥ पूर्वेवानरवक्रोमांचाग्नेय्यांक्षत्रियांतकृत् ॥ १५ ॥ दक्षिणेनारसिंहस्तुनैर्ऋत्यांगण
नायकः ॥ वारुण्यांदिशिमामव्यात्खगवक्रोहरीश्वरः ॥ १६ ॥ वायव्यांभैरवमुखःकौबेर्यांपातुमेसदा ॥
क्रोडस्यपातुमांनित्यमीशान्यांरुद्ररूपधृक् ॥ १७ ॥ रामस्तुपातुमांनित्यंसौम्यरूपीमहाभुजः ॥ एकादशमुख
स्यैतद्दिव्यंवैकीर्तितंमया ॥ १८ ॥ रक्षोघ्नंकामदंसौम्यंसर्वसंपद्विधायकम् ॥ पुत्रदंधनदंचोग्रंशत्रुसंपत्तिमर्द्दन
म् ॥ १९ ॥ स्वर्गापवर्गदंदिव्यंचिंतितार्थप्रदंशुभम् ॥ एतत्कवचमज्ञात्वामंत्रसिद्धिर्नजायते ॥ २० ॥ चत्वारि
शतसहस्राणिपठेच्छुद्धात्मनानरः ॥ एकवारंपठेन्नित्यंकवचंसिद्धिदंमहत् ॥ २१ ॥ द्विवारंवात्रिवारंवापठेदायु
ष्यमाप्नुयात् ॥ क्रमादेकादशादेवमावर्तनसपात्सुधीः ॥ २२ ॥ वर्षांतेदर्शनंसाक्षाल्लभतेनात्रसंशयः ॥
यंयंचिंतयतेकामंतंतंप्राप्नोतिपूरुषः ॥ २३ ॥ ब्रह्मोदीरितमेतद्धितवाग्रेकथितंमहत् ॥ इत्येवमुक्त्वाकवचं
महर्षिस्तूष्णींबभूवेंदुमुखींनिरीक्ष्य ॥ संहृष्टचित्तापितदातदीयपादौननामातिमुदास्वभर्तुः ॥ २४ ॥
॥ इतिश्रीह० बृ० ध० उपासनास्त० श्रीहनुमदुपा०ध्या०अगस्तिसंहितोक्तैकादशमुखहनुमत्कवचनिरूप
णंनामप्रकरणंचतुर्थम् ॥ ॥ श्लो०१५७ ॥ ॥ अथहनुमत्सहस्रनामस्तोत्रम् ॥ ॥ ऋषयऊचुः ॥ ऋषे
लोहगिरिंप्राप्तःसीताविरहकातरः ॥ भगवान्किंव्यधाद्रामस्तत्सर्वंब्रूहिसत्वरम् ॥ १ ॥ वाल्मीकिरुवाच ॥
मायामानुषदेहोयंददर्शाग्रेकपीश्वरम् ॥ हनुमंतंजगत्स्वामीबालार्कसमतेजसम् ॥ २ ॥ ससत्वरंसमागम्यसा
ष्टांगंप्रणिपत्यच ॥ कृतांजलिपुटोभूत्वाहनुमान्राममब्रवीत् ॥ ३ ॥ हनुमानुवाच ॥ धन्योस्मिकृतकृत्योस्मि

दृष्टवात्वत्पादपंकजम्॥योगिनामप्यगम्यंचसंसारभयनाशनम्॥४॥पुरुषोत्तमदेवेशकर्तव्यंतान्निवेद्यताम् ॥ श्रीरा
मउवाच ॥ जनस्थानंकपिश्रेष्ठकोप्यागत्यविदेहजाम् ॥५॥ हृतवान्विप्रसंवेशोमारीचानुगतेमयि॥ गवेष्यसां
प्रतंवीरजानकीहरणेपरः ॥ ६॥ त्वयागम्योनकोदेशस्त्वंचज्ञानवतांवरः ॥ सप्तकोटिमहामंत्रमंत्रितावयवःप्रभुः
॥ ७ ॥ ऋषयऊचुः ॥ कोमंत्रःकिंचतद्ध्यानंतन्नोब्रूहियथार्थतः ॥ कथासुधारसंपीत्वानतृप्यामःपरंतप ॥ ८ ॥
वाल्मीकिरुवाच ॥ मंत्रंहनुमतोविद्धिभुक्तिमुक्तिप्रदायकम् ॥ महारिष्टमहापापमहादुःखनिवारणम् ॥ ९ ॥
ॐऐंह्रींश्रींहनुमतेरामदूतायलंकाविध्वंसनायअंजनीगर्भसंभूतायशाकिनीडाकिनीविध्वंसनायकिलिकिलि
बुबुकारेणविभीषणायहनुमतेदेवायॐश्रींह्रींह्रौंह्रांहुंफट्स्वाहा ॥ अन्यंहनुमतोमंत्रंसहस्रनामसंज्ञितम् ॥ जानं
तुऋषयःसर्वेमहादुरितनाशनम् ॥१०॥ यस्यसंस्मरणात्सीतांलब्ध्वाराज्यमकंटकम्॥विभीषणायचददावात्मा
नंलब्धवान्यथा ॥ ११ ॥ ऋषयऊचुः ॥ सहस्रनामसन्मंत्रंदुःखाद्यौघनिवारणम् ॥ वाल्मीकेब्रूहिनस्तूर्णंशुश्रूषा
मःकथांपराम् ॥ १२ ॥ वाल्मीकिरुवाच ॥ शृण्वंतुऋषयःसर्वेसहस्रनामकंस्तवम् ॥ स्तवानामुत्तमंदिव्यंसद
र्थस्यप्रकाशकम् ॥ १३ ॥ ॐअस्यश्रीहनुमत्सहस्रनामस्तोत्रमालामंत्रस्य ॥ श्रीरामऋषिः शिरसि ॥ अनु
ष्टुप्छंदःमुखे ॥ हनुमान्परमात्मादेवताहृदये ॥ ह्रींश्रींह्रौंह्रांबीजानिगुह्ये ॥ श्रीरितिशक्तिःपादयोः ॥ लंका
विध्वंसनइतिकवचंसर्वांगे ॥ किलिकिलिबुबुकारेणइतिकीलकंहृदि ॥ ममसर्वोपद्रवशांत्यर्थंजपेविनियोगः ॥
ॐऐंह्रींहनुमतेरामदूतायअंगुष्ठाभ्यांनमः॥लंकाविध्वंसनायतर्जनीभ्यांनमः॥अंजनीगर्भसंभूतायमध्यमाभ्यां

नमः ॥ शाकिनीडाकिनीविध्वंसनायअनामिकाभ्यांनमः ॥ किलिकिलिबुबुकारेणभीषणायहनुमतेदेवायक
निष्ठिकाभ्यांनमः ॥ ॐह्रींश्रींह्रैंह्रैंफट्स्वाहाकरतलकरपृष्ठाभ्यांनमः॥ ॐऐंह्रींहनुमतेरामदूतायहृदयायनमः॥
लंकाविध्वंसनायशिरसेस्वाहा ॥ अंजनीगर्भसंभूतायशिखायैवषट् ॥ शाकिनीडाकिनीविध्वंसनायकवचा
यहुम् ॥ किलिकिलिबुबुकारेणभीषणायहनुमतेदेवायनेत्रत्रयायवौषट् ॥ ॐह्रींश्रींह्रैंह्रः अस्त्रायफट् ॥
॥ अथध्यानम् ॥ प्रतप्तस्वर्णवर्णाभंसंरक्तारुणलोचनम् ॥ सुग्रीवादियुतंध्यायेत्पीतांबरसमावृतम् ॥१४॥ गोष्प
दीकृतवारीशंपुच्छमस्तकमीश्वरम् ॥ ज्ञानमुद्रांचबिभ्राणंसर्वालंकारभूषितम् ॥१५॥ श्रीरामउवाच ॥ हनुमा
न्श्रीप्रदोवायुपुत्रोरुद्रोनयोजरः ॥ अमृत्युर्वीरवीरश्चग्रामवासोजनाश्रयः ॥ १६ ॥ धनदोनिर्गुणोकायोवीरो
निधिपतिर्मुनिः ॥ पिंगाक्षोवरदोवाग्मीसीताशोकनिवारणः ॥१७॥ शिवःशर्वःपरोऽव्यक्तोव्यक्ताव्यक्तोरसाधनः॥
पिंगकेशःपिंगरोमाश्रुतिगम्यःसनातनः ॥ १८ ॥ अनादिर्भगवान्देवोविश्वहेतुर्नराश्रयः ॥ आरोग्यकर्ता
विश्वेशोविश्वनाथोहरीश्वरः ॥ १९ ॥ भर्गोरामोरामभक्तःकल्याणप्रकृतिस्थिरः ॥ विश्वंभरोविश्वमू
र्तिर्विश्वाकारोथविश्वदः ॥ २० ॥ विश्वात्माविश्वसेव्योथविश्वोविश्वहरोरविः ॥ विश्वचेष्टोविश्वगम्योविश्वध्ये
यःकलाधरः ॥ २१ ॥ प्लवंगमःकपिश्रेष्ठोज्येष्ठोविद्योवनेचरः ॥ बालोवृद्धोयुवातत्त्वंतत्त्वगम्यःसखाह्यजः॥२२॥
अंजनीसूनुरव्यग्रोग्रामस्यांतोधराधरः ॥ भूर्भुवःस्वर्महर्लोकोजनोलोकस्तपोऽव्ययः ॥ २३ ॥ सत्यमोंकार
गम्यश्चप्रणवोव्यापकोमलः ॥ शिवधर्मप्रतिष्ठातारामेष्टःफाल्गुनप्रियः ॥ २४ ॥ गोष्पदीकृतवारीशःपूर्णकामो

धरापतिः ॥ रक्षोघ्नःपुंडरीकाक्षःशरणागतवत्सलः ॥ २५ ॥ जानकीप्राणदाताचरक्षःप्राणापहारकः ॥ पूर्णःस
त्यःपीतवासादिवाकरसमप्रभः ॥ २६ ॥ द्रोणहर्ताशक्तिनेताशक्तिराक्षसमारकः ॥ रक्षोघ्नोरामदूतश्चशाकिनी
जीवहारकः ॥ २७ ॥ बुबुकारहतारातिगर्वःपर्वतमर्दनः ॥ हेतुस्त्वहेतुःप्रांशुश्चविश्वभर्त्ताजगद्गुरुः ॥ २८ ॥ जग
न्नेताजगन्नाथोजगदीशोजनेश्वरः ॥ जगच्छ्रितोहरिःश्रीशोगरुडस्मयभंजनः ॥ २९ ॥ पार्थध्वजोवायुपुत्रोऽमित
पुच्छोऽमितप्रभः ॥ ब्रह्मपुच्छःपरंब्रह्मपुच्छरामेष्टएवच ॥ ३० ॥ सुग्रीवादियुतोज्ञानीवानरोवानरेश्वरः ॥ कल्प
स्थायीचिरंजीवीप्रसन्नश्चसदाशिवः ॥ ३१ ॥ सन्नतिःसद्गतिर्भुक्तिर्मुक्तिदःकीर्तिनायकः ॥ कीर्तिःकीर्तिप्रदश्चैव
समुद्रःश्रीपदःशिवः ॥ ३२ ॥ उदधिक्रमणोदेवःसंसारभयनाशनः ॥ वालिबंधनकृद्विश्वनेताविश्वप्रतिष्ठितः ॥
॥ ३३ ॥ लंकारिःकालपुरुषोलंकेशगृहभंजनः ॥ भूतावासोवासुदेवोवसुस्त्रिभुवनेश्वरः ॥ ३४ ॥ श्रीरामरूपः
कृष्णस्तुलंकाप्रासादभंजकः ॥ कृष्णःकृष्णस्तुतःशांतःशांतिदोविश्वपावनः ॥ ३५ ॥ विश्वभोक्ताथमारीघ्नोब्र
ह्मचारीजितेंद्रियः ॥ ऊर्ध्वगोलांगुलीमालीलांगुलाहतराक्षसः ॥ ३६ ॥ समीरतनुजोवीरोवीरमारोजयप्रदः ॥
जगन्मंगलदःपुण्यःपुण्यश्रवणकीर्तनः ॥ ३७ ॥ पुण्यकीर्तिःपुण्यगीतिर्जगत्पावनपावनः ॥ देवेशोऽमित
मारोथरामभक्तिविधायकः ॥ ३८ ॥ ध्याताध्येयोभगःसाक्षीचेताचैतन्यविग्रहः ॥ ज्ञानदःप्राणदःप्राणोजग
त्प्राणःसमीरणः ॥ ३९ ॥ विभीषणप्रियःशूरःपिप्पलाश्रयसिद्धिदः ॥ सिद्धःसिद्धाश्रयःकालःकालभक्षक
भंजितः ॥ ४० ॥ लंकेशनिधनस्थायीलंकादाहकईश्वरः ॥ चंद्रसूर्याग्निनेत्रश्चकालाग्निःप्रलयांतकः ॥ ४१ ॥

कपीनः कपिशः पुण्यराशिर्द्वादशराशिगः ॥ सर्वाश्रयोप्रमेयात्मारेवत्यादिनिवारकः ॥ ४२ ॥ लक्ष्मणप्राणदाताचसीताजीवनहेतुकः ॥ रामध्येयोहृषीकेशोविष्णुभक्तोजटीबली ॥ ४३ ॥ देवारिदर्पहाहोताधर्ताकर्ताजगत्प्रभुः ॥ नगरग्रामपालश्चशुद्धोबुद्धोनिरंतरः ॥ ४४ ॥ निरंजनोनिर्विकल्पोगुणातीतोभयंकरः ॥ हनुमंतोदुराराध्यस्तपःस्वाध्योमहेश्वरः ॥४५॥ जानकीवनशोकादितापहर्तापराशरः॥वाङ्मयःसदसद्रूपःकारणंप्रकृतेःपरः॥४६॥भाग्यदोनिर्मलोनेतापुच्छलंकाविदाहकः॥पुच्छबद्धयातुधानोयातुधानरिपुप्रियः॥४७॥छायापहारीभूतेशोलोकेशःसद्गतिप्रदः॥प्लवंगमेश्वरःक्रोधःक्रोधसंरक्तलोचनः॥४८॥भक्तानुकंपीविश्वेशोपुरुहूतःपुरंदरः॥क्रोधहर्तातापहर्ताभक्ताभयवरप्रदः॥४९॥अग्निर्विभावसुर्भास्वान्यमोनैर्ऋतिरेवच ॥ वरुणोवायुगतिमान्वायुःकुबेरईश्वरः ॥५०॥ रविश्चंद्रःकुजःसौम्योगुरुःकाव्यःशनैश्चरः ॥ राहुःकेतुर्मरुद्धोताधाताहर्त्तासमीरजः॥५१॥ मशकीकृतदेवारिर्दैत्यारिर्मधुसूदनः ॥ कामःकपिःकामपालःकपिलोविश्वजीवनः ॥५२॥ भागीरथीपदांभोजसेतुबंधविशारदः॥स्वाहास्वधाहविःकव्यहव्यवाहःप्रकाशकः॥५३॥स्वप्रकाशोमहावीरोलघुरमितविक्रमः॥उड्डानोड्डीनगतिमान्सद्गतिःपुरुषोत्तमः ॥५४॥ जगदात्माजगद्योनिर्जगदंतोह्यनंतकः ॥ विपाप्मानिष्कलंकोथमहान्महदहंकृतिः॥ ५५ ॥ खंवायुःपृथिवीचापोवह्निर्दिक्पालएवच ॥ क्षेत्रज्ञःक्षेत्रकर्ताचपल्वलीकृतसागरः॥५६ ॥ हिरण्मयपुराणश्चखेचरोभूचरोमनः ॥ हिरण्यगर्भःसूत्रात्माराजराजोविशांपतिः ॥ ५७ ॥ वेदांतवेद्यउद्गीथोवेदवेदांगपारगः ॥ प्रतिग्रामस्थितिःसद्यःस्फूर्तिदातागुणाकरः ॥ ५८ ॥ नक्षत्रमालीभूतात्मासुरभिःकल्पपादपः ॥

चिंतामणिर्गुणनिधिःप्रजाद्वारमनुत्तमः ॥ ५९ ॥ पुण्यश्लोकपुरारातिर्ज्योतिष्मान्शर्वरीपतिः ॥ किल्किलि
रावसंत्रस्तभूतप्रेतपिशाचकः ॥ ६० ॥ ऋणत्रयहरःसूक्ष्मःस्थूलःसूक्ष्मगतिःपुमान् ॥ अपस्मारहरःस्मर्ताश्रुति
गाथास्मृतिर्मनुः ॥ ६१ ॥ स्वर्गद्वारंप्रजाद्वारंमोक्षद्वारंयतीश्वरः ॥ नादरूपःपरंब्रह्मब्रह्मब्रह्मपुरातनः ॥ ६२ ॥
एकोनेकोजनःशुक्लःस्वयंज्योतिरनाकुलः ॥ ज्योतिर्ज्योतिरनादिश्चसात्विकोराजसस्तमः ॥ ६३ ॥ तमोहर्त्ता
निरालंबोनिराकारोगुणाकरः ॥ गुणाश्रयोगुणमयोबृहत्कायोबृहद्यशाः ॥ ६४ ॥ बृहद्धनुर्बृहत्पादोबृहन्मूर्धाबृह
त्स्वनः ॥ बृहद्योगीबृहन्नासोर्बृहद्बाहुबृहत्तनुः ॥ ६५ ॥ बृहद्यत्नोबृहत्कार्योबृहत्पुच्छोबृहत्करः ॥ बृहद्गतिर्बृह
त्सेव्योबृहल्लोकगतिप्रदः ॥ ६६ ॥ बृहच्छक्तिर्बृहद्वांछाफलदोबृहदीश्वरः ॥ बृहल्लोकनुतोद्रष्टाविद्यादाताजग
द्गुरुः ॥ ६७ ॥ देवाचार्यःसत्यवादीब्रह्मवादीकलाधरः ॥ सप्तपातालगामीचमलयाचलसंश्रयः ॥ ६८ ॥ उत्त
राशास्थितःश्रीदोदिव्यौषधिवशःखगः ॥ शाखामृगःकपींद्रोथपुराणःप्राणचंचुरः ॥ ६९ ॥ चतुरोब्राह्मणोयो
गीयोगगम्यःपरावरः ॥ अनादिनिधनोव्यासोवैकुंठःपृथिवीपतिः ॥ ७० ॥ अपराजितोजितारातिःसदानंददई
शितः ॥ गोपालोगोपतिर्योद्धाकलिःकालःपरात्परः ॥ ७१ ॥ मनोवेगीसदायोगीसंसारभयनाशनः ॥ तत्त्वदा
ताथतत्त्वज्ञस्तत्त्वंतत्त्वप्रकाशकः ॥ ७२ ॥ शुद्धोबुद्धोनित्ययुक्तोभक्तकारोजयद्रथः ॥ प्रलयोमितमायश्चमाया
तीतोविमत्सरः ॥ ७३ ॥ मायानिर्जितरक्षाश्चमायानिर्मितविष्टपः ॥ मायाश्रितश्चनिर्लेपोमायानिर्वर्त्तकःसु
खी ॥ ७४ ॥ सुखीसुखप्रदोनागोमहेशःकृतसंस्तवः ॥ महेश्वरःसत्यसंधःशरभःकलिपावनः ॥ ७५ ॥ रसो

रसज्ञःसन्मानोरूपंचक्षुःश्रुतीरवः ॥ घ्राणंगंधःस्पर्शनंचस्पर्शोहंकारमानगः ॥ ७६ ॥ नेतिनेतीतिगम्यश्चवैकुं
ठभजनप्रियः ॥ गिरीशोगिरिजाकांतोदुर्वासाःकविरंगिराः ॥ ७७ ॥ भृगुर्वसिष्ठश्च्यवनोनारदस्तुंबरोमलः ॥
विश्वक्षेत्रोविश्वबीजोविश्वनेत्रश्चविश्वपः ॥ ७८ ॥ याजकोयजमानश्चपावकःपितरस्तथा ॥ श्रद्धाबुद्धिःक्षमा
तंद्रामंत्रोमंत्रयितासुरः ॥ ७९ ॥ राजेंद्रभूपतीरुंडमालीसंसारसारथिः ॥ नित्यःसंपूर्णकामश्चभक्तकामधु
गुत्तमः ॥ ८० ॥ गणपःकेशवोभ्रातापितामाताथमारुतिः ॥ सहस्रमूर्धासहस्रास्यःसहस्राक्षःसहस्रपात् ॥ ८१ ॥
कामजित्कामदहनःकामःकाम्यफलप्रदः ॥ मुद्रापहारीरक्षोघ्नःक्षितिभारहरोबलः ॥८२॥ नखदंष्ट्रायुधोविष्णुर्भ
क्ताभयवरप्रदः ॥ दर्पहादर्पदोदंष्ट्राशतमूर्तिरमूर्तिमान् ॥ ८३ ॥ महानिधिर्महाभागोमहाभर्गोमहर्द्धिदः॥महाका
योमहायोगीमहातेजामहाद्युतिः ॥ ८४ ॥ महाकर्मामहानादोमहामंत्रोमहामतिः ॥ महाशमोमहोदारोमहा
देवात्मकोविभुः ॥ ८५ ॥ रुद्रकर्माकृतकर्मारत्ननाभःकृतागमः॥ अंभोधिलंघनःसिंहःसत्यधर्मप्रमोदनः॥८६॥
जितामित्रोजयःसोमोविजयोवायुवाहनः ॥ जीवोधातासहस्रांशुर्मुकुंदोभूरिदक्षिणः ॥ ८७ ॥ सिद्धार्थःसिद्धिदः
सिद्धःसकलासिद्धिहेतुकः ॥ सप्तपातालचरणःसप्तर्षिगणवंदितः ॥८८॥ सप्ताब्धिलंघनोवीरःसप्तद्वीपोरुमंडलः॥
सप्तांगराज्यसुखदःसप्तमातृनिषेवितः ॥ ८९ ॥ सप्तस्वर्लोकमुकुटःसप्तहोत्रस्वराश्रयः॥सप्तसामोपगीतश्चसप्तपा
तालसंश्रयः ॥ ९० ॥ सप्तच्छंदोनिधिःसप्तच्छंदः सप्तजनाश्रयः ॥ मेधादः कीर्तिदःशोपहारीदौर्भाग्यनाशनः
॥ ९१ ॥ सर्ववश्यकरोगर्भदोषहापुत्रपौत्रदः ॥ प्रतिवादिमुखस्तंभोरुष्टचित्तप्रसादनः ॥९२॥ पराभिचारशमनो

दुःखहावंधमोक्षदः ॥ नवद्वारपुराधारोनवद्वारनिकेतनः ॥ ९३ ॥ नरनारायणस्तुत्योनवनाथमहेश्वरः ॥
मेखलीकवचीखड्गीभ्राजिष्णुर्जिष्णुसारथिः ॥ ९४ ॥ बहुयोजनविस्तीर्णपुच्छःपुच्छहतासुरः॥दुष्टहंतानियमि
तापिशाचग्रहघातकः ॥ ९५ ॥ बालग्रहविनाशीचधर्मनेताकृपाकरः॥उग्रकृत्यउग्रवेगउग्रनेत्रःशतक्रतुः ॥९६॥
शतमन्युस्तुतःस्तुत्यःस्तुतस्तोतामहाबलः ॥ समग्रगुणशालीचव्यग्रोरक्षोविनाशनः॥९७॥रक्षोग्निदावोब्रह्मेशः
श्रीधरोभक्तवत्सलः ॥ मेघनादोमेघरूपोमेघवृष्टिनिवारकः ॥ ९८ ॥ मेघजीवनहेतुश्चमेघश्यामःपरात्मकः ॥
समीरतनयोयोद्धातत्त्वविद्याविशारदः ॥ ९९ ॥ अमोघोमोघवृष्टिश्चइष्टदोनिष्टनाशनः॥अर्थोनर्थापहारीचसम
र्थोरामसेवकः ॥ १०० ॥ अर्थीधन्यासुराराति:पुंडरीकाक्षआत्मभूः ॥ संकर्षणोविशुद्धात्माविद्याराशिःसुरे
श्वरः ॥ १०१ ॥ अचलोद्धारकोनित्यःसेतुकृद्रामसारथिः ॥ आनंदःपरमानंदोमत्स्यःकूर्मोनिधिःशयः॥१०२॥
वराहोनारसिंहश्चवामनोजमदग्निजः ॥रामःकृष्णःशिवोबुद्धःकल्कीरामाश्रयोहरिः ॥ १०३ ॥ नंदीशृंगीचचंडी
चगणेशोगणसेवितः ॥ कर्माध्यक्षःसुरारामोविश्रामोजगतीपतिः ॥ १०४ ॥ जगन्नाथःकपीशश्चसर्वावासःसदा
श्रयः ॥ सुग्रीवादिस्तुतोदांतःसर्वकर्माप्लवंगमः ॥ १०५ ॥ नखदारितरक्षाश्चनखयुद्धविशारदः ॥ कुशलः
सुधनः शेषोवासुकिस्तक्षकस्तथा ॥ १०६ ॥ स्वर्णवर्णोवलाढ्यश्चपुरुजेताघनाशनः ॥ कैवल्यदीपःकैवल्योगरु
डःपन्नगोगुरुः ॥ १०७ ॥ क्लिक्लिरावहतारातिर्गर्वपर्वतभेदनः ॥ वज्रांगोवज्रवज्रश्चभक्तवज्रनिवारकः ॥ १०८ ॥
नखायुधोमणिग्रीवोज्वालामालीचभास्करः ॥ प्रौढप्रतापस्तपनोभक्ततापनिवारकः ॥ १०९ ॥ शरणंजीवनो

भोक्तानानाचेष्टोथचंचलः ॥ स्वस्थस्त्वस्वास्थ्यहादुःखशातनःपवनात्मजः ॥ ११० ॥ पावनःपवनःकांतोभक्तां
गःसहनोबलः ॥ मेघनादरिपुर्मेघनादसंहतराक्षसः ॥१११॥ क्षरोऽक्षरोविनीतात्मावानरेशःसतांगतिः॥ श्रीकंठः
शितिकंठश्चसहायासहनायकः ॥ ११२ ॥ अस्थूलस्त्वनणुर्भर्गोदेवसंसृतिनाशनः ॥ अध्यात्मविद्यासारश्चअ
ध्यात्मकुशलःसुधीः॥११३॥अकल्मषःसत्यहेतुःसत्यदःसत्यगोचरः॥ सत्यगर्भःसत्यरूपःसत्यःसत्यपराक्रमः
॥ ११४ ॥ अंजनीप्राणलिंगंचवायुवंशोद्भवःश्रुतिः ॥ भद्ररूपोरुद्ररूपःसुरूपश्चित्ररूपधृक्॥ ११५ ॥ मैनाकवं
दितःसूक्ष्मदशनोविजयोजयः ॥ क्रांतदिङ्मंडलोरुद्रःप्रकटीकृतविक्रमः ॥ ११६ ॥ कंबुकंठःप्रसन्नात्माह्रस्वनासो
वृकोदरः ॥ लंबोष्ठःकुंडलीचित्रमालीयोगविदांवरः ॥११७॥विपश्चित्कविरानंदोविग्रहोनल्पशासनः ॥ फल्गुनी
सूनुरव्यग्रोयोगात्मायोगतत्परः॥११८॥योगविद्योगकर्ताचयोगयोनिर्दिगंबरः ॥ अकारादिक्षकारांतवर्णनिर्मि
तविग्रहः॥११९॥उलूखलमुखसिद्धःसंस्तुतःप्रमथेश्वरः॥श्लिष्टजंघःश्लिष्टजानुःश्लिष्टपाणिःशिखाधरः ॥१२०॥ सु
शर्मामितशर्माचनारायणपरायणः॥जिष्णुर्भविष्णुरोचिष्णुर्ग्रसिष्णुःस्थाणुरेवच ॥ १२१ ॥ हरिरुद्रानुकृद्वृक्षःकं
पनोभूमिकंपनः ॥ गुणप्रवाहःसूत्रात्मावीतरागःस्तुतिप्रियः ॥१२२॥ नागकन्याभयध्वंसीऋतुपर्णःकपालभृत्॥
अनुकूलोक्षयोपायोनपायोवेदपारगः॥१२३॥अक्षरःपुरुषोलोकनाथोरूक्षःप्रभुर्दृढः ॥ अष्टांगयोगफलभूःसत्यस
न्धःपुरुष्टुतः१२४स्मशानस्थानविलयःप्रेतविद्रावणश्रमः॥पंचाक्षरपरःपंचमातृकोरंजनध्वजः१२५ योगिनीवृंद
वंद्यश्रीःशत्रुघ्नोनंतविक्रमः॥ब्रह्मचारींद्रियरिपुर्धृतदंडोदशात्मकः॥१२६॥अप्रपंचःसदाकारःशूरसेनोविदारकः॥

वृद्धप्रमोदआनंदःसप्तजिह्वःपतिर्धरः ॥ १२७ ॥ नवद्वारपुराधारःप्रत्यग्रःसामगायकः ॥ षट्चक्रधामास्वर्लोक
भयकृन्मानदोमदः ॥ १२८ ॥ सर्ववश्यकरःशक्तिरनंतोनंतमंगलः ॥ अष्टमूर्तिर्नयोनेताविरूपःस्वरसुंदरः ॥
॥ १२९ ॥ धूमकेतुर्महाकेतुःसत्यकेतुर्महारथः ॥ नंदिप्रियःस्वतंत्रश्चमेखलीडमरुप्रियः ॥ १३० ॥ लोहांगः
सर्वविद्धन्वीपड्गलःशर्वईश्वरः ॥ फलभुक्फलहस्तश्चसर्वकर्मफलप्रदः ॥ १३१ ॥ धर्माध्यक्षोधर्मफलोधर्मोधर्म
प्रदोर्थदः ॥ पंचविंशतितत्त्वज्ञस्तारकब्रह्मतत्परः ॥ १३२ ॥ त्रिमार्गवसतिर्भीमःसर्वदुष्टनिबर्हणः ॥ ऊर्ज्जस्वा
न्निष्कलःशूलीमालीगर्जोनिशाचरः ॥ १३३ ॥ रक्तांबरधरोरक्तोरक्तमालीविभूषणः ॥ वनमालीशुभांगश्चश्वेतः
श्वेतांबरोयुवा ॥ १३४ ॥ जयोजेयपरीवारःसहस्रवदनःकविः ॥ शाकिनीडाकिनीयक्षरक्षोभूतप्रभंजकः ॥
॥ १३५ ॥ सद्योजातःकामगतिर्ज्ञानमुक्तिर्यशस्करः ॥ शंभुतेजाःसार्वभौमोविष्णुभक्तःप्लवंगमः ॥ १३६ ॥
चतुर्नवतिमंत्रज्ञःपौलस्त्यबलदर्पहा ॥ सर्वलक्ष्मीप्रदःश्रीमानंगदप्रियईतिनुत ॥ १३७ ॥ स्मृतिर्बीजंसुरेशानः
संसारभयनाशनः ॥ उत्तमश्रीपरीवारःश्रीनूरुग्रश्चकामधुक् ॥ १३८ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ इतिना
म्नांसहस्रेणस्तुतोरामेणवातभूः ॥ उवाचतंप्रसन्नात्मासंधायात्मानमव्ययम् ॥ १३९ ॥ ॥ हनुमानुवाच ॥
ध्यानास्पदमिदंब्रह्ममत्पुरःसमुपस्थितम् ॥ स्वामिन्दयानिधेरामज्ञातोसिकपिनामया ॥ १४० ॥ त्वद्ध्यान
निरतालोकाःकिंनपश्यंतिसादरम् ॥ तवागमनहेतुश्चज्ञातोह्यद्यमयानघ ॥ १४१ ॥ कर्तव्यंममकिंरामतथापि
ब्रूहिराघव ॥ इतिप्रचोदितोरामःप्रहृष्टात्मेदमब्रवीत् ॥ १४२ ॥ ॥ रामउवाच ॥ ॥ दुर्जयःखलुवैदेहींगृही

त्वाकोपिनिर्गतः ॥ हत्वातमघृणंवीरमानयत्वंकपीश्वर॥ १४३ ॥ ममदास्यंकुरुसखेतवविश्वसुखंकरम् ॥ ओमि
त्याज्ञांतुशिरसागृहीत्वासकपीश्वरः॥१४४॥विधेयंविधिवत्तत्रचकारशिरसास्वयम् ॥ इदंनाम्नांसहस्रंतुयोधीतेप्र
त्यहंनरः ॥ १४५ ॥ दुःखौघोनश्यतेतस्यसंपत्तिर्वर्द्धतेचिरम् ॥ वश्यश्चतुर्विधस्तस्यभवत्येवनसंशयः ॥ १४६ ॥
राजानोराजपुत्राश्चराजकीयाश्चमंत्रिणः ॥ त्रिकालंपठनादस्यसिद्धिःस्यात्करसंस्थिता ॥ १४७ ॥ब्राह्मेमुहूर्तेचो
त्थायप्रत्यहंयःपठेन्नरः ॥ऐहिकामुष्मिकान्सोपिलभतेनात्रसंशयः॥१४८॥संग्रामसंनिविष्टानांवैरिविद्रावणंपर
म्॥ज्वरापस्मारशमनंगुल्मादिप्लीहवारणम्॥१४९॥साम्राज्यसुखसंपत्तिदायकंजपतांनृणाम्॥यइदंपठतेनित्यं
पाठयेद्वासमाहितः॥१५०॥ सर्वान्कामानवाप्नोतिवायुपुत्रप्रसादतः॥१५१॥ ॥इतिश्री ह.बृ.ध.उपासनास्त.श्री
हनुमदुपासनाध्यायेहनुमत्सहस्रनामस्तोत्रनिरूपणंनामप्रकरणंपंचमम् ॥ ५ ॥ श्लो० ३३०॥ अथहनुमत्स्तो
त्रम्॥उक्तंचसुदर्शनसंहितायाम्॥ ॥ॐअस्यश्रीहनुमत्स्तोत्रमंत्रस्यविभीषणऋषिःशिरसि॥अनुष्टुप्छंदसेनमो
मुखे ॥ हनुमान्रुद्रोदेवताहृदि ॥ ह्रींबीजंदक्षस्तने ॥ स्वाहाशक्तिर्वामस्तने ॥ हाहेतिकीलकंनाभौ ॥ देवदत्तस्य
मुखस्तंभनार्थेजपेविनियोगायनमःसर्वांगे ॥ ॐह्रांह्रींह्रूंअंगु०ह्०हनुमतेतर्ज०शिर० ॥ ॐरुद्रायमध्य०
वषट्ॐसर्वदुष्टजनमुखस्तंभनंकुरु २ अनामि०हुं ॥ ॐसर्वकार्यसिद्धिंकुरु २ कनि०वौषट् ॥ ॐह्रां
ह्रींह्रूंफट्स्वाहाकरतलक० फट् ॥ ॥ अथध्यानम् ॥ ॥ चंद्राभंचरणारविंदयुगलंकौपीनमौंजीधरं
नाभ्यांवैकटिसूत्रमुक्तवसनंयज्ञोपवीतंप्रभुम् ॥ हस्ताभ्यामवलंब्यचांगुलिपुटंहारावलीकुंडलंबिभ्रद्दीर्घशिरो

प्रसन्नवदनंतंचांजनेयंभजे ॥ इतिध्यात्वामानसोपचारैरभ्यर्च्यॐह्रांह्रींह्रूंहनुमतेरुद्रायसर्वदुष्टमुखस्तंभनं
कुरु २ ममसर्वकार्यसिद्धिंकुरु २ ह्रांह्रींह्रूंफट्स्वाहा इत्यष्टोत्तरशतंजप्त्वा स्तोत्रंपठेत् ॥ बिभीषणउवाच ॥
आपन्नाखिललोकार्त्तिहारिणेश्रीहनूमते ॥ अकस्मादागतोत्पातनाशनायनमोऽस्तुते ॥ १ ॥ आधिव्याधिमहा
मारीग्रहपीडापहारिणे ॥ प्राणापहंत्रेदैत्यानांरामप्राणात्मनेनमः ॥२॥ संसारसागरावर्तगतोर्मिभ्रांतचेतसाम् ॥
शरणागतमर्त्यानांशरण्यायनमोऽस्तुते ॥ ३ ॥ राजद्वारेबिलद्वारेप्रवेशेभूतसंकुले ॥ गजसिंहमहाव्याघ्रचौ
रभीषणकानने ॥ ४ ॥ शरण्यातिशरण्यायवनात्मजनमोऽस्तुते ॥ प्रदोषेचप्रवासेचयेस्मरन्त्यञ्जनीसु
तम् ॥ ५ ॥ अर्थसिद्धिः यशः कांतिः प्राप्नुवंतिनसंशयः ॥ कारागृहेप्रयाणेचसंग्रामेदेशविप्लवे ॥ ६ ॥ येस्मरं
तिहनूमंतंतेषांनास्तिविपत्क्षयम् ॥ वज्रदेहायकालाग्निरुद्रायामिततेजसे ॥ ७ ॥ दुष्टदैत्यमहादर्पदलनाय
महात्मने ॥ ब्रह्मास्त्रस्तंभिनेतुभ्यंनमः श्रीरुद्रमूर्त्तये ॥ ८ ॥ सीतावियुक्त श्रीरामशोकदुःखभयापह ॥
तापत्रयोपसंहारिन्नांजनेयनमोऽस्तुते ॥ ९ ॥ जप्त्वास्तोत्रमिदंमंत्रंवसुवारंजपेन्नरः ॥ राजद्वारेसभास्थाने
प्राप्तवादे जयोभवेत् ॥ १० ॥ बिभीषणकृतंस्तोत्रंयःपठेत्सततंनरः ॥ सर्वापद्भ्योविमुच्येतनात्रकार्याविचारणा
॥ ११ ॥ सर्वसिद्धिमवाप्नोतिसर्वत्रविजयीभवेत् ॥ यःपठेत्परयाभक्त्यासगच्छेद्वैष्णवंपदम् ॥ १२ ॥ लिखित्वा
पूजयेद्यस्तुसपुमाञ्जयमाप्नुयात् ॥ ॐनमोहनुमतेरुद्रायसर्वदुष्टजनमुखस्तंभनंकुरु २ उद्दंडदोर्दंडवृंदसैन्येंद्र
वीरप्रतापप्रकटपरिक्रमकृपालुरामदूतांजनेयहरिमर्कटमर्कटआपदोद्धारश्रीवीरहनुमन्ममशत्रून्संहारयसंहा

रयाद्यमांरक्षरक्ष ॥ १४॥ इतिश्रीह॰बृ॰ध॰उपा॰स्त॰श्रीहनुमदुपासनाध्यायेसुदर्शनसंहितोक्तश्रीहनुमत्स्तोत्रनि
रूपणंनामप्रकरणंषष्ठम् ॥ ६ ॥ ॥ श्लो०॥ ३४४ ॥ ॥ अथविचित्रवीरहनुमान्मालामंत्रः ॥ ॐअस्यश्री
विचित्रवीरहनुमान्मालामंत्रस्यश्रीरामचंद्रभगवानृषिः अनुष्टुप्छंदःश्रीविचित्रवीरहनुमान्देवताममाभीष्टसि
ध्यर्थेमालामंत्रजपेविनियोगः ॥ अथन्यासः ॥ ॐह्रांअंगु०हृद० ॥ ह्रींतर्ज०शि० ॥ ॐह्रूंम०वषट्॥ ॐह्रैं
अ०हुं॥ ॐह्रौंकनि०नेत्र० ॥ ॐह्रःकरत० फट् ॥ अथध्यानं ॥ वामेकरेवैरिवहंवहंतुशैलंपरेश्रृंखलमालयाढ्यम्
दधानमाध्मातसुवर्णवर्णभजेज्ज्वलत्कुंडलमांजनेयम् ॥१॥ॐनमोभगवतेविचित्रवीरहनुमतेप्रलयकालानलप्र
भाज्वलप्रतापवज्रदेहायअंजनीगर्भसंभूतायप्रकटविक्रमवीरदैत्यदानवयक्षराक्षसग्रहबंधनाय॥ भूतग्रह। प्रेत
ग्रह। पिशाचग्रह। शाकिनीग्रह। डाकिनीग्रह। काकिनीग्रह। कामिनीग्रह । ब्रह्मग्रह। ब्रह्मराक्षसग्रह।
चोरग्रह । बंधनायएहिएहिआगच्छागच्छ आवेशयावेशय ममहृदयंप्रवेशय २ स्फुर २ प्रस्फुर
सत्यंकथय २ व्याघ्रमुखंबंधय २ सर्पमुखंबंधय २ राजमुखंबंधय २ सभामुखंबंधय २ शत्रुमुखंबंधय २
सर्वमुखंबंधय २ लंकाप्रासादभंजनसर्वजनंमेवशमानय २॥ श्रींह्रींक्लींश्रींसर्वानाकर्षय २ शत्रून्मर्दय २
मारय २ चूर्णय २ खेखेखेश्रीरामचंद्राज्ञयाप्रज्ञयाममकार्यसिद्धिंकुरुकुरुममशत्रून्भस्मीकुरुकुरुस्वाहा ॥
ॐह्रांह्रींह्रूंह्रैंह्रौंह्रः फट्श्रीविचित्रवीरहनुमतेममसर्वशत्रूंभस्मीकुरुकुरुहनहनहुंफट्स्वाहा॥प्रतिदिनएकादशवा
रंजपेत् ॥ पूर्ववन्न्यासध्यानपूर्वकंनिवेदयेत् ॥ इतिश्रीह॰बृ॰ध॰उपा॰स्त॰श्रीहनुमदुपास॰ ध्यायेश्रीवीरविचित्र

हनुमान्मालामंत्रनिरूपणंनामप्रकरणंसप्तमम् ॥७॥ ॥श्लो०॥३४६॥ अथश्रीसौभाग्यहनुमान्महामंत्रः ॥ ॥ ॐ
अस्यश्रीसौभाग्यहनुमन्महामंत्रस्य ॥ श्रीरामचंद्रऋषिः ॥ अतिजगतीछंदः ॥ श्रीहनुमान्परमात्मारुद्रो
देवता ॥ हनुमानितिबीजं ॥वायुर्देवताइतिशक्तिः ॥ अंजनीसुतइतिकीलकं ॥ श्रीहनुमत्प्रसादसिध्यर्थेजपे
विनियोगः ॥ ॥ ॐहंहनुमान्अंगुष्ठाभ्यां०॥ ॐवंवायुदेवतायैतर्जनीभ्यां०॥ ॐअंअंजनीसुतायमध्यमाभ्यां०
ॐरंरामदूतायअनामिकाभ्यां० ॥ ॐहंहनुमतेकनिष्ठिकाभ्यां० ॥ ॐरुंरुद्रमूर्त्तयेकरतलकरपृ० ॥ ॥ एवं
हृदयादिन्यासः ॥ ॥ अथध्यानं ॥ ॥ अथातःसंप्रवक्ष्यामिशृणुसर्वांगसुंदरि ॥ अथैवंदेवदेवेशध्यानंश्री
हनुमत्परम्॥१॥पंचवक्त्रंमहाभीमंत्रिपंचनयनैर्युतम् ॥ बाहुभिर्दशभिः प्रोक्तंसर्वकामार्थसिद्धिदम् ॥२॥ पूर्वंचवा
नरंप्रोक्तंकोटिसूर्यसमप्रभम् ॥ दंष्ट्राकरालवदनंभ्रुकुटीकुटिलेश्वरम् ॥३॥ तथैवदक्षिणंवक्त्रंनारसिंहमहाद्भुतम् ॥
अत्युग्रतेजसंवर्षभीषणंभयनाशनम् ॥ ४ ॥ पश्चिमेगरुडंवक्त्रंवज्रतुंडंमहाबलम् ॥ पवनामप्रशमनंसर्वभूतनि
कृंतनम् ॥ ५ ॥ उत्तरेशूकरंवक्त्रंकृष्णदीप्तिनभोनिभम् ॥ पातालनिधिभेत्तारंज्वररोगनिकृंतनम् ॥ ६ ॥ कुर्वं
तुतूशणंतेपांसर्वशत्रूहरंपरम् ॥ ॥ इतिध्यात्वापंचोपचारपूजांकुर्यात् ॥ अथसप्तमुद्रांप्रदर्शयेत् ॥ खड्गंत्रि
शूलंखट्वाङ्गंपाशंचांकुशमेवच ॥ धृतमुद्गरमुद्राचसप्तमुद्राःप्रकीर्तिताः ॥ ७ ॥ ॥ अथमालामंत्रः ॥ ॥ ॐरा
मदूतअंजनिवायुसूतायमहाबलायसीताशोकदुःखनिवारणायलंकोपदहनायबाहुबलप्रचंडायफाल्गुनसखाय
कोलाहलब्रह्मांडविश्वरूपायसप्तसमुद्रनीरालंघनायपिंगलनयनायामितविक्रमायसूर्यबिंबफलसेवितायदृष्टि

निरालंकृतायसंजीव २ लक्ष्मणांगदसुग्रीवमहाकपिसैन्यप्राणनिर्वाहकायदशकंठविध्वंसनायश्रीसीतासमेत
श्रीरामचंद्रमूर्त्तयेस्वाहा ॥ अथमूलमंत्रः ॥ ॐहनुमान्वायुदेवतायअंजनिसुतरामदूतहनुमंतरुद्रमूर्त्तयेस्वाहा ॥
॥ इतिमंत्रः ॥ यथाशक्तियथाज्ञानंयथासंख्यंमूलमंत्रजपंकुर्यात् ॥ मूलमंत्रजपकाले । मालामंत्रजपस्याद्यंतयोः
त्रिरावर्त्तनीयाःयेतन्नामसंपुटितकरणंसूचितम्॥अथपूर्वोक्तमुद्रांप्रदर्शयेत् । तथापूर्वोक्तध्यानंकरांगन्यासांश्च
कुर्यात्गंधादिनमस्कारांतंपूजयेदिति ॥ इतिश्रीह·बृ·ध·उपा·स्त·श्रीहनुमदुपा·ध्यायेश्रीसौभाग्यहनुमान्महा
मंत्रनिरूपणंनामप्रकरणमष्टमम् ॥८॥ श्लो०॥३५३॥ अथश्रीहनुमद्दीपदानविधिः॥उक्तंचसुदर्शनसंहितायाम्॥
अथातःसंप्रवक्ष्यामिदीपदानंहनूमतः॥येनविज्ञानमात्रेणसिद्धोभवतिसाधकः ॥१॥ दीपदानप्रमाणंतुतैलपात्रक्र
मेणतु ॥ प्रमाणंतंतुवक्ष्यामिपञ्चमानमनुक्रमात् ॥ २ ॥ स्थानंभेदंचमंत्रंचदीपदानमनुंपृथक् ॥ पुष्पवासिततै
लंचसर्वकामफलप्रदम् ॥३॥ तिलतैलंश्रियोहेतुःपथिकगमनायच॥अतसीतैलमुद्दिष्टंयशःकर्मणिनिश्चितम्॥४॥
सार्षपंरोगनाशायसर्वव्याधिविनाशकम् ॥ मारणेराजिकाज्जातंतथाबिभीतकादिकात् ॥५॥ उच्चाटेचकरंजोत्थं
विद्धिपंमधुवृक्षजम् ॥ अलाभेसर्वतैलेचतिलतैलमनुक्रमम् ॥६॥गोधूमंचतिलंमाषंमुग्धंवैतंदुलंक्रमात्॥पंचधान्य
मिदंप्रोक्तंनित्यंदीपमुदाहृतम्॥७॥पंचधान्यसमुद्भूतंपिष्टपात्रंसुशोभनम्॥सर्वकाममिदंप्रोक्तंसर्वदादीपदापने ८
वश्येतंदुलपिष्टंचमारणेमाषपिष्टकम् ॥ उच्चाटनेतिलंकृष्णंयवपिष्टंप्रकीर्तितम् ॥९॥ पांथस्यागमनेप्रोक्तंगोधूमो
त्थंसतंदुलम्॥मोहनेतंदुलंपिष्टमाकर्षेमुद्गपिष्टकम् ॥१०॥ संग्रामेकेवलंमाषंकृत्वादीपंचपात्रके ॥ संधौत्रिपलजं

प्रोक्तंलक्ष्मीकस्तूरिकामता ॥ ११ ॥ एलालवंगकर्पूरमृगनाभिसमुद्धृता ॥ कन्यकावरणेराजंवश्यंसर्वतथैवच
॥ १२ ॥ अलाभेसर्ववस्तूनांपंचधान्यपरंमतम् ॥ अष्टमुष्टिभवेत्किंचित्किंचित्पिष्टंतुपुष्कलम् ॥ १३ ॥ पंचस
प्ततथारौद्रंप्रमाणंचयथाक्रमम् ॥ सुगंधंनैवमानंस्याद्यथारुचिसमंमतम् ॥१४॥ नित्यदीपःप्रकर्त्तव्यस्ताम्रपात्रे
हनूमतः ॥ सोमवारेततोध्यानंजलप्लवंचकारयेत् ॥ १५ ॥ पश्चात्प्रमाणतोग्राह्यंक्रमशःहस्तघोपणम् ॥ ततपिष्टं
शुद्धपात्रेणनदीतोयेनपिंडितः ॥ १६ ॥ दीपपात्रंततःकुर्याच्छुद्धोनियतमानसः ॥ दीपंपात्रेघटमानेमारुतंकव
चंपठेत् ॥ १७ ॥ इतिपात्रविधिः ॥ मालामनूनांयेवर्णाःसाध्यनामसमन्विताः ॥ वर्त्तिकायाःप्रकर्त्तव्यंतंतवस्त
त्प्रमाणतः ॥ १८ ॥ त्रिंशांशेनैवतेरम्याग्गुरुकार्येऽखिलेमता ॥ कूटतुल्यास्मृतानित्यासामान्याथविशेपतः॥१९॥
रुद्रकूटगुणाप्रोक्तानपात्रेचविमोचना ॥ एकविंशतिसंख्याकास्तंतवोनिर्मभेमताः ॥ २० ॥ रक्तसूत्रंहनूमतदीप
दानेप्रकीर्त्तितम् ॥ कृष्णमुच्चाटनेप्रोक्तंद्वेषमारणकर्मणि ॥ २१ ॥ कटुतुल्यपलंतैलंगुरुकार्येष्टसंगुणम् ॥ नित्ये
पंचपलंप्रोक्तंअथवामनसोरुचिः ॥ २२ ॥ हनुमत्प्रतिमायास्तुसन्निधौदीपदापनम् ॥ प्रतिमादीपसहिताग्रहभू
तग्रहेषुच ॥ २३ ॥ चतुष्पथेतथाप्रोक्तंदीपदानंतदन्तरम्॥ सन्निधौस्फाटिकेलिंगेशालिग्रामस्यसन्निधौ ॥ २४ ॥
नानाभोगाः श्रियःप्रोक्तंदीपदानंहनूमतः ॥ गणेशसन्निधौविष्णोर्महासंकटनाशनम् ॥ २५ ॥ विपव्याधिमहा
घोरेहनुमत्सन्निधौकुरु ॥ दुर्गायाःसन्निधौप्रोक्तंसंग्रामेघोरसंकटे ॥ २६ ॥ द्यूतेवृष्टिस्थलेचैवविशेपान्मारणेतथा
व्याधिनाशेतुंडबन्धेदुष्टदृष्टौतथैवच ॥ २७ ॥ राजद्वारेबंधमुक्तौगुरुकार्येप्रयत्नतः ॥ गजस्यमस्तकेचैवराज्यल

क्ष्मीसमृद्धये ॥ २८ ॥ स्त्रीवशीकरणेदीपोवापीतीरेसरोवरे ॥ विप्रक्षत्रियविट्शूद्रवश्येविप्रालयेशुभम् ॥ २९ ॥
जपेत्पूर्वमुखेकार्येउच्चाटेवायवेस्मृतः ॥सर्ववश्येचकर्त्तव्योदीपोयाम्यदिशामुखः ॥ ३० ॥ मारणेभेदकार्येचक
र्तव्योराक्षसीमुखः ॥ शांतिकेपुष्टिकेसंधौकन्यापुत्राप्तयेतथा ॥३१॥ अभिचारार्थसिध्यर्थेदीपःकार्योजलाश्रितः
स्तंभनेभूतदमनेशाकिनीनांचविग्रहे ॥ ३२ ॥ व्यंतराणांचयक्षाणांपवनाभिमुखंकुरु ॥ धनेशोधनधान्यादिरा
ज्यलक्ष्मीसमृद्धये ॥ ३३ ॥ दीपःकार्योमहायोगेपांथस्यागमनायच॥ ईशानाभिमुखःकार्योसर्वऋद्धिविवृद्धये ॥
॥ ३४ ॥ सर्वेषुगुरुकार्येपुराजपत्नीवशेतथा ॥ वृष्टिसमागमार्थायदेशस्योत्सादनायच ॥ ३५ ॥ देवतासन्मु
खःकार्योदीपःशून्यैःप्रकल्पयेत् ॥ वृष्टिवृक्षादिनिष्पत्तौदुर्गेतोयप्रशोषणे ॥ ३६ ॥ विवरादिप्रवेशेषुभूमिस्थधन
कर्षणे॥ गंडभेदेपुसर्वेषुश्रृंखलाबंधमोचने॥३७॥खातंकृत्वाकरोन्मानंचतुरस्रंसुशोभनम्॥तन्मध्येस्थापयेद्दीपंद
क्षिणाभिमुखंतथा ॥३८॥पात्रधारणयंत्रंतुविशेषेणनिशामय ॥ स्वर्णरूपोद्भवंताम्रंत्रपुलोहोद्भवंतथा ॥ ३९ ॥
नागपात्रंविशेषेणवश्यादिषट्सुकर्मसु॥पात्राधारेतुषट्कोणेबीजानिविन्यसेत्तथा॥४०॥ह्रांह्रींह्रूंह्रैंह्रौंह्रःक्रमात्॥
अग्निकोणंसमाश्रित्यकोणेकोणेयथाक्रमम्॥मध्येहनुमद्गायत्रींतांश्रृणुष्वषडानन ॥४१॥ रामदूतायविद्महेवायु
पुत्रायधीमहि।तन्नोहनुमत्प्रचोदयात्॥ततोमंत्रेणदीपपात्रंवेष्टयेत् ॥उंह्रांह्रींह्रूंह्रैंह्रौंवज्रकायतुंडलंकेश्वरवधायम
हासेतुबंधायमहाशैलप्रवाहगगनेचर ॥ एह्येहिभगवन्महाबलपराक्रमभैरवायाज्ञापयएह्येहिमहारौद्रदीर्घपुच्छे
नवेष्टयवैरीणांभंजय २ ठुंफट्इतिमंत्रंसमुच्चार्यंब्रह्मचर्यंजपंजपेत् ॥ पंचाशदधिकंपात्रेयंत्रंमंत्रेणवेष्टयेत् ॥छुरि

काअग्रतोस्थाप्याकरवीरैश्चपूजयेत् ॥ ४२ ॥ अथमंत्रंप्रवक्ष्यामिमंत्रेणचप्रपूजयेत् ॥ ॐऐंश्रींह्रांह्रींह्रूंह्रैंह्रौंह्रःफें
हनुमन्प्रगटपराक्रमआक्रांतदिङ्मंडलयशोचितान्नधवलीकृतजगत्रितयवज्रदेहेज्वलदंसूर्यकोटिसमप्रभं ॥
तनुरुद्रावतारलंकापुरदहनउदधिलंघनदशग्रीवशिरकृंतातशीतायासन्निवारकवायुसुतअंजनिगर्भसंभूतश्रीरा
मलक्ष्मणानंदकरकपिसैन्यप्राकारसुग्रीवसख्यकारणबलिनिबर्हणद्रोणपर्वतोत्पाटन । अशोकवनविदारण
अक्षकास्यच्छेदनवनरक्षाकारसमूहभंजन । ब्रह्मास्त्रबह्मशक्तिग्रसन । लक्ष्मणशक्तिभेदन ॥ लक्ष्मणशक्तिभे
दननिवारण । शिशु समानपीनबालादित्यसानुग्रसनमेघनादहोमविध्वंसन । इंद्रजिद्वधकारणसीतारक्षकरा
क्षसविदारण ॥ कुंभकरणादिवधपरायणश्रीरामभक्तितत्परव्योमद्रुमोल्लंघनमहासामर्थ्यमहातेजःपुंजविरा
जमानस्वामिवचनसंपादित । अर्जुनसंयुगसहाय । कुमारब्रह्मचारीगंभीरस्वरदक्षिणांशमार्तंडमेरुपर्वतोत्पा
टकचरण ॥ सर्वदुष्टनिबर्हण । व्याघ्रादिभयनिवारण ॥ सर्वशत्रुछेदन ॥ समपरस्यत्रिभुवनस्त्रीपुंनपुंसका
त्मकंसर्वजीवजातम् । वशयं २ ममाज्ञाकारंसंपादय २ नानानामधेयान्राज्ञःसपरिवारान्ममसेवकान्कुरु २
सर्ववश्यअविषाणविध्वंसय २ प्रबलानिपरसैन्यानिक्षोभय २ सर्वकार्यादिनादितिसाधय २ सर्वदुर्जनानांमुखा
निस्तंभयकीलयघेघेघेह्राहाहाहुंहुंहुंफट्स्वाहा ॥ मंत्रमेतत्पठेन्नित्यंयावद्दीपंसमापयेत् ॥ दीपाग्रेपठमानस्तुम
नोवांछितमाप्नुयात् ४५ ॥ ॥ अथविधिः ॥ भूमिशायीनक्तभोजीवर्णमालासमन्वितः ॥ कपीश्वरंस्मरेन्नित्यं
एकविंशतिवासरान् ॥ ४६ ॥ प्रमाणंदीपकरणेकार्यसिद्धिःप्रजायते ॥ शकुनान्संप्रवक्ष्यामिआगमोक्तप्रमाण

कान् ॥ ४७ ॥ कार्पासंरसकुंभंचविद्धांगंचांगवर्जितम् ॥ अधिकांगंदुष्टबुद्धिंदद्याकार्येनजायते ॥ ४८ ॥ सुवा
सिनींसुपुरुषंफलंगांवत्ससंयुताम् ॥ तुरंगंगजखड्गंचदद्यावाह्यंसुखप्रदम् ॥ ४९ ॥ एवंदीपविधानंचमयोक्तंतेवि
शेषतः ॥ हितायजगतांपुत्रतत्क्षणात्सिद्धिकारकम् ॥ ५० ॥ तस्मात्सर्वप्रयत्नेनदेयंकुलापरीक्षकम् ॥ देवानां
चयथाविष्णुर्नदीनांजाह्नवीतथा ॥ ५१ ॥ तक्षकःसर्वनागानांधेनूनांकामधुक्तथा ॥ तथासुदर्शनंचेयंसंहिताप
रिकीर्तिता ॥ ५२ ॥ विष्णुभक्तायशांतायशांतायवसवात्मने ॥ सुभक्तायसुशिष्यायतत्रज्ञायप्रकाशयेत् ॥५३॥
यथामाहिष्मतीनाथतथावायुसुतःस्मृतः ॥ उभयोरंतरंनास्तिकृत्वापापमवाप्नुयात्॥५४॥ इतिश्रीहृ·बृ·ध·उपा·
स्त·श्रीहनुमदुपा·ध्यायेसुदर्शनसंहितोक्तश्रीहनुमद्दीपदानविधिनिरूपणंनामप्रकरणंनवमं ॥९॥ श्लो० ॥४०७॥
अथहनुमत्पताकाव्रतम् ॥ उक्तंचानंदरामायणेमनोहरकांडे॥विष्णुदासउवाच॥किंचिद्व्रतंहनुमतस्त्वंमांवक्तुमि
हार्हसि॥रामदासउवाच॥यदारामस्त्रिकूटाद्रौनागपाशैस्तुपीडितः॥नारदस्यवचःश्रुत्वासस्मारविनतासुतम् १॥
तदासौकाश्यपीवीरःसमागत्यरणांगणे॥प्रणाममकरोत्तस्मैरामायामिततेजसे॥२॥निवार्यपन्नगास्त्रंतन्मेघनाद
समीरितम् ॥ तुष्टावरघुवीरंतंससैन्यंचसलक्ष्मणम्॥३॥उवाचप्रणिपत्याथरामभद्रंखगेश्वरः ॥ ॥ गरुडउवाच ॥
आश्चर्यमिदमत्यंतंयद्भवानस्मरद्धिमाम्॥४॥सतिवीरेमहारुद्रेसगणेश्रीहनूमति॥ सुग्रीवेचनलेनीलेसुषेणेजांबुव
त्यपि ॥ ५ ॥ अंगदेदधिवक्रेचतारेचतरलेतथा ॥ मैंदेसतिमहावीर्येकिमत्रास्तिप्रयोजनम् ॥ ६ ॥ ॥ श्रीरा
मउवाच ॥ भवद्भीतिमुपागम्यविद्रुताश्चभुजंगमाः ॥ एतेषुसत्सुवीरेषुकिमुसैन्यमपीडयन् ॥ ७ ॥ ॥ गरुडउ

वाच ॥ ॥ रामदेवमहाबाहोकपीनांचरितंशृणु ॥ आत्मनोपिसमाविष्टान्माकुरुष्वात्रगर्हणम् ॥ ८ ॥ साक्षा
त्त्वंभगवान्विष्णुर्लक्ष्मीस्तुजनकात्मजा ॥ सौमित्रिःफणिराजोऽयंरुद्राश्चकपयःस्मृताः ॥ ९ ॥ सुग्रीवोवीरभद्रो
यं१शंभुरेपःस्मृतोनलः २ विद्धिदाशरथेनूनंगिरीशोनीलएवच ३ ॥१० ॥ महायशाःसुषेणोऽयं ४ जांबवांश्चाप्य
जैकपात् ५ अहिर्बुध्न्यस्त्वंगदोऽत्र६ दधिवक्रःपिनाकधृक्७॥११॥आयुताजित्त्वयंतारः८स्थाणुश्चतरलोमतः९
मैंदोभर्गतनुःसाक्षात्१०हनुमान्भगवान्स्मृतः११।१२॥अवतीर्णामहारुद्रास्त्वदर्थंरघुनंदन॥अवसन्सर्वदेशेपुना
नापर्वतमध्यतः ॥१३॥ धृत्वाचकपिरूपाणिअवतेरुर्महीतले ॥ सर्वेपिकपितांप्राप्ताःकारणंतद्ब्रवीमिते॥१४॥पुरा
देवासुरैःसिंधोर्मथिताद्व्याधयोऽभवन् ॥ नानापीडाकराःसर्वाल्लूताविस्फोटकादयः ॥ १५ ॥ तैरेवव्याधिभिःसर्वं
पीडितंजगतीतलम् ॥ ऋषयोऽपिनृपालाश्चब्रह्माणंशरणंययुः ॥ १६ ॥ ऊचुश्चजगतांनाथंब्रह्माणंकमलोद्भवम् ॥
त्राहित्राहिजगन्नाथव्याधिभ्योजगतामिमाम् ॥ १७ ॥ पीडितांदारुणैर्दोषैर्ज्वराद्यैश्चमहोल्बणैः ॥ त्रिदोषैर्जर्ज
रीभूतांविभ्रमैर्व्याकुलीकृताम् ॥ १८ ॥ औषधानिनसिध्यंतिमंत्रयंत्राणिचैवहि ॥ पीडयंतिमहारोगामानवा
न्नाशकारिणः ॥ १९ ॥ एतत्तेकथितंसर्वंब्रह्मस्त्वत्पुरतःसुधीः ॥ २० ॥ तत्तेषांवचनंश्रुत्वारुद्रान्संप्रार्थयद्विधिः ॥
तेपिश्रुत्वाब्रह्मवाक्यंरुद्राएकादशामलाः ॥ २१ ॥ समाश्वासंविरंचिंतेवीरभद्रादयःसुराः ॥ संभूयवानरेष्वेवसु
ग्रीवप्रमुखाइमे ॥ २२ ॥ पर्यटन्पर्वताग्राणिमंडलानिचसर्वशः ॥ नादयंतोजगत्सर्वंभुभुःकारैःसुदारुणैः ॥ २३ ॥
क्ष्वेडितैःक्रीडनैस्तेषांव्याधयोनाशमाप्नुयुः ॥ ततस्तुसकलांदृष्ट्वावानरैर्वेष्टितांभुवम् ॥ २४ ॥ तुतोषभगवान्ब्रह्मा

ददौतेभ्योवरान्बहून् ॥ ब्रह्मोवाच ॥ ॥ युष्मास्वपिचमुद्रास्तुमृतसंजीवनीकला ॥ २५ ॥ आज्ञाऽस्तुसर्वज
गतिवेगोऽस्तुमनसःसमः ॥ युष्मान्स्मरंतियेमर्त्याःपूजयंतिभवत्तनूः ॥ २६ ॥ पताकाविविधाःकृत्वाचित्रतोर
णसंयुताः ॥ भक्ष्यभोज्यानिखाद्यानिलेह्यंपेयंचसर्वशः ॥ २७ ॥ युष्मानुद्दिश्ययेमर्त्याजुव्हंतिहिहुताशने ॥ हविः
पुण्यतमंरुद्रास्तेषांसिद्धिर्नसंशयः ॥ २८ ॥ पायसेनैवसाज्येनतथैवतिलसर्पिषा ॥ यजंतिभवतांवृंदंतेयांतिपरमं
पदम् ॥ २९ ॥ एवंवैरुद्रमखिलंगाथावैश्वानरीस्तथा ॥ मानस्तोकेतिवामंत्रोमनोज्योतिरथापिवा ॥ ३० ॥ भवतांय
जनंचात्रगायत्र्यावाप्रकीर्त्तितम् ॥ एवंयेमानवालोकेविधानंपरिकुर्वते ॥ ३१ ॥ व्याधिंमुक्त्वासुखासीनास्त्वन्तेयां
त्यक्षयंपदम् ॥ गरुडउवाच ॥ इतिरामपुरावृत्तंकपीनांकथितंमया ॥ ३२ ॥ एषुरुद्रेषुसर्वेषुहनुमान्भद्रनायकः ॥ ३३ ॥
विधानंतत्रकर्त्तव्यंयत्रास्तिहनुमत्तनुः ॥ गोपुरेहनुमन्मूर्तिःशिलायांचप्रतिष्ठिता ॥ ३४ ॥ तत्रसर्वंप्रकर्त्तव्यंविधा
नंसुरसत्तम ॥ ॥ श्रीरामउवाच ॥ ॥ येनकेनप्रकारेणक्रियतेकपिपूजनम् ॥ ३५ ॥ पताकाःकीदृशस्तत्रक
तिकार्याविहंगम ॥ हवनंकतिसंख्याकंकिंद्रव्यंकोजपोऽत्रवै ॥ ३६ ॥ किंदानंकेनविधिनातन्ममाचक्ष्वसुव्रत
गरुडउवाच ॥ जनमारेसमुत्पनेग्रामेवापत्तनेपिवा ॥ ३७ ॥ प्रभवत्यौषधंनैवमणिमंत्रपुरःक्रिया ॥ विधानं
तत्रकर्त्तव्यमेकादश्यांतिथौनृप ॥ ३८ ॥ प्रातःकालेसमुत्थायकृतशौचोद्विजोत्तमः ॥ स्नात्वागंगाजलेपुण्ये
तिलामलकसंस्कृतः ॥ ३९ ॥ एकादशद्विजान्श्रेष्ठान्सोपवासान्निमंत्रयेत् ॥ जागरस्तैस्तुकर्त्तव्यः सर्वोपस्क
रसंयुतः ॥ ४० ॥ आदौतुमंडपंकृत्वासर्वत्रापिसुशोभितम् ॥ पुष्पमंडपिकामध्येमंडपेस्थापयेद्धरान् ॥ ४१ ॥

पंचामृतैस्तुस्नपनंरुद्रेभ्यःपरिकल्पयेत् ॥ ततस्तुकुसुमैःपूजाशतपत्रादिभिः शुभैः ॥ ४२ ॥ चंदनंचसकर्पूरं
देयंरुद्रांस्तुलेपनम् ॥ दशांगधूपमादद्यादीपैर्नीराजयेत्ततः ॥ ४३ ॥ नैवेद्यंविविधंदद्यात्तांबूलेनैवसंयुतम् ॥
एकादशपताकास्तुपटैःसुपरिकल्पयेत ॥ ४४ ॥ यायायस्मैसमुद्दिष्टापताकाचसुशोभना ॥ तस्यतस्यै
वरूपंतुतस्यामेवप्रलेपयेत् ॥ ४५ ॥ एवंकृतेविधानेचसुपताकासुतोरणैः ॥ प्रातः कालेतुराजेंद्रजागरां
तेद्विजोत्तम ॥ ४६ ॥ कृतस्नानोनदीतोयेहोमंकुर्यात्समाहितः ॥ पायसेनतुसाज्येनतथैवतिलसर्पिषा ॥ ४७ ॥
अयुतंहवनंकृत्वापुनःपूजांप्रकल्पयेत् ॥ पताकांहनुमद्द्वारेतस्यैवचनिधापयेत् ॥ ४८॥ राजद्वारेतुसौग्रीवींसौ
षेणीमापणेन्यसेत् ॥ नलनीलपताकेतुशिवद्वारेतुविन्यसेत् ॥ ४९ ॥ स्मरस्यतरलस्यापिमैंदस्यह्यंगदस्यच ॥
ग्रामाद्बहिश्चतुर्दिक्षुमार्गेषुस्थापयेद्बुधः ॥५०॥जलस्थानेजांबवतोदधिवक्त्रींचतुष्पथे ॥ स्थापयेत्परमांदिव्यांम
हावाद्यादिमंगलैः॥५१॥द्वारदेशेजनानांचरुद्रमूर्त्तिविलेखयेत्॥चित्रितापंचवर्णैश्चग्रामसूत्रैश्चवेष्टयेत्॥५२॥प्रत्य
हंकारयेद्विद्वान्भक्त्याब्राह्मणतर्पणम् ॥ दद्याद्वस्त्राणिऋत्विग्भ्योसालंकाराणिभूपतिः ॥ ५३ ॥ छत्राणिकर
पत्रैश्चपादुकाश्चविशेषतः ॥ धेनुंपयस्विनींदद्यादाचार्यायसवत्सकाम् ॥ ५४ ॥ सदक्षिणांसवस्त्रांचसालंकारां
गुणान्विताम् ॥ द्विजायमहिषींदद्यात्तथैवपृथिवीपते ॥ ५५ ॥ अन्येभ्योब्राह्मणेभ्यश्चसप्तधान्यानिभूरिशः ॥
लवणंसघृतंदेयंतैलंचसगुडंतथा ॥ ५६ ॥ शय्यादानानिभूरीणिछत्राणिविविधानिच ॥ एतत्कृत्वाविधानंचरा
जाक्षेममवाप्नुयात्॥५७॥ रुद्रएवात्रनिर्दिष्टोजपेसर्वैःसुलक्षणः॥अथवाहवनंशस्तंमानस्तोकइतिस्फुटम् ॥ ५८॥

इतिश्रीहरिकृ० बृ० ध० उपा० स्त० श्रीहनुमदुपासना० ध्यायेआनंदरामायणोक्तहनुमत्पताकाव्रतविधाननि
रूपणंनामप्रकरणंदशमम् ॥ १० ॥ श्लो० ४६४ ॥ ॥ अथहनुमत्कल्पः ॥ ॥ उक्तंचतंत्रसारे ॥ देव्यु
वाच ॥ ॥ शैवादिगाणपत्यादिशाक्तानिवैष्णवानिच ॥ साधकानिचसौराणिचान्यानियानिकानिच ॥ १ ॥
एतानिदेवदेवेशत्वदुक्तानिश्रुतानिच ॥ किंचिदन्यच्चदेवानांसाधनंयदिकथ्यताम् ॥ २ ॥ शंकरउवाच ॥
शृणुदेविप्रवक्ष्यामिसावधानावधारय ॥ हनुमत्साधनंपुण्यंमहापातकनाशनम् ॥ ३ ॥ एतद्गुह्यतमंलोके
शीघ्रसिद्धिकरंपरम् ॥ जयोयस्यप्रसादेनलोकत्रयजितोभवेत् ॥ ४ ॥ तत्साधनविधिंवक्ष्येनृणांसिद्धिक
रंयतः ॥ हुंकारमादौसंप्रोक्तंहनुमतेतदनंतरम्॥रुद्रात्मकायहुंचैवफडितिद्वादशाक्षरम् ॥ ५ ॥ (१ हुंहनुमते
रुद्रात्मकायहुंफट् ॥१) एतन्मंत्रंसमाख्यातंगोपनीयंप्रयत्नतः ॥ तवस्नेहेनभक्त्याचददामितवसुंदरि ॥६॥ एत
न्मंत्रमर्जुनायपुरादत्तंतुशौरिणा ॥ जपेनसाधनंकृत्वाजितंसर्वंचराचरम् ॥ ७ ॥ नदीकूलेविष्णुगेहेनिर्जनेपर्वतेव
ने ॥ एकाग्रचित्तमाधायसाधयेत्साधनंमहत् ॥ ८ ॥ महाशैलंसमुत्पाट्यधावंतंरावणंप्रति ॥ तिष्ठतिष्ठरणेदुष्टम
मजीवन्नमोक्ष्यसे ॥ ९ ॥ इतिब्रुवंतंकोपेनक्रोधरक्तमुखांबुजम् ॥ भोगींद्राभंस्वलांगूलमुत्क्षिपंतंमुहुर्मुहुः ॥ १० ॥
लाक्षारक्तारुणंरौद्रंकालांतकयमोपमम् ॥ ज्वलदग्निसमंनेत्रेसूर्यकोटिसमप्रभम् ॥११॥ अंगदाद्यैर्महावीरैर्वेष्टितं
रुद्ररूपिणम् ॥ एवंरूपंहनूमंतंध्यात्वायःप्रजपेन्मनुम् ॥१२॥लक्षजापात्प्रसन्नःस्यात्सत्यंतेकथितंमया॥ध्यानैक
माश्रितानांचसिद्धिरेवनसंशयः॥१३॥प्रातःस्नात्वानदीतीरउपविश्यकुशासने ॥प्राणायामंपडंगंचमूलेनसकलंच

रेत् ॥ १४ ॥ पुष्पांजल्यष्टकंदत्वाध्यात्वारामंससीतकम् ॥ ताम्रपात्रेततःपद्ममष्टपत्रंसकेसरम् ॥ १५ ॥
रक्तचंदनघृष्टेनलिखेत्तस्यशलाकया ॥ कर्णिकायांलिखेन्मंत्रंतत्रावाह्यकपिंप्रभुम् ॥ १६ ॥ कर्णिकायांयजे
द्देवंदत्वापाद्यादिकंततः ॥ गंधपुष्पादिकंचैवनिवेद्यमूलमंत्रतः ॥ १७ ॥ सुग्रीवंलक्ष्मणंचैवअंगदंनलनीलकम् ॥
जांबवंतंचकुमुदंकेसरिणंदलेदले ॥ १८ ॥ पूर्वादिक्रमतोदेविपूजयेद्गंधचंदनैः ॥ पवनंचांजनींचैवपूजयेद्द
क्षवामतः ॥ १९ ॥ दलाग्रेपुक्रमात्पूज्यालोकपालास्ततःपरम् ॥ ध्यात्वाजपेन्मंत्रराजंलक्षंयावन्नसाधकः ॥
॥ २० ॥ लक्षांतेदिवसंप्राप्यकुर्याच्चपूजनंमहत् ॥ एकाग्रमनसाधीमांस्तस्मिन्पवननंदने ॥ २१ ॥ दिवारात्रौ
जपंकुर्याद्यावत्संदर्शनंभवेत् ॥ सुदृढंसाधकंमत्वानिशीथेपवनात्मजः ॥ २२ ॥ सुप्रसन्नस्ततोभूत्वाप्रयाति
साधकाग्रतः ॥ यथेप्सितंवरंदत्वासाधकायकपिप्रभुः ॥ २३ ॥ सर्वसौख्यमवाप्नोतिविहरेदात्मनःसुखैः ॥
एतच्चसाधनंपुण्यंदेवानामपिदुर्लभम् ॥ तवस्नेहात्समाख्यातंभक्तासियदिपार्वति ॥ २४ ॥ अथवीरसाधनम् ॥
हनूमतोतिगुह्यंचलिख्यतेवीरसाधनम् ॥ ब्राह्ममुहूर्तउत्थायकृतनित्यक्रियोद्विजः ॥ २५ ॥ गत्वानदींततः
स्नात्वातीर्थमावाह्यत्वष्टधा ॥ मूलमंत्रंततोजप्त्वासंसिक्तोनित्यसंख्यया ॥ २६ ॥ ततोवासःपरीधायगंगातीरे
ऽथवाशुचौ ॥ उपविश्य ॥ आंअंगुष्ठाभ्यांनमः आंहृदयायनमइत्यादिनाचकरांगन्यासौकुर्यात् ॥ ततःप्राणा
यामः॥अकारादिवर्णानुच्चरन्वामनासापुटेनवायुंपूरयेत्। पंचवर्गानुच्चरन्कुंभयेत् ।यकाराद्येनरेचयेत् ॥ एवंवा
रत्रयंकृत्वामंत्रवर्णैरंगन्यासंकुर्यात्॥ततोध्यानम् ॥ ध्यायेद्रणेहनूमंतंकपिकोटिसमन्वितम् ॥ धावंतंरावणंजेतुं

दृष्ट्वासत्वरमागतम् ॥ २७॥ लक्ष्मणंचमहावीरंपतितंरणभूतले ॥ गुरुंचक्रोधमुत्पाट्यगृहीत्वाग्गुरुपर्वतम् ॥२८॥
हाहाकारैः सदंडैश्चकल्पयंतंजगत्रयम् ॥ आब्रह्मांडसमप्रस्थंकृत्वाभीमंकलेवरम् ॥ २९ ॥ इतिध्यात्वाष्ट
सहस्रंजपेत् ॥ ८ ॥ अस्यमंत्रः ॥ श्रीबीजंपूर्वमुच्चार्यपवनंचततोवदेत् ॥ नंदनंचततोदेयंङेवसानेनलप्रिया ॥
(श्रींपवननंदनायस्वाहा) ॥ ३० ॥ दशार्णोयंमनुः प्रोक्तोनराणांसुरपादपः ॥ सप्तदिवसंमहाभयंदत्वात्रि
भागशेषासुनिशासुनियतमागच्छति यदिसाधकोमायांतरति ईप्सितंवरंप्राप्नोति॥विद्यांवापिधनंवापिराज्यंवा
शत्रुनिग्रहम् ॥ तत्क्षणादेवमाप्नोतिसत्यंसत्यंसुनिश्चितम् ॥ ३१ ॥ इतिश्रीहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवे
धर्मस्कंधेउपासनास्तवकेहनुमदुपासनाध्यायेहनुमत्कल्पनिरूपणंनामप्रकरणमेकादशम्॥११॥ श्लो०४९५॥
॥ अथहनुमद्गह्वरमाह सुदर्शनसंहितायाम् ॥ विभीषणउवाच ॥ भगवंस्तार्क्ष्यपक्षींद्रवदकल्पं हनूमतः ॥
सांगोपांगंसमंत्रंचश्रोतुमिच्छामितत्त्वतः ॥ १ ॥ तार्क्ष्यउवाच ॥ पवनात्मजमंत्राणांवदामिगह्वरंस्फुटम् ॥
येनविज्ञानमात्रेणमंत्रस्यांतेस्थिरोभवेत् ॥ २ ॥ वेदादिगगनंरेफस्वरंपंचदशान्वितम् ॥ सकारंप्रतिलोमेनरुद्रे
णारूढमुद्धरेत् ॥ ३ ॥ एकादशस्वरोपेतंगगनंसंयुतंवदेत् ॥ वामकर्णेंदुसहितंकांतंफाग्नियुतंवदेत् ॥ ४ ॥
पुनर्द्वितीयसूतेऽपिमंत्रःपंचाक्षरःस्मृतः ॥ मंत्रस्यास्यपुराप्रोक्तोमहादेवऋषिःस्वयम् ॥ ५ ॥ रामचंद्रोऽथवाब्रह्म
गायत्रीछंदउच्यते ॥ देवताहनुमान्प्रोक्तःसर्वारिष्टविनाशनम् ॥ ६ ॥ चतुर्थबीजमुदितंमारुतात्मजसंयुतम् ॥
अंजनीसूनुसंयुक्तंतृतीयंशक्तिरुच्यते ॥ ७ ॥ श्रीरामभक्तसंयुक्तंहांशब्दःप्राणईरितः ॥ श्रीरामलक्ष्मणप्रा

णकरेतिगगनंवदेत् ॥ ८ ॥ रेफंनारायणाश्लिष्टंमायांहूंतदनंतरम् ॥ अयंजीवःपुराप्रोक्तोमंत्रस्यास्यप्रदीपनः ॥
॥ ९ ॥ सर्वकार्यप्रसिद्ध्यर्थंजपेन्मंत्रमिमंद्विजः ॥ नमोहनुमतेरामदूतायपुनरावदेत् ॥ १० ॥ लक्ष्मणप्रा
णदात्रेचअंजनीसूनवेतथा ॥ सीताशोकविनाशनायेतितस्यपदात्परम् ॥ ११ ॥ लंकाप्रासादकपदाद्भंजनाय
त्वमुद्धरेत् ॥ ब्रह्मास्त्रब्रह्मशक्तिश्चनिवारणपदंततः ॥ १२ ॥ ङंतैरेतैःस्वबीजाद्यैर्हृदादिन्यासमारभेत् ॥ तत
श्चसर्वमूलेनव्यापकन्यासमाचरेत् ॥ १३ ॥ प्रणवाद्यामर्ककलांबिंदुनार्द्धविभूषिताम् ॥ रमांचमायासमिध
मुखतूर्यरसस्वरैः ॥१४॥ सबिंदुभिः पुरश्चाथशिवाद्यमस्त्रवर्णयुक् ॥ एतद्धनंजयारूढंशिवस्वरेणसंयुतम् ॥१५॥
बिंदुमुच्चतदग्राथखमस्त्रेणयुतंवदेत् ॥ वह्निरूढंशूलपाणिस्वरयुक्तंचबिंदुमत् ॥ १६ ॥ ततोवदेच्छिवंचंद्रसंयुतं
वह्निसंस्थितम् ॥ मनुस्वरेणसंयुक्तंभूपितंबिंदुनोपरि ॥ १७ ॥ ततःक्षाद्यंचशशिनासंयुतंशून्यवर्णयुक् ॥
यांत्यंवह्निसमारूढंवागादिसंयुतंवदेत् ॥ १८ ॥ सबिंदुकंततःशैवंशशिसंस्थेचबिंदुमत् ॥ शक्रस्वरयुतंवाच्यं
रुद्रबीजादिवान्मनुः ॥ १९ ॥ ततोनतिःसमुच्चार्याचतुर्थ्यंतंहनूमते ॥ ममेतिचपदंचोक्त्वापरंपष्टियुतंततः ॥
॥ २० ॥ चकारक्षयकुष्टेतिगंडमालाचस्फोटकम् ॥ क्षतज्वरेतिचततएकाहिकंवदेत्ततः ॥ २१ ॥ द्याहिकं
त्र्याहिकंचेतिचातुर्थिकंचसंततः ॥ ज्वरंचैवततोवाच्यंसान्निपातिकमीरयेत् ॥२२॥ ज्वरंभूतज्वरंमंत्रज्वरंमूल
भगंदरः॥मूत्रकृच्छ्रकपालेतिशूलकर्णेतिशूलकम् ॥ अक्षिशूलोदरशूलहस्तशूलपदंततः॥२३॥ पादशूलादीन्प्रवदे
त्सर्वव्याधीन्क्षणेनच ॥ २४ ॥ भिंधियुग्मंछिंधियुग्मंनाशयेतिद्विधावदेत् ॥ निकृंतयेतियुगलंछेदयेतिद्विधा

ततः ॥ २५ ॥ भेदयेतिद्विधावाच्यंमहावीरपदंततः ॥ हनुमानितिहाशब्दंद्वेधातुकवचंद्विधा ॥ २६ ॥
घेशब्दंयुगलंचोक्त्वाबीजानिचततोवदेत् ॥ मायाद्रितूर्यपष्ठैश्चकवचास्त्राग्निवल्लभा॥२७॥ सप्तत्युत्तरशतंवर्णामंत्रे
ह्यस्मिन्प्रकीर्त्तिताः ॥२८॥ अथमंत्रप्रकाशः॥ॐ ऐंश्रींह्रांह्रींह्रूंस्फ्रेंख्फ्रेंह्सौं ह्स्फ्रें ह्सौं ॐनमोहनुमन्ममपरस्यच
क्षयकुष्ठगंडमालास्फोटकंक्षतज्वरमेकाहिकंद्व्याहिकंत्र्याहिकंचातुर्थिकंसंततज्वरंसान्निपातिकज्वरंभूतज्वरंमंत्र
ज्वरशूलभगंदरमूत्रकृच्छ्रकपालकर्णशूलाक्षिशूलोदरशूलहस्तशूलपादशूलादीन्सर्वव्याधीन्क्षणेनभिंधि २ छिंधि
२नाशय२निकृंतय२छेदय२भेदय२महावीरहनुमन्ह्रांह्रांघेघेह्रींह्रींह्रूंह्रूंफट्स्वाहा॥अक्षराणि १७० ॥ अयंरोगप्र
शांत्यर्थंजप्तव्यः सततंनृणाम् ॥ भस्मवावार्यनेनैवमंत्रयित्वाददेत्सुधीः ॥ २९ ॥ मंत्रेयेगदितारोगास्तेनश्यं
त्यस्यचाज्ञया ॥ इतिप्रथममंत्रः ॥ आंजनेयस्यमंत्रंचप्रवदामिसमासतः ॥ ३० ॥ सर्वलोकहितार्थायसद्यःप्रत्य
यकारकम् ॥ वेदादिमंत्रंततोवाच्यंलक्ष्मीमायांत्रिधोच्चरेत् ॥३१॥ द्वितीयतुर्यपष्ठैश्चस्वरैःसमनुवर्त्तिनी॥शशिना
हंवन्हिसूस्थमेकारेणविभूषितम् ॥३२॥ बिंदुमच्चततःशून्यंवाद्ययुक्तंसवन्हिकम् ॥ एकादशस्वरोपेतंबिंदुनोर्ध्वंवि
भूषितम् ॥३३॥ शिवचंद्राग्निरूढंमौयुक्तंबिंदुविभूषितम् ॥ भर्गसौम्यंशून्यसंस्थमस्त्रेणाग्निसमन्वितम् ॥३४॥ अ
र्कादिकलयायुक्तंबिंद्वाढ्यंविजयप्रदम् ॥ हंसयुक्तंमनुकलायुक्तंबिंद्वविभूषितम्॥३५॥ बीजकूटास्त्वमीरुद्राएका
दशनिवेशिताः॥हृदयंहनुमच्छब्दंचतुर्थ्यंतंसमुच्चरेत् ॥३६॥ गुहाबलततश्चाथपराक्रममममेतिच॥परस्यचचतुर्वर्णा
न्भूतप्रेतपिशाचकम् ॥ ३७ ॥ शाकिनीडाकिनीचाथयक्षिणीपूतनेतिच ॥ मारीततोमहामारीकृत्यायक्षेतिरा

क्षमी ॥ ३८ ॥ ततोभैरववैतालग्रहब्रह्मग्रहेतिच ॥ ब्रह्मराक्षसादिकेतिजातक्रूरेतिचोच्चरेत् ॥ ३९ ॥ बाधान्क्षणे नचहनंद्विधोज्जंभययुग्मकम् ॥ निरासयद्विधावाच्यंवारयेतिद्विधावदेत् ॥ ४० ॥ बंधयेतियुगंचैवनुदेतिचद्वि धोच्चरेत् ॥ सूदेतिचद्विधाप्रोक्तंधुनुचेतिद्विधोच्चरेत् ॥४१ ॥ द्विधोच्चरेन्मोचयेतिमामेनंचततःपरम् ॥ रक्षेतियुग लंवाच्यंमहाशब्दमतःपरम् ॥ ४२ ॥ माहेश्वररुद्रावतारहात्रिधाकवचंत्रिधा ॥ हुंहुंघेघेत्रिवारंस्यात्कवचास्त्रा ग्निवल्लभा ॥ ४३ ॥ एकसप्त्युत्तरशतंमंत्रेवर्णाः प्रकीर्त्तिताः ॥ ४४ ॥ अथ मंत्रप्रकाशः ॥ ॐऐंश्रींह्रांह्रींह्रूं स्फ्रें ख्फ्रेंह्सौंह्स्ख्फ्रेंह्सौं ॐनमोहनुमतेमहाबलपराक्रमममपरस्यचभूतप्रेतपिशाचशाकिनीडाकिनीयक्षिणीपूत नामारीमहामारीकृत्यायक्षराक्षसभैरववेतालग्रहब्रह्मग्रहब्रह्मराक्षसादिकजातक्रूरबाधान्क्षणेनहन २ जृंभय २ निरासय२वारय२बंधय२ नुद२ सूद २ धुनु२ मोचय२ मामेनंचरक्ष२ महामाहेश्वररुद्रावतारहा३ हुं ३ हूं घे ३ हूंफट्स्वाहा अक्षराणि ॥ १७१ ॥ सर्वत्रसर्वभूतानांनाशकोहनुमन्मनुः ॥ भस्मवारिसर्षपांश्चसिकतानभिमं त्रयेत् ॥ ४५ ॥ यत्रक्वापिभयशंकाविकिरेत्तत्रतत्रतु ॥ एकैकंवासमूहंवादशदिक्षुइतस्ततः ॥ ४६ ॥ विकीर्य चभस्मवारिभीतस्यप्रक्षिपेत्तनौ ॥ पानार्थंवारिदातव्यंभस्मचांगेनिवेशयेत् ॥ ४७ ॥ इति द्वितीयमंत्रः ॥ उत्तरंचांजनेयस्यमंत्रंवच्मिसमासतः ॥ कलौजप्तस्यसर्वत्रभयहंतानसंशयः ॥ ४८ ॥ प्रणवंवाग्भवंमांचह्रां ह्रींह्रूंचततः परम् ॥ पूर्ववत्पंचकूटानिबीजानिचततोच्चरेत् ॥ ४९ ॥ एकादशेतिकूटानिप्रोच्चार्यनमइत्यपि ॥ हनुमतेपदंचोक्त्वाममशब्दंपरस्यच ॥ ५० ॥ महाभयानिपंचार्णान्सर्पव्याघ्रेतितस्कर ॥ जलाग्निविपजंगमस्था

वरंसहजेतिच ॥ ५१ ॥ कृत्रिमोपविषंचेतिमहासंग्रामकंततः ॥ आरण्यवादविवादशस्त्रास्त्राग्न्यादिकानिच ॥
॥ ५२ ॥ संहरेतिद्विधोच्चार्यविनाशययुगंततः ॥ दुर्गसंग्रासययुगंत्रोटयद्वितयंतथा ॥ ५३ ॥ भंजद्विधाभंजया
थद्विधास्तंभयवैद्विधा ॥ कुंठयेतिद्विधावाच्यंमोचयेतिद्विधोच्चरेत् ॥ ५४ ॥ वानरऋक्षेमहेतिवीरमामेनमे
वहि ॥ चकारंरक्षरक्षेतिहकारंचत्रिधोच्चरेत् ॥ ५५ ॥ कवचंचत्रिधोच्चार्यघेऽक्षरंचत्रिधावदेत् ॥ क्रोधमस्त्रंवह्नि
जायासंयुतोमनुरीरितः ॥ ५६ ॥ एकषष्ट्युत्तरशतंमंत्रेवर्णानिवेशिताः ॥ ५७ ॥ अथमंत्रप्रकाशः ॥ ॥ ॐऐंश्रीं
ह्रां ह्रीं ह्रूं ह्स्रौं ह्स्ख्फ्रें ह्सौं ह्स्ख्फ्रें ह्सौं नमोहनुमतेममपरस्यचमहाभयानिसर्पव्याघ्रतस्करजलाग्निविषजंगम
स्थावरसहजकृत्रिमोपविषमहासंग्रामारण्यवादविवादशस्त्रास्त्राग्न्यादिकानिसंहर २ विनाशय २ दुःखंसंग्रा
सय २ त्रोटय २ भंजर भंजय २ स्तंभयर कुंठयर मोचय २ वानरऋक्षमहावीरमामेनंचरक्ष २ हा ३ हूं ३ घे
३ हुंफट्स्वाहा ॥ अक्षराणि ॥ १६१ ॥ शस्त्रास्त्रविषसर्पादिव्यथाभयविनाशकः ॥ मंत्रोयंरामदूतस्यचिंतितेप्सितसाधकः ॥ ५८ ॥ गदितःसर्वलोकानांहितार्थसत्यसाधकः ॥ ॥ इतितृतीयमंत्रः ॥ मारुतेर्मंत्रमन्यच्च
ब्रुवेसर्वमनोहरम् ॥ ५९ ॥ सद्यः कलौचभक्तानांकार्यप्रत्ययकारकम् ॥ प्रणवोवाक्ततोलक्ष्मीर्हल्लेखाचत्रिधा
विधा ॥६०॥ उक्तः स्वरैस्त्रिभिश्चाथबिंदुनांकितमस्तकम् ॥ संपात्यवह्निसंस्थंचईशानस्वरसंयुतम्॥६१॥विंद्राद्यं
चततः प्रोक्तंद्व्युत्तरंकरकंशृणु॥द्वितीयंतुकवर्गस्यपवर्गस्यतदेवहि ॥६२॥ यवर्गस्यद्वितीयेनसंयुक्तंवायुतंकुरु॥
विंदुनाभूपितंमूर्ध्नितोन्यच्छृणुबीजकम् ॥ ६३ ॥ शिवेंदुवह्निभंशक्रस्वराढ्यंबिंदुभूपितम् ॥ प्राणजीवशून्य

युक्तंफानलेरास्वरान्वितम् ॥ ६४ ॥ विंद्वंकितशिरस्कंचकूटपंक्त्यभिधंमहत् ॥ शिवशक्तियुतंचान्यदिंदुस्वरस
मन्वितम् ॥ ६५ ॥ विंद्वंकितंविद्धिकूटमेकादशमितिध्रुवम् ॥ नतिर्हनुमतेचेतिपश्चाद्राक्षसकुलेतिवै ॥ ६६ ॥
दावानलद्वादशार्ककोटिचार्कप्रभंपदम् ॥ ज्वलत्तनूरुहपदंभीमनादममोच्चरत् ॥ ६७ ॥ परस्यचपदंदुष्टदुर्जना
थमहापदम् ॥ पकारकंपदंवादिविवादिद्वेषकारकम् ॥ ६८ ॥ ततोकार्यभंजकेतिक्रूरप्रकृतिकंपदम् ॥ प्रवृद्ध
कोपावेशकहंतुश्चैतत्पदंततः ॥ ६९ ॥ कामुकादीनीतिपदंदूरस्थेतिपदंततः ॥ समीपस्थान्भूतभविष्यद्वर्त्त
मानानथोच्चरेत् ॥ ७० ॥ पुंस्त्रीनपुंसकांश्चातुर्वर्ण्यान्क्षणेनसत्वरम् ॥ हनद्विधादहद्विधासंहारयद्विधावदेत् ॥
॥ ७१ ॥ मोहयेतिद्विधावाच्यंमर्दयेतिद्विधाततः ॥ द्वेषयेतिद्विधाचोक्त्वामार्जारमूपकेतिच ॥ ७२ ॥ वत्सद्यः
प्राणैश्चततोवियोजयद्विधोच्चरेत् ॥ विध्वंसयद्विधाहित्रिद्विधामूकयतेद्विधा ॥ ७३ ॥ पौनरुक्त्याजारयेतिवर्ध
येतिद्विधाततः ॥ जृंभयेतिद्विधाचोक्त्वापातयेतिद्विधावदेत् ॥ ७४ ॥ ततोममपदंचोक्त्वापरस्यचततःपदम् ॥
पादतलाक्रमितांश्चकुरुद्वंद्वंततोवदेत् ॥ ७५ ॥ दासीभूतान्संपादयद्विधाहाचत्रिधोच्चरेत् ॥ त्रिःक्रोधंचत्रिधाघे
चकवचास्त्राग्निवल्लभा॥७६॥वर्णानांद्विशतंप्रोक्तंपंचपष्ट्युत्तरंमनोः॥ ७७॥ अथमंत्रप्रकाशः॥ ॥ ॐ ऐंश्रींह्रांह्रींह्रूं
हस्फ्रेंख्फ्रेंहसौंहस्ख्फ्रेंहस्रौंनमो हनुमतेराक्षसकुलदावानलद्वादशार्ककोट्यर्कप्रभज्वलत्तनूरुहभीमनाद ममपर
स्यचदुष्टदुर्जनमहापकारकवादिविवादिद्वेषकारककार्यभंजकक्रूरप्रकृतिकप्रवृद्धकोपावेशकहंतुकामुकादीन्दूर
स्थान्समीपस्थान्भूतभविष्यद्वर्त्तमानान्पुंस्त्रीनपुंसकांश्चातुर्वर्ण्यान्क्षणेनसत्वरंहन २ दह २ संहारय २ मोहय २

मर्दय २ द्वेषय २ मार्जारमूपकवत्सद्यः प्राणैर्वियोजय २ विध्वंसय २ हिल्लि २ मूकय २ जारय २ वर्धय २ जृंभय २पातय२ ममपरस्यचपादतलाक्रमितान्कुरु २ दासीभूतान्संपादय २ हा ३ हुं ३ घे ३ हुंफट्स्वाहा ॥ अक्षराणि ॥ २६५ ॥ विद्वेपिवैरिदुष्टानां वंशविच्छेदकारकः ॥ मंत्रोयंगदितःसत्यंमुनिभिर्मंत्रपारगैः ॥ ७८ ॥ विशिष्यतेकलौसत्यंप्रत्ययायाल्पबुद्धिभिः ॥ महारुद्रावतारस्यजगत्प्राणात्मजस्यहि ॥ ७९ ॥ मतिंविद्धिवरिष्टांचसर्वसिद्धिप्रदांनृणाम् ॥ वारिभस्माभिमंत्राणांसिकतासर्पपांस्तथा ॥ ८० ॥ अभिसंमंत्र्यविकिरेत्सर्वत्रचइतस्ततः॥तल्लंघनाद्भवत्येवसर्वेदुष्टास्तुवश्यकाः॥८१॥इतिचतुर्थमंत्रः ॥ वेदमूर्धांतथावाणीरमाबिंदुविभूपिता॥मामुखेनचवामांगंवामश्रुत्याविभेदना ॥८२॥ बिंदुभूपितमूर्धायद्बीजानिचततः परम् ॥ जीवचास्त्रार्णयुक्तत्वाद्दहनारूढमेवच॥८३॥ शिवस्वरसमायुक्तंबिंदुभूपितमस्तकम् ॥ शून्यमस्त्रार्णसंमूढमग्निनाधोयुतंतथा॥८४॥एकादशकलायुक्तंबिंदुमत्तदनंतरम् ॥ जीवांत्यजीवसंयुक्तंवन्ह्यारूढंचबिंदुसत् ॥८५॥ शतमन्युकलाद्यंचबीजत्रयमिदंततः ॥ वन्ह्यारूढंयांत्यमितितदारूढंनमोन्तकम् ॥८६॥ तदारूढंतुजीवर्णंतदारूढंशिवंकुरु॥वाण्यादिमेनसंयुक्तंबिंदुभूपितमस्तकम्॥८७॥शिवंजीवयुतंकुर्याच्छतमन्युकलान्वितम् ॥ मस्तकेबिंदुसंयुक्तमोंकारंचतृतीयकम्॥ ॥ ८८ ॥ नतिर्हनुमतेचोक्त्वात्रैलोक्याक्रमणेतिच ॥ पराक्रमेतिश्रीरामभक्तममपरस्यच ॥ ८९ ॥ सर्वशत्रूंश्चतुर्वर्णसंभवानितिवैवद ॥ पुंस्त्रीनपुंसकान्भूतभविष्यद्वर्त्तमानानिति ॥ ९० ॥ दूरस्थांश्चसमीपस्थान्नानाइतिततोवद ॥ नामधेयांस्ततोनानाजातिसंकरयेतिच ॥ ९१ ॥ कलत्रपुत्रमित्रेतिभृत्यबंधुसुहृत्ततः ॥ समेतान्प्रभुश

क्तीतिसहितांश्चततः परम्॥९२॥ धनधान्यादिसंपत्तियुताञ्राजपदंततः ॥ पुत्रसेवकमंत्रींश्चसाचिवांश्चसखींस्ततः
॥९३॥ आत्यंतिकान्क्षणेनेतित्वरयैतद्दिनावधि ॥ नानोपायैरितिपदंततोमारययुग्मकम् ॥ ९४ ॥ शस्त्रैश्छेदय
युग्मंचअग्निनाज्वालयद्विधा ॥ दाहयेतिद्विधावाच्यमक्षेतिचततोवदेत् ॥ ९५ ॥ कुमारवत्पादतलाक्रमणेनशि
लातले ॥ आत्रोटयद्विधावाच्यंघातयेतितथाद्विधा ॥९६॥ बंधयद्वौभूतसंघैः सहभक्षययुग्मकम् ॥ क्रुद्धचेतसेति
नखैर्विदारयद्विधावद॥९७॥देशादस्मादितिततउच्चाटयद्विधावद॥पिशाचवद्भ्रंशयेतिद्विधाभ्रामयचद्विधा॥९८॥
भयातुरान्विसंज्ञांस्तान्सद्यःकुरुयुगंवद ॥ भस्मीभूतांस्तथावाच्यमुद्धूलयपुनर्वद ॥९९॥ भक्तजनवत्सलेतिसीता
शोकापहारक ॥ सर्वत्रमांतथैनंचरक्षयुग्मंचहात्रयम् ॥१००॥ क्रोधत्रयंघेत्रयंचकवचास्त्राग्निवल्लभा ॥ एकचत्वा
रिंशदक्षराणित्रीणिशतानिच॥१०१॥अथ मंत्रप्रकाशः॥ॐऐंश्रींह्रांह्रींह्रूंहस्फ्रेंख्फ्रेंहसौंहस्ख्फ्रेंहस्रौंनमोहनुमतेत्रै
लोक्याक्रमणपराक्रमश्रीरामभक्तममपरस्यचशत्रूंश्चतुर्वर्णसंभवान्पुंस्त्रीनपुंसकान्भूतभविष्यद्वर्त्तमानान्दूरस्था
न्समीपस्थान्नानानामधेयान्नानासंकरजातीयान्कलत्रपुत्रमित्रभृत्यबंधुसुहृत्समेतान्प्रभुशक्तिसहितान्धनधान्या
दिसंपत्तिसंयुताञ्राजपुत्रसेवकान्मंत्रिसचिवसखीनात्यंतिकान्क्षणेनत्वरयाएतद्दिनावधिनानोपायैर्मारय २ शस्त्रै
श्छेदय २ अग्निनाज्वालय २ दाहय २ अक्षकुमारवत्पादतलाक्रमणेन शिलातलेआत्रोटय २ घातय२ बंधय २
भूतसंघैः सहभक्षय २ क्रुद्धचेतसानखैर्विदारय २ देशादस्मादुच्चाटय २ पिशाचवद्भ्रंशय २ भ्रामय २ भयातुरा
न्विसंज्ञांस्तान्सद्यःकुरु२भस्मीभूतानुद्धूलय२भक्तजनवत्सलसीताशोकापहारकसर्वत्रमामेनंचरक्ष२हा३ हुं३घे३

हुंफट्स्वाहा ॥ अक्षराणि ॥ ३४१॥ वर्णानांगणनाज्ञेयादुष्टादिद्वेपिणस्तथा ॥ उच्चाटमृत्युपैशाचकरणीयोमनुर्ध्रु
वम् ॥ १०२ ॥ सप्रत्ययः समर्थश्चकलौभक्तेप्सितार्थकृत् ॥ श्रद्धयानियमेनाथसंस्मृतोजपितःखलु ॥ १०३ ॥
कार्यंसाधयतेनूनंसत्यंसत्यंनसंशयः॥हनुमद्वीरसामर्थ्याद्दुर्जयोमंत्रविद्भवेत्॥१०४॥इतिपंचममंत्रः॥ वेदमुधांत
तोवाणीलक्ष्मीबीजविभूपिता ॥ द्वितुर्यपट्कलाभिन्नाहृल्लेखासमुदीरिता ॥ १०५ ॥ बीजान्येतानिपड्विद्धिसर्वि
दूनिमहांतिच ॥ ततःशिवंजीवसंस्थायांत्यत्वह्निप्ररूढितम् ॥१०६॥ पंक्त्यांत्यस्वरसंयुक्तंबिंदुयुक्तंततःपरम् ॥
कांत्यफांतसमारूढंबृहद्भानुयुतंस्फुटम्॥१०७॥अर्काद्यस्वरसंयुक्तंबिंदुयुक्तंततःपरम् ॥ जीवांसंचंद्रयुक्तंगादिमे
नचतथायुतम् ॥ १०८ ॥ अस्त्रवर्णसमोपेतमधःपावकसंयुतम् ॥ ईशस्वरेणसंयुक्तंबिंदुमुत्कटमुत्तमम् ॥ १०९॥
शिवःशक्तिश्चवह्निश्चशतमन्युकलायुतम् ॥ बिंदुनाभूपितंपूर्वात्पूर्वोयंसमुदीरितः ॥ ११० ॥ शक्त्यारूढंशिवोज्ञे
योबिंदुभूपितमस्तकः ॥ चतुर्दशस्वरोपेतःपंचकूटमिदंक्रमात् ॥ १११ ॥ पंचकूटानिबीजानिह्येकादशक्रमेणतु ॥
पुनर्वेदास्तुमंत्रोक्तानतीहनुमतेततः ॥ ११२ ॥ प्रकटेतिततश्चोक्त्वापराक्रमपदंततः ॥ आक्रांतपदमेतत्तुदि
ग्मंडलपदंततः ॥ ११३ ॥ यशोवितानेतिपदंधवलीकृतवैपदम् ॥ जगत्त्रितयवज्रेतिदेहज्वलदितीरयेत् ॥ ११४ ॥
अग्निसूर्यकोटिसमप्रभस्तनुरुहंपदम् ॥ रुद्रावतारेतिततोलंकापुरीदहनायवै॥११५॥ दधिलंघनततश्छेत्तादशग्री
वशिरस्ततः ॥ कृतांतकसीताश्वासनततोवायुसुतेतिच ॥ ११६ ॥ अंजनीगर्भसंभूतश्रीरामेतिपदंततः ॥ लक्ष्मणा
नंदकरायेतिकपिसैन्यपदंवद ॥ ११७ ॥ प्राकारसुग्रीवपदंसख्यकरणवैततः ॥ वालिनिवर्हणपदंकारणेतिपदं

वद ॥११८॥ द्रोणपर्वतोत्पाटनपदंवदततः परम् ॥ अशोकवनचेत्युक्त्वाविदारणपदंततः ॥ ११९ ॥ अक्षकुमारके
तिचछेदनेतिततःपदम् ॥ वनरक्षाकरपदंसमूहइतिचोच्चर ॥१२०॥ विभंजनब्रह्मास्त्रेतिब्रह्मशक्तिपदंवद ॥ ग्रसने
तिलक्ष्मणेतिशक्तिभेदनिवारण ॥ १२१ ॥ शल्यविशल्यौषधीतिसमानयनवैततः ॥ बालोदितंभानुपदंमंडल
ग्रसनेतिच ॥१२२॥ मेघनादहोमपदं विध्वंसनपदंततः ॥ इंद्रजिद्वधकारणसीतारक्षककंपदम् ॥१२३॥ ततश्चरा
क्षससंघविदारणपदंततः ॥ कुंभकर्णादिकवधपरायणपदंवद॥१२४॥ श्रीरामभक्तितत्परसमुद्रेतिततःपदम्॥व्यो
मद्रुमलंघनेतिमहासामर्थ्यवैपदम् ॥१२५॥ महातेजःपुंजपदंविराजमानवैपदम्॥ स्वामिवचनेतिपदंसंपादितार्जु
नेतिच॥१२६॥संयुगसहायेतिचकुमारेतिपदंततः॥ब्रह्मचारिन्निरितिपदंगांभीरेतिपदंततः॥१२७॥ शब्दोदयदक्षिणा
शामार्तंडमेरुवैपदम्॥पर्वतपीडिकार्चनसकलेतिपदंततः ॥१२८॥ मंत्रागमाचार्यपदंममसर्वग्रहेतिच ॥ विनाशन
सर्वपदंज्वरोच्चाटनसर्ववै॥१२९॥विषविनाशनसर्वापत्तिनिवारणेतिच ॥ सर्वदुष्टादिचपदंनिबर्हणपदंततः॥१३०॥
सर्पव्याघ्रादिकभयनिवारणपदंततः ॥ सर्वशत्रूच्छेदनेतिपदंममपरस्यच ॥ १३१ ॥ ततस्त्रिभुवनंपुंस्त्रीनपुंसका
त्मकंपदम् ॥ ततःसर्वजीवजातंवशयेतिद्वयंवदेत् ॥ १३२ ॥ ममाशाकारकंचेतिसंपादयद्विधावदेत् ॥ ततो
नानानामधेयान्सर्वराज्ञःपदंवद ॥ १३३ ॥ ततःसपरिवारांश्चततश्चममसेवकान् ॥ कुरुयुग्मंसर्वपदंशस्त्रास्त्रेतिवि
षाणिच ॥ १३४ ॥ विध्वंसयद्विधोच्चार्यमायांपूर्ववदुच्चरेत् ॥ हात्रिधाचसमुच्चार्यतद्वदेहित्रिधोच्चरेत् ॥ १३५ ॥
पूर्वोदितंपंचकूटंवैपरीत्येनचोच्चरेत् ॥ सर्वशत्रून्हनद्वंद्वंपरबलानिततःपरम् ॥ १३६ ॥ परसैन्यानिक्षोभयद्विधा

ममपदंततः ॥ ततःसर्वकार्यजातंसाधयेतिद्विधावद ॥ १३७॥ सर्वदुष्टजनोच्चार्यमुखानिकीलयद्विधा ॥ घेत्रि
धोच्चार्यहाकारंत्रिधाक्रोधंत्रिधाततः ॥ १३८ ॥ त्रिधाचास्त्रंवह्निजायासंयुतोयंमनुःस्मृतः ॥ मंत्रेवर्णाःसमाख्या
ताद्विनवत्युत्तराणिच ॥ १३९ ॥ शतानिपंचसत्यंहिमंत्रविद्भिःपुरातनैः ॥ १४० ॥ अथमंत्रप्रकाशः ॥ ॐऐंश्रीं
ह्रांह्रींह्रूंह्स्फ्रेंख्फ्रेंह्स्रौंहस्ख्फ्रेंह्सौं ॐ नमोहनुमतेप्रकटपराक्रमआक्रांतदिङ्मंडल यशोवितानधवलीकृतज
गत्रितय वज्रदेह ज्वलदग्निसूर्यकोटिसमप्रभतनूरुहरुद्रावतार लंकापुरीदहन उदधिलंघन दशग्रीवशिरः
कृतांतक सीताश्वासन वायुसुत अंजनीगर्भसंभूत श्रीरामलक्ष्मणानंदकर कपिसैन्यप्राकारसुग्रीवसख्यका
रण वालिनिवर्हणकारणद्रोणपर्वतोत्पाटन अशोकवनविदारण अक्षकुमारकच्छेदन वनरक्षाकरसमूहविभं
जन ब्रह्मास्त्रब्रह्मशक्तिग्रसन लक्ष्मणशक्तिभेदनिवारण शल्यविशल्यौषधिसमानयन बालोदितभानुमंडलग्र
सन मेघनादहोमविध्वंसन इंद्रजिद्वधकारण सीतारक्षक राक्षससंघविदारण कुंभकर्णादिवधपरायण श्रीरा
मभक्तितत्पर समुद्रव्योमद्रुमलंघन महासामर्थ्य महातेजःपुंजविराजमान स्वामिवचनसंपादित अर्जुनसं
युगसहाय कुमारब्रह्मचारिन्गंभीरशब्दोदय दक्षिणाशामार्तण्ड मेरुपर्वतपीठिकार्चन सकलमंत्रागमाचार्य
ममसर्वग्रहविनाशन सर्वज्वरोच्चाटन सर्वविषविनाशन सर्वापत्तिनिवारण सर्वदुष्टादिनिबर्हण सर्पव्याघ्रादि
भयनिवारण सर्वशत्रूच्छेदन ममपरस्यचत्रिभुवनपुंस्त्रीनपुंसकात्मकसर्वजीवजातं वशय २ ममाशाकारकं
संपादय २ नानानामधेयान्सर्वराज्ञःसपरिवारान्ममसेवकान्कुरु २ सर्वशस्त्रास्त्रविषाणिविध्वंसय २ ह्रांह्रींह्रूं

हा ३ एहि ३ ह्सौं ह्स्ख्फ्रें ह्स्रौं ख्फ्रें ह्स्फ्रें सर्वशत्रून्हन २ परबलानिपरसैन्यानिक्षोभय २ ममसर्वकार्यजातं साधय २ सर्वदुष्टदुर्जनमुखानिकीलय २ घे ३ हा ३ हूं ३ फट् ३ स्वाहा॥अक्षराणि ५९२ ॥ मंत्रोयंवायुपुत्रस्य महाबलयशस्विनः ॥ एकादशाख्यरूपस्यरामदूतपदात्मनः ॥ १४१ ॥ सर्वकार्यार्थसंसिद्ध्यैगदितःसर्वसिद्धिदः ॥ रक्षाविधौप्रयोक्तव्यःक्षतेशस्त्रभयेतथा ॥ १४२ ॥ वश्येचविजयेवादेस्तंभेसर्वत्रनोदितः ॥ दुष्टग्रहेचसंग्रामेव्याघ्रचौरभयेद्युते ॥ १४३ ॥ विषबंधविमोक्षेचक्रोधस्तंभेविशेषतः ॥ रिपुदुर्जनदुष्टानांनिग्रहोच्चाटनेतथा॥ ॥ १४४ ॥ प्रयोक्तव्योविशेषेणसत्वरंफलतेध्रुवम् ॥ किमत्रबहुनोक्तेनवर्णितेनपुनःपुनः ॥ १४५ ॥ यदीच्छेत्प्रत्ययंद्रष्टुंप्रयोक्तव्योयमद्भुतः ॥ कार्यःसंमोहनेसत्यंसत्यंसत्यंनसंशयः ॥ १४६ ॥ इति षष्ठोमंत्रः ॥ द्वादशाक्षरविद्यायाविकृतिःकथ्यतेधुना ॥ शिवबिंदुस्वराक्रांतंबिंदुमत्कुरुचादिमम् ॥ १४७ ॥ पूर्वोदितं पंचकूटंबीजपट्कंततोवदेत् ॥ हनुमांश्चचतुर्थ्यंतः संयोज्योहपुरःसरम् ॥ १४८ ॥ द्वादशार्णामहाविद्यायस्य कस्यापिमावद ॥ रहस्यंतेमयाख्यातंवाल्मीकिमुनिनोदितम् ॥ १४९ ॥ ऋष्यादिकंपूर्वमेवसर्वंचविनिवेदितम् ॥ एकमेवहिसर्वेषांसत्यंसत्यंचनान्यथा ॥ १५० ॥ विशेषोत्रषडंगानांपट्कूटैःकुरुतेनच ॥ कराङ्गुलीषुविन्यासःकार्यकारीशुभोमतः ॥ १५१ ॥ एवमंगेषुविन्यस्यमंत्रवर्णास्ततोन्यसेत् ॥ मूर्ध्निभालेदृशोरास्येगलेदोष्णोर्हृदंबुजे ॥ १५२ ॥ कुक्षौनाभौध्वजेजानुद्वयेपदद्वयेन्यसेत् ॥ मंत्रपदैरष्टभिश्चदेहांगेष्वेपुसंस्मृतः ॥१५३॥ मूर्ध्निभालेतथाकंठेनाभावूर्वोस्तुजंघयोः ॥ पादयोश्चैवकर्त्तव्योध्यानंपूर्वोदितंकुरु ॥ १५४ ॥ मुद्राःपूर्वोदिताः

कार्याःसर्वमेवहिपूर्वजम् ॥ वानरीचास्यमुद्रास्यात्तांशृणुष्ववदाम्यहम् ॥ १५५ ॥ करौसंपुटितौकृत्वासमा
श्लिष्टांगुलीस्फुटम् ॥ अंगुष्ठौद्वौप्रलोपित्वाअंतर्गर्भस्थितौकुरु ॥ १५६ ॥ हृदोपरिस्थितौतौतुमुकुलाकृतिसं
युतौ ॥ स्वामिपादेस्थितादृष्टिर्मुद्रोपर्यथवैस्थिता ॥ १५७ ॥ ज्ञेयेयंवानरीमुद्राचैतन्मंत्रंजपेद्धुवम् ॥
तर्जन्यग्रेंगुष्ठमूलेकृत्वान्यांगुलयोरपि ॥ १५८ ॥ स्यात्तत्पुटितयोःपाण्योर्मुद्रावानरसंज्ञिका ॥ इत्थंसर्वनिग
दितंहनुमन्मंत्रगह्वरम् ॥ १५९ ॥ श्रद्धयापरयाभक्त्यासेवितोऽखिलसिद्धिदः ॥ पुरश्चर्यास्यमंत्रस्यप्रोक्ताचा
ष्टसहस्रिका ॥ १६० ॥ भौमस्यवासरेपूजाकार्याहनुमतोध्रुवम् ॥ प्रियंगवोव्रीहयश्चदध्याज्यक्षीरसंयुतैः
॥ १६१ ॥ कदलीमातुलिंगाम्रफलैर्नानाविधैर्हुनेत् ॥ दशांशेनततोब्रह्मचारिणोभोजयेद्धुवम् ॥ १६२ ॥ द्वावि
शतिश्चसंख्याकान्विप्रान्संभोजयेदथ ॥ अष्टोत्तरशतेनापिमंत्रयेद्भस्मवार्यपि ॥ १६३ ॥ ग्रहदोषेपिनीरेण
मार्जयेत्पावयेत्तनुम् ॥ हनुमत्प्रतिमाकार्याततोभूतांकुशस्यच॥१६४॥ पूर्वोत्तरगतेनैवमूलेनांगुष्ठमात्रतः ॥ सर्वा
वयवसंपन्नाचित्तप्राशस्त्यकारिणी ॥ १६५ ॥ प्राणसंस्थापनंतस्यांकृत्वावैमारुतेर्ध्रुवम् ॥ सिंदूरचर्चितांकृ
त्वातथाभ्यर्च्योपचारकैः ॥ १६६॥ मंत्रितानेनमंत्रेणततस्तान्द्वारदेशके ॥ खनित्वानिक्षिपेद्भूमौग्रहस्याभिमुखं
निशि ॥ १६७ ॥ भूतजाविषजाबाधाग्रहजाकूटमंत्रजाः ॥ चेटकादिभवावापिव्याधिज्वराभिघातजा ॥ १६८ ॥
चौराग्निबाधाचतथानभवेत्तद्गृहेऽरिजा ॥ तद्गृहंधनधान्यादिसर्वसमृद्धिसंयुतम् ॥ १६९ ॥ रात्रौरात्रौजपेन्मं
त्रंपट्शतंत्रिशतंतथा ॥ दशवासरपर्यंतंराजशत्रुभयंहरेत् ॥ १७० ॥ अभिचारज्वरेभूतज्वरेचभस्मनातनुम् ॥

मंत्रितेनांभसावाथताडयेद्रोपपूर्वकम् ॥ १७१ ॥ त्रिदिनाज्ज्वरमुक्तिःस्यान्नात्रकार्याविचारणा ॥ औषधेच
रसेमंत्रेदशवारंजपेद्बुधः ॥ १७२ ॥ तेनाभिमंत्रितंदत्तंसर्वसफलतांव्रजेत् ॥ शस्त्रधाराग्रसंस्तंभेशतवारंजपे
द्बुधः ॥ १७३ ॥ तेनाभिमंत्रितंतोयंभस्मतस्यप्रदापयेत् ॥ भस्मनाचर्चितंदेहंपयश्चप्राशितंध्रुवम् ॥ १७४ ॥
शस्त्रस्तंभोभवेत्तस्यसत्यंसत्यंनसंशयः ॥ शस्त्रक्षतेपुलूतासुरक्तग्रंथ्यादिसंभवे ॥ १७५ ॥ भस्मनापयसातत्र
त्रिवारंचाभिमंत्रितम् ॥ नव्यथानचपूयंस्यात्संशोपयतितद्व्रणम् ॥ १७६ ॥ सप्तवासरपर्यंतंविद्वेषोच्चाटनेजयः ॥
सूर्यास्तंचसमारभ्यकारयेत्सुबुधोत्तमः ॥ १७७ ॥ अरुणोदयपर्यंतंभस्मकीलाभिमंत्रितम् ॥ तद्वारेपूरितेगे
हेरोपितेवापितत्क्षणात् ॥ १७८ ॥ ततस्तस्योच्चाटनंस्यात्परिवारयुतस्यच ॥ पुत्रादिभिःसर्वलोकैःपौरैर्जा
नपदैःसह ॥ १७९ ॥ विद्वेष्यतेप्राणघातंसत्यंसत्यंवचोमम ॥ भस्मांबुमंत्रितंयस्यदेहंचंदनमिश्रितम् ॥१८०॥
चर्चितंपयःखाद्यादियोजितंयस्यदापितम् ॥ सवश्योजायतेनूनंप्राणैरपिधनैरपि ॥ १८१ ॥ दासतांयातिदे
वोपिमनुष्याणांचकाकथा ॥ क्रूरसत्वानिचान्यानिवशयेदमुनाखलु ॥ १८२ ॥ प्रकारेणमहावीरज्वलनःशां
ततामियात् ॥ दिव्यस्थानेप्रकर्त्तव्योनिःशक्तैरहुताशनैः ॥ १८३ ॥ भवत्येवनसंदेहोलोहतैलेपुसंस्थितः ॥
मारणेक्रुद्धचित्तेनश्मशानेनिशिभूतले ॥ १८४ ॥ रिपोःप्रतिकृतिंकुलाभस्मनाप्यथवामृदा ॥ पूर्ववत्प्राणा
न्संस्थाप्यकुलायत्नेनमंत्रवित् ॥ १८५ ॥ प्रतिमाहृदितन्नामलेख्यंचैवप्रयत्नतः ॥ शस्त्रेणभेदनंकुर्यान्मंत्रमुच्चार
यन्क्रुधा ॥ १८६ ॥ छिंधिभिंधिमारयेतिनामांतेचसमुच्चरेत् ॥ एवंसप्तदिनंकुर्वन्दंतोष्ठौचनिपीडयवै ॥ १८७॥

कृत्वाहोमंविधानेनराजिकालवणैः सह ॥ उन्मत्तफलपुष्पैश्चश्लेष्मातकविभीतकैः ॥ १८८ ॥ विपरोमनखैश्चै
वकाककौशिकगृध्रकैः ॥ पक्षैःकटुकतैलाक्तैरर्द्धचंद्राकृतौहुनेत् ॥ १८९ ॥ स्थंडिलेमुक्तकेशस्तुशौकर्यामुद्र
यावुधः ॥ दक्षिणाशामुखोभूत्वापल्लवोच्चारणंकुरु ॥ १९० ॥ त्रिशतावृत्तिभेदेनसप्तवासरमध्यतः ॥ शत्रुर्मृ
त्युमवाप्नोतिरुद्रेणापिसुरक्षितः ॥ १९१ ॥ दिनत्रयंरात्रिभागेश्मशानेषट्शतंजपेत् ॥ प्रेतमुत्थापयेत्सत्यंवे
तालःकिंकरोभवेत् ॥ १९२ ॥ शुभाशुभंचवदतिमंत्रिणासहनिश्चयात् ॥ भार्यांददातिसत्यांचकारयंतिकरो
तिच ॥ १९३ ॥ भस्मांबुमंत्रितंरात्रौसहस्रावृत्तिकंखलु ॥ दिनत्रयंततश्चैवतत्क्षिपेत्प्रतिमासुच ॥ १९४ ॥
यासुकासुचस्थूलासुलघुष्वपिविशेषतः ॥ मंत्रप्रभावाच्चलनंभवत्येवनसंशयः ॥ १९५ ॥ मंत्रेणानेनसिद्धेनय
दसाध्यंचसाधयेत् ॥ वश्येभयेविवादेचशस्त्रेसंग्रामसंकटे ॥ १९६ ॥ द्यूतेदिव्येस्तंभनेचविद्वेषेमारणेतथा ॥
मृतकस्थापनेचैवप्रतिमाचालनेतथा ॥ १९७ ॥ विषव्याधेर्ज्वरेभूतग्रहेकृत्यादिमोचने ॥ क्षतेग्रंथौमहारण्ये
दुर्गेव्याघ्रेचदंतिनि ॥१९८॥ क्रूरसत्वेषुसर्वेषुशस्त्रबंधेविमोक्षणे ॥ बंधमोक्षेमारणेचमोहशांतौनियोजयेत्॥१९९॥
मंत्रमेनंहनुमतोनानाकार्यप्रसाधनम् ॥ बंधमुक्तौजपेन्मंत्रंरात्रौरात्रौचनिर्भयः ॥ २०० ॥ लिखित्वाप्रतिमांभूमौ
मारुतेरसकृन्नरः ॥ स्वनामाक्षरसंयंतुद्वितीयांतंसमालिखेत्॥२०१॥मंत्रस्यांतेतथामंत्रंविमोचयविमोचय॥मार्ज
येद्वामहस्तेनपुनस्तथैवलेखयेत् ॥२०२॥ एवमष्टाधिकशतंलेखयेन्मार्जयेन्नरः ॥ एवंकुर्यान्निबद्धोयःश्रृंखलाभिर्दृ
ढंनरः ॥२०३॥ महापराधसंयुक्तःप्राणहानर्थकारकः ॥ ससप्तदिनमध्येतुबंधनान्मुच्यतेध्रुवम् ॥२०४॥ हनुमान्व

शयित्वाशुस्वयंतंमोचयेन्नरः॥नतंदंडयितुंशक्ताराजानोरिपवोजनाः ॥२०५॥ हवनान्यपिसंत्यत्रदशांशेननिबोध
य॥स्तंभनेचार्द्रयवकान्यग्रोधस्यफलानिच ॥ २०६ ॥ हरिद्राचतथाप्रोक्तातिलकंशल्लकीफलम् ॥ शाल्मलीकुसु
मान्याहुर्मधुत्रययुतानिच ॥ २०७ ॥ उच्चाटनेनिगदिताःश्लेष्मातकविभीतकाः ॥ वश्यार्थसर्पपाद्राक्षामधूका
निचगुग्गुलुः॥२०८॥विद्वेषेकरवीराणांपत्राणिसमिधस्तथा ॥ श्लेष्मातकविभीतानांसमिधोजीरकंतथा॥२०९॥
मरीचंरामठंचैवकटुतैलसमन्वितम् ॥ ज्वरेतापेचशूलेचगंडमालाभगंदरे ॥ २१० ॥ दूर्वागुडूचीखंडानिसा
ज्यक्षीरदधीनिच ॥ शूलएरंडसमिधःकुबेराक्षस्तथैवच ॥ २११ ॥ निर्गुंडीसमिधश्चैवतिलतैलसमन्विताः ॥
लक्ष्मीप्राप्तौसरोजानिबिल्वपत्राणिचैवहि ॥ २१२ ॥ समिधस्तस्यहोतव्यामधुत्रयसमन्विताः ॥ पनसाद्यंना
लिकेरमिक्षवःकदलीफलम् ॥ २१३ ॥ सर्वसंतोषकृद्धोमोमधुत्रयसमन्वितः ॥ सौभाग्यसुखसंपत्तिसाधकं
हवनंशृणु ॥ २१४ ॥ कर्पूरकेसरंनाभिचंदनंरोचनंतथा ॥ तजपत्रंवीरणंचलवंगैलागुरुस्तथा ॥ २१५ ॥ मांसी
वराजातिपत्रंतत्फलंलोहवाणकम् ॥ साज्यान्येतानिसर्वत्रविज्ञेयानिमनीषिभिः ॥ २१६ ॥ पुष्पैःसुगंधिभिर्वापि
प्राप्यतेचोत्तमःसदा ॥ द्रोहेचमारणेज्ञेयंविपंचराजिकातथा ॥२१७॥ काककौशिकगृध्राणांपक्षाश्चविजयातथा॥
गृहधूमकराश्चैवलवणंकटुतैलकम्॥२१८॥पादपांशुंतथाराजिलवणंकर्पणेस्मृतम् ॥ उन्मत्तफलपुष्पाणिसमिधो
मोहनेस्मृताः॥२१९॥ धान्यैःसंप्राप्यतेधान्यमन्नैरन्नसमृद्धयः ॥ तैलाज्यक्षीरदधिभिर्महीगजसमृद्धयः ॥२२०॥
एवंनानाप्रयोगांश्चसाधयेन्मंत्रवित्तमः ॥ पुरश्चर्याजपेनैवहनूमंतंचसेवयेत् ॥ २२१ ॥ इतिश्रीहरिकृष्णविनिर्मिते

बृ० ध० उपासनास्तवकेहनुमदुपासनाध्यायेहनुमद्गह्वरनिरूपणंनामप्रकरणंद्वादशम् ॥१२॥ श्लोकाः ॥७०६॥
॥ अथहनुमत्पटलम् ॥ दृष्ट्वातंत्राण्यनेकानिपुराणानिविशेषतः ॥ हनुमत्पटलंवच्मिनानाभेदसमन्वितम् ॥ १ ॥
तत्रमंत्रमहोदधौ ॥ अथोच्यंतेहनुमतोमंत्राःसर्वेष्टसिद्धये ॥ इंद्रस्वरेंदुसंयुक्तोवराहोहसफाग्नयः ॥ २ ॥ झिंटी
शबिंदुसंयुक्ताद्वितीयंबीजमीरितम् ॥ गदीयांताग्निरुद्रेंदुसंयुतःस्यात्तृतीयकम् ॥ ३ ॥ हसरामनुचंद्राढ्याश्चतु
र्थहसखाफराः ॥ शिवेंद्राढ्याः पंचमंस्याद्धसौमन्विंदुगौपरम् ॥ ४ ॥ ङेयुतोहनुमान्हार्दमंत्रोयंद्वादशा
क्षरः ॥ रामचंद्रोमुनिश्चास्यजगतीछंदईरितम् ॥ ५ ॥ हनुमान्देवताबीजंषष्ठंशक्तिर्द्वितीयकम् ॥ षड्बीजैरंग
षट्कंस्यान्मूर्ध्निभालेदृशोर्मुखे ॥ ६ ॥ कंठेचबाहुद्वितयेहृदिकुक्षौचनाभितः ॥ लिंगेजानुद्वयेपादद्वयेवर्णान्क्रमा
न्न्यसेत् ॥ ७ ॥ षड्बीजानिपदद्वंद्वंद्वेमूर्ध्निभालेमुखेहृदि ॥ नाभावूर्वोर्जंघयोश्चपादयोर्विन्यसेत्क्रमात् ॥८॥ बाला
र्कायुततेजसंत्रिभुवनप्रक्षोभकंसुंदरंसुग्रीवादिसमस्तवानरगणैःसंसेव्यपादाम्बुजम् ॥ नादेनैवसमस्तराक्षस
गणान्संत्रासयंतंप्रभुंश्रीमद्रामपदांबुजस्मृतिरतंध्यायामिवातात्मजम् ॥ ९ ॥ एवंध्यात्वाजपेदर्कसहस्रंजि
तमानसः ॥ दशांशंजुहुयाद्व्रीहीन्पयोदध्याज्यसंयुतान् ॥ १० ॥ विमलादियुतेपीठेपूजाकार्याहनूमतः ॥ केस
रेष्वंगपूजास्याद्दलेष्वन्यांस्तदाह्वयान् ॥ ११ ॥ रामभक्तोमहातेजाःकपिराजोमहाबलः ॥ द्रोणाद्रिहारकोमेरु
पीठिकार्चनकारकः ॥ १२ ॥ दक्षिणाशाभास्करश्चसर्वविघ्ननिवारकः ॥ एवंनामानिसंपूज्यदलाग्रेपुचवान
रान् ॥ १३ ॥ सुग्रीवमंगदंनीलंजांबवंतंनलंतथा ॥ सुषेणंद्विविदंमैंदंपूजयेद्दिक्पतीनपि ॥ १४ ॥ एवंसिद्धे

मनौमंत्रीस्वपरेष्टंप्रसाधयेत् ॥ कदलीबीजपूराम्रफलैर्हुत्वासहस्रकम् ॥ १५ ॥ द्वाविंशतिंब्रह्मचारिविप्रान्सं
भोजयेदथ ॥ एवंकृतेमहाभूतविषचौराद्युपद्रवाः ॥ १६ ॥ नश्यंतिक्षणमात्रेणविद्वेषिग्रहदानवाः ॥ अष्टोत्तर
शतंवारिमंत्रितंविषनाशनम् ॥ १७ ॥ रात्रौनवशतंमंत्रंजपेद्दशादिनावधि ॥ योनरस्तस्यनश्यंतिराजशत्रू
त्थभीतयः ॥ १८ ॥ अभिचारोत्थभूतोत्थज्वरेतन्मंत्रितैर्जलैः ॥ भस्मभिःसलिलैर्वापिताडयेज्ज्वरिणः
क्रुधा ॥ १९ ॥ दिनत्रयाज्ज्वरान्मुक्तःससुखंलभतेनरः ॥ तन्मंत्रितौषधंजग्ध्वानीरोगोजायतेध्रुवम् ॥ २० ॥
तन्मंत्रितंपयःपीत्वायोद्धुंगच्छेन्मनुंजपन् ॥ तज्जप्तभस्मलिप्तांगःशस्त्रसंघैर्नबाध्यते ॥ २१ ॥ शस्त्रक्षतंव्रणःशोफो
लूतास्फोटोपिभस्मना ॥ त्रिमंत्रितेनसंस्पृष्टाःशुष्यंत्यचिरतोनृणाम् ॥ २२ ॥ सूर्य्यास्तमयमारभ्यजपेत्सू
र्योदयावधि ॥ कीलकंभस्मचादायसप्ताहावधिसंयतः ॥ २३ ॥ निखनेद्भस्मकीलौतौविद्विषांद्वार्य्यलक्षितः ॥
विद्वेषंमिथआपन्नाःपलायंतेऽरयोऽचिरात् ॥ २४ ॥ अभिमंत्रितभस्मांबुदेहचंदनसंयुतम् ॥ खाद्याद्वियोजितं
यस्मैदीयतेसचदासवत् ॥ २५ ॥ क्रूराश्चजंतवोनेनभवंतिविधिनावशाः ॥ ईशानदिक्स्थमूलेनभूतांकुशतरोः
शुभाम् ॥ २६ ॥ अङ्गुष्ठमात्रांप्रतिमांप्रविधायहनूमतः ॥ प्राणसंस्थापनंकृत्वासिंदूरैःपरिपूज्यच ॥ २७ ॥
गृहस्याभिमुखद्वारेनिखनेन्मंत्रमुच्चरन् ॥ भूताभिचारचौराग्निविषरोगनृपोद्भवाः ॥ २८ ॥ संजायंतेगृहेतस्मि
न्नकदाचिदुपद्रवाः ॥ प्रत्यहंधनपुत्राद्यैरेधतेतद्गृहंचिरम् ॥ २९ ॥ निशिश्मशानभूमिस्थोभस्मनामृत्स्नया
पिवा ॥ शत्रोःप्रतिकृतिंकृत्वाहृदिनामसमालिखेत् ॥ ३० ॥ कृतप्राणप्रतिष्ठांतांभिंद्याच्छस्त्रैर्मनुंजपन् ॥ मंत्रां

तेप्रोच्चरेच्छत्रोर्नामछिंधिचभिंधिच ॥ ३१ ॥ मारयेतिचतस्यांतिदंतैरोष्ठंनिपीड्यच ॥ पाण्योस्तलेप्रपीड्याथत्य क्त्वातांसदनंव्रजेत् ॥ ३२ ॥ एवंसप्तदिनंकुर्वन्हन्याच्छत्रूञ्छिवावितान् ॥ अर्द्धचंद्राकृतौकुंडेस्थंडिलेचाहुतं चरेत् ॥ ३३ ॥ मुक्तकेशःश्मशानस्थोलवणैराजिकायुतैः ॥ उन्मत्तफलपुष्पैश्चनखरोमविषैरपि ॥ ३४ ॥ काक कौशिकगृध्राणांपक्षैःश्लेष्मातकाक्षजैः ॥ समिद्भिरैश्चत्रिशतंदक्षिणाशामुखोनिशि ॥ ३५ ॥ सप्तघस्रानिदंकुर्व न्मारयेद्रिपुमुद्धतम् ॥ शतपट्टकंजपेद्रात्रौश्मशानेदिवसत्रयम् ॥३६॥ ततोवेतालउत्थायवदेद्वाविशुभाशुभम् ॥ उदितंकुरुतेसर्वंकिंकरीभूयमांत्रिणः ॥ ३७ ॥ हनुमत्प्रतिमांभूमौविलिखेत्तत्पुरोमनून् ॥ साध्यनामद्वितीयांतं विमोचयविमोचय ॥ ३८ ॥ तत्सर्वमार्जयेद्वामहस्तेनाथपुनर्लिखेत् ॥ एवमष्टोत्तरशतं लिखित्वामार्जयेत्पुनः॥ ॥ ३९ ॥ एवंकृतेपराधीनोमुच्यतेनिगडात्क्षणात् ॥ एवंविद्वेषणादीनिकुर्य्यात्तत्पल्लवंलिखन् ॥ ४० ॥ वश्यार्थे सर्षपैर्होमोविद्वेषेकरवीरजैः॥ कुसुमैरिद्धकाष्ठैर्वाजीरकैर्मरिचैरपि ॥४१॥ ज्वरेदूर्वागुडूचीभिर्दध्नाक्षीरेणवाघृतैः॥ शूलेहोमःकुबेराक्षैरेरंडसमिधातथा ॥ ४२ ॥ तैलाक्ताभिश्चनिर्गुंडीसमिद्भिर्वाप्रयत्नतः ॥ सौभाग्येचंदनेश्चंद्रेरो चनैलालवंगकैः ॥ ४३ ॥ सुगंधपुष्पैर्वस्त्राप्त्यैतत्तद्धान्यैस्तदाप्तये ॥ तत्पादरजसाराजीलवणाक्तेनमृत्यवे ॥ ४४ ॥ किंबहूक्तैर्विषव्याधौशांतौमोहेचमारणे ॥ विवादेस्तंभनेद्यूतेभूतप्रेतादिसंकटे ॥ ४५ ॥ वश्येयुद्धेनृपद्वारेसमरे चौरसंकटे ॥ मंत्रोयंसाधितोदद्यादिष्टसिद्धिंध्रुवंनृणाम् ॥ ४६ ॥ वक्ष्येहनुमतोयंत्रंसर्वसिद्धिप्रदायकम् ॥ वल यत्रितयंकृत्वापुच्छाकारसमन्वितम् ॥४७॥ साध्यनामलिखेन्मध्येपाशबीजप्रवेष्टितम् ॥ उपर्य्यष्टदलंकृत्वाव

र्मपत्रेपुसंलिखेत् ॥ ४८ ॥ वलयंबहिरालिख्यतद्बहिश्चतुरस्रकम् ॥ चतुरस्रस्यरेखाग्रेत्रिशूलानिसमालिखेत् ॥
॥ ४९ ॥ भूपुरस्याष्टवज्रेपुहसौबीजंलिखेत्ततः ॥ कोणेष्वंकुशमालिख्यमालामंत्रेणवेष्टयेत् ॥ ५० ॥ तत्सर्वंवे
ष्टयेद्यंत्रंवलयत्रितयेनच ॥ वस्त्रेशिलायांफलकेताम्रपात्रेथकुड्यके ॥५१॥ भूर्जेवाताडपत्रेवारोचनानाभिकुंकुमैः॥
यंत्रमेतत्समालिख्यत्यक्ताशोब्रह्मचर्यवान् ॥ ५२ ॥ कपेःप्राणान्प्रतिष्ठाप्यपूजयेत्तंयथाविधि ॥ सर्वदुःखनिवृ
त्त्यैतद्यंत्रमात्मनिधारयेत् ॥ ५३ ॥ ज्वरमार्य्यभिचारघ्नंसर्वोपद्रवशांतिकृत् ॥ योषितामपिवालानांधृतंजनम
नोहरम् ॥ ५४ ॥ मालामंत्रमथोवक्ष्येप्रणवोवाग्घरिप्रिया ॥ दीर्घत्रयान्वितामायापूर्वोक्तंकूटपंचकम् ॥ ५५ ॥
तारोनमोहनुमतेप्रकटांतेपराक्रम ॥ आक्रांतदिङ्मंडलतोयशोवीतिचतानच ॥ ५६ ॥ धवलीकृतवर्णांतेजगत्त्रि
तयवज्रच ॥ देहज्वलदग्निसूर्यकोट्यंतेतुसमप्रभ ॥ ५७ ॥ तनूरुहपदंरुद्रावतारपदमीरयेत् ॥ लंकापुरीदहांते
नोदधिलंघनवर्णकाः ॥ ५८ ॥ दशग्रीवशिरःपश्चात्कृतांतकपदंततः ॥ सीताश्वासनवाय्वंतेसुतशब्दमुदीरयेत् ॥
॥ ५९ ॥ अंजनीगर्भसंभूतश्रीरामांतेतुलक्ष्मणा ॥ नंदकांतेरकपिचसैन्यप्राकारवर्णकाः ॥ ६० ॥ सुग्रीवसख्य
कावर्णारणवालिनिबर्हण ॥ कारणद्रोणपर्वांतेतोत्पाटनपदंवदेत् ॥ ६१ ॥ अशोकवनवीत्यंतेदारणाक्षकुमारक ॥
छेदनांतेवनपदंरक्षाकरसमूहच ॥६२॥ विभंजनांतेब्रह्मास्त्रब्रह्मशक्तिग्रसेतिन ॥ लक्ष्मणांतेशक्तिभेदनिवारणपदं
पुनः ॥६३॥ विशल्यौपधिवर्णांतेसमानयनवर्णकाः ॥ बालोदितांतेभान्वंतेमंडलग्रसनेतिच ॥६४॥ मेघनादेतिहो
मांतेविध्वंसनपदंवदेत् ॥ इंद्रजिद्वधकारांतेणसीतारक्षकेतिच ॥६५॥ राक्षसीसंघवर्णांतेविदारणचकुंभच॥ कर्णा

दिवधशब्दांतेपरायणपदंवदेत् ॥ ६६ ॥ श्रीरामभक्तिशब्दांतेतत्परेतिसमुद्रच ॥ व्योमद्रुमलंघनेतिमहासामर्थ्य
मेतिच ॥६७॥ हातेजःपुंजवीत्यंतेराजमानपदंपुनः ॥ स्वामिवचनसंपादितार्जुनांतेचसंयुग ॥ ६८ ॥ सहायांते
कुमारेतिब्रह्मचारिन्पदंवदेत् ॥ गंभीरशब्दोदयचदक्षिणाशापदंपुनः ॥ ६९ ॥ मार्तंडमेरुशब्दांतेपर्वतेतिपदंवदेत् ॥
पीठिकार्चनशब्दांतेसकलेतिपदंपुनः ॥ ७० ॥ मंत्रागमाचार्यममसर्वग्रहविनाशन ॥ सर्वज्वरोच्चाटनेतिसर्वविष
विनाशन ॥ ७१ ॥ सर्वापत्तिनिवारणसर्वदुष्टेतिसंपठेत् ॥ निबर्हणपदंसर्पव्याघ्रादिभयतत्परम् ॥ ७२ ॥ निवा
रणसर्वशत्रूच्छेदनेतिपदंमम ॥ परस्यचत्रिभुवनंपुंस्त्रीनपुंसकात्मकम् ॥ ७३ ॥ सर्वजीवपदंपश्चाज्जातंवशय
युग्मकम् ॥ ममाज्ञाकारकंपश्चात्संपादयपदद्वयम् ॥ ७४ ॥ नानानामपदंधेयान्सर्वान्राज्ञःससंपठेत् ॥ परि
वारान्ममेत्यंतेसेवकान्कुरुयुग्मकम् ॥ ७५ ॥ सर्वशस्त्रास्त्रवीत्यंतेपाणिविध्वंसयद्वयम् ॥ मायादीर्घत्रयोपेता
हात्रयंचेहियुग्मकम्॥७६॥ विलोमपंचकूटानिसर्वशत्रून्हनद्वयम्॥परदांतेलानिपरसैन्यानिक्षोभयद्वयम्॥७७॥
ममसर्वकार्यजातंसाधयद्वितयंततः ॥ सर्वदुष्टदुर्जनांतेमुखानिकीलयद्वयम् ॥ ७८ ॥ घेत्रयंहात्रयंवर्मंत्रित
यंफट्त्रयंततः ॥ वन्हिप्रियांतोमंत्रोयंमालासंज्ञोऽखिलेष्टदः ॥ ७९ ॥ अष्टाशीत्युत्तराःपंचशतवर्णामनोःस्मृताः ॥
महोपद्रवसंपत्तेःस्मृतोयंदुःखनाशनः ॥ ८० ॥ द्वादशार्णेत्विमान्वर्णान्पट्त्यक्त्वैकंतथादिमम् ॥ पंचकूटात्मको
मंत्रोनिखिलाभीष्टसाधकः ॥ ८१ ॥ मुनीरामोथगायत्रीछंदोदेवः कपीश्वरः ॥ पंचबीजैःसमस्तेनषडंगंमुनिभिः
स्मृतम् ॥ ८२ ॥ रामदूतोलक्ष्मणांतेप्राणदातांजनीसुतः ॥ सीताशोकविनाशोथलंकाप्रासादभंजनः ॥ ८३ ॥

हनुमदाद्याःपंचैतेबीजाद्याङेसमान्विताः ॥ षडंगमंत्राःसंदिष्टाध्यानपूजादिपूर्ववत् ॥ ८४ ॥ तारोवाक्कमलामाया
दीर्घत्रयसमान्विताः ॥ पंचकूटानिमंत्रोयंरुद्रार्णेऽभीष्टसिद्धिदः ॥ ८५ ॥ अर्चनापूर्ववच्चास्यपरोमंत्रोभिधीयते ॥
हृदयंभगवान्ङेंतआंजनेयमहाबलौ ॥ ८६ ॥ तद्वद्वह्निप्रियांतोयंमनुरष्टादशाक्षरः ॥ मुनिरीश्वरएवास्यानुष्टुप्छं
दःसमीरितम् ॥ ८७ ॥ हनुमान्देवताबीजंहुंशक्तिर्वह्निवल्लभा ॥ आंजनेयोरुद्रमूर्तिर्वायुपुत्रस्तथैवच ॥ ८८ ॥
अग्निगर्भोरामदूतोब्रह्मास्त्रविनिवारणः ॥ एतैर्ङेंतैःषडंगानिकृत्वाध्यायेत्कपीश्वरम् ॥ ८९ ॥ दहनतप्तसुवर्णसम
प्रभंभयहरंहृदयेविहितांजलिम् ॥ श्रवणकुंडलशोभिमुखांबुजंनमतवानरराजमिहाद्भुतम् ॥ ९० ॥ अयुतंप्रजपे
न्मंत्रंदशांशंजुहुयात्तिलैः ॥ वैष्णवेपूजयेत्पीठेपूर्ववत्कपिनायकम् ॥ ९१ ॥ जितेंद्रियोनक्तभोजीप्रत्यहंसाष्टकं
शतम् ॥ जपित्वाक्षुद्ररोगेभ्योमुच्यतेदिवसत्रयात् ॥९२॥ भूतप्रेतपिशाचादिनाशायैवंसमाचरेत् ॥ महारोगनि
वृत्त्यैतुसहस्रंप्रत्यहंजपेत् ॥९३॥ यताशनोयुतंनित्यंजपन्ध्यायन्कपीश्वरम् ॥ राक्षसौघंविनिघ्नंतमचिराज्जयति
ध्रुवम् ॥ ९४ ॥ सुग्रीवेणसमंरामंसंदधानंस्मरन्कपिम् ॥ प्रजप्यायुतमेतस्यसंधिंकुर्याद्विरुद्धयोः ॥ ९५ ॥ लंकां
दहंतंतंध्यायन्नयुतंप्रजपेन्मनुम् ॥ शत्रूणांप्रदहेद्ग्रामानचिरादेवसाधकः ॥९६॥ प्रयाणसमयेध्यायन्हनूमंतंमनुं
जपन् ॥ योयातिसोचिरात्स्वेष्टंसाधयित्वागृहंव्रजेत् ॥ ९७ ॥ यःकपीशंसदागेहेपूजयेज्जपतत्परः ॥ आयुर्ल
क्ष्म्यौप्रवर्द्धेतेतस्यनश्यंत्युपद्रवाः ॥ ९८ ॥ शार्दूलतस्करादिभ्योरक्षेन्मनुरयंस्मृतः ॥ प्रस्वापकालेचौरेभ्योदुष्ट
स्वप्नादपिध्रुवम् ॥ ९९ ॥ अपस्मीहादिरोगघ्नोहनुमन्मंत्रकंब्रुवे ॥ पवनद्वितयंसद्योजातयुक्तंहनूपदम् ॥ १०० ॥

महाकालशशांकाढ्यः कामिकाफलफक्रिया ॥ सनेत्राणांतर्मानागसात्वतोगितआयुरा ॥ पलोहितरुडाहेति
वदनेत्राक्षरोमनुः ॥ १०१ ॥ झीहरोगहरश्चास्यमुन्याद्यंपूर्ववन्मतम् ॥ झीहयुक्तोदरेस्थाप्यनागवल्लीदलं
शुभम् ॥ १०२ ॥ तदुपर्य्यष्टगुणितंवस्त्रमाच्छादयेत्ततः ॥ वंशजंशकलंतस्योपरिमुंचेत्कर्पिस्मरन् ॥
॥ १०३ ॥ अरण्यप्रस्तरोत्पन्नेवह्नौयष्टिंप्रतापयेत् ॥ वदरीतरुसंभूतांमंत्रेणानेनसप्तशः ॥ १०४ ॥
तयासंताडयेद्वंशशकलंजठरस्थितम् ॥ सप्तकृत्वः झीहरोगोनश्यत्येवनृणांक्षणात् ॥ १०५ ॥ पुच्छाकारेसुव
सनेलेखिन्याकोकिलोत्थया ॥ अष्टगंधैर्लिखेद्रूपंकपिराजस्यसुंदरम् ॥ १०६ ॥ तन्मध्येष्टादशार्णतुशत्रुनामयु
तंलिखेत् ॥ तेनमंत्राभिजप्तेननरोबद्धेनभूमिपः ॥ १०७ ॥ जयत्यरिगणंसर्वंदर्शनादेवनिश्चितम् ॥ युद्धंजिगी
षुर्नृपतिःपूर्वोक्तंलेखयेद्ध्वजे ॥ १०८ ॥ ध्वजमादायोपरागेसंस्पर्शान्मोक्षणावधि ॥ मातृकांजापयेत्पश्चाद्द
शांशेनचहोमयेत् ॥ १०९ ॥ सर्षपैस्तिलसंमिश्रैःसंस्पर्शान्मोक्षणावधि ॥ गजस्थंतंध्वजंदृष्ट्वापलायंतेऽरयो
ऽचिरात् ॥ ११० ॥ अथहनूमतोयंत्रंवक्ष्येरक्षाविधायकम् ॥ लिखेदष्टदलंपद्मंसाध्याख्यायुतकर्णिकम् ॥ १११ ॥
दलेष्वष्टार्णमालिख्यमालामंत्रेणवेष्टयेत् ॥ तद्बहिर्माययावेष्ट्यप्राणस्थापनमाचरेत् ॥ ११२ ॥ लिखितंस्वर्ण
लेखिन्यादलेभूर्जतरोःशुभे ॥ रोचनाकुंकुमाभ्यांतुवेष्टितंकनकादिभिः ॥ ११३ ॥ संपातसाधितंयंत्रंभुजेवामूर्ध्नि
धारयेत् ॥ रणेजयमवाप्नोतिव्यवहारेदुरोदरे ॥ ११४ ॥ ग्रहैर्विघ्नैर्विषैःशस्त्रैश्चौरैर्नैवाभिभूयते ॥ रोगान्सर्वा
नपाकृत्यचिरंजीवतिभाग्यवान् ॥ ११५ ॥ वियदग्नियुतंदीर्घपट्कार्द्यंतारसंपुटम् ॥ अष्टार्णोमंत्रआख्यातो

मालामंत्रोऽथकथ्यते ॥ ११६ ॥ वज्रकायवज्रतुंडकपिलेत्यथपिंगल ॥ ऊर्द्ध्वकेशमहाबलतथारक्तमुखेतिच ॥
॥ ११७ ॥ तडिज्जिह्वमहारौद्रदंष्ट्रोत्कटकहद्वयम् ॥ करालिनेमहादृढप्रहारिन्नितिवर्णकाः ॥ ११८ ॥ लंकेश्व
रवधायातेमहासेतुपदंततः ॥ बंधांतेचमहाशैलप्रवाहगगनेचर ॥ ११९ ॥ एह्येहिभगवन्नंतेमहाबलपराक्रम ॥
भैरवाज्ञापयैह्येहिमहारौद्रपदेपुनः ॥ १२० ॥ दीर्घपुच्छेनवर्णांतेवेष्टयांतेतुवैरिणम् ॥ जंभयद्वितयंहुंफट्प्रण
वादिःसमीरितः ॥ १२१ ॥ बाणनेत्रेंदुवर्णोयंमालामंत्रोखिलेष्टदः ॥ युद्धेजप्तोजयंदद्यादाधिव्याधिविनाशनः ॥
॥ १२२ ॥ अष्टार्णमालामन्वोस्तुमुन्याद्यर्चातुपूर्ववत् ॥ भूरिणाकिमिहोक्तेनसर्वंदद्यात्कपीश्वरः ॥ १२३ ॥
अथ हनुमन्मंत्रोद्धारः ॥ उक्तंचरामार्चनचंद्रिकायाम् ॥ आंजनेयमनुंवक्ष्येभुक्तिमुक्त्येकसाधनम् ॥ प्रकाशि
तंशंकरेणलोकानांहितमिच्छता ॥ १२४ ॥ भूतप्रेतपिशाचादिडाकिनीब्रह्मराक्षसाः ॥ दृष्ट्वाचप्रपलायंतेमंत्रानु
ष्ठानतत्परम् ॥ १२५ ॥ प्रधानश्चांगभूतोयंमंत्रराजोह्यनुत्तमः ॥ पूर्वंनमःपदंचोक्त्वाततोभगवतेपदम् ॥१२६॥
आंजनेयपदंज्ञेयंमहाबलपदंतथा ॥ वह्निजायांतएवंस्यान्मंत्रोहनुमतःपरम् ॥ १२७ ॥ सर्वसिद्धिकरःप्रोक्तोमंत्र
श्चाष्टादशाक्षरः ॥ मालाख्योऽपरमंत्रोपिमारुतेःसर्वसिद्धिदः ॥ १२८ ॥ प्रणवंपूर्वमुच्चार्यनमोहनुमतेपदम् ॥ डंतं
प्रकटसंयुक्तंपराक्रमपदंतथा ॥ १२९ ॥ तथाक्रांतसर्वभूमिदिग्मंडलमुदीर्यच ॥ यशोवितानधवलीकृतजगत्रितया
यच ॥१३०॥वज्रदेहेतिचेत्युक्त्वारुद्रावतारपदंतथा ॥ संबुद्धचंतंपदंलंकापुरीदहनमीरयेत् ॥ १३१ ॥ उदधिलंघ
नंचापिदशग्रीवकृतांतकः ॥ सीताश्वासनेतिपदमंजनीगर्भसंभव ॥ १३२ ॥ श्रीरामलक्ष्मणानन्दकारिन्कपिसे

न्यप्राकार ॥ सुग्रीवसाधारणपदंपर्वतोत्पाटनंतथा ॥ १३३ ॥ बालब्रह्मचारिन्नितितथागंभीरशब्दच ॥ सर्वग्रहवि
नाशनसर्वज्वरोच्छेदनेतिच ॥ १३४ ॥ डाकिनीध्वंसनपदंततस्तारमुदीरयेत् ॥ मायाहात्रयमुच्चार्यभगवन्नेहिवदे
ततः॥१३५॥सर्वविषंहरपरबलंक्षोभयचद्वयम्॥ततश्चसर्वकार्याणिसाधयेतिद्विरुच्चरेत् ॥ हुंफट्स्वाहेतिमंत्रोयंमा
लाख्यःसर्वकामधुक् ॥ ऋषिरीश्वरएवस्यादनुष्टुप्छंदउच्यते॥ १३६ ॥ हनुमान्देवताप्रोक्ताहंबीजंशक्तिरंतजो ॥
कीलकंहात्रयंप्रोक्तंवदेकंतुहसौपुनः ॥ हनुमत्प्रीणनंचैवफलमाद्यमुदीरितम् ॥ १३७ ॥ नमोभगवतेचांजनेयायां
गुष्ठयोर्न्यसेत् ॥ रुद्रमूर्तयइत्येवतर्जनीभ्यामनंतरम् ॥ १३८ ॥ वायुसुतायापितथामध्यमाभ्यामपिस्फुटम् ॥
अग्निगर्भायेतितथानामिकाभ्यांप्रविन्यसेत् ॥ १३९ ॥ रामदूतायचपुनःकनिष्ठिकाभ्यांविचक्षणः ॥ ब्रह्मास्त्र
वारणायास्त्रमंत्रश्चायंसमीरितः ॥१४०॥ एवंपडंगंचमुनेः कृत्वाध्यायेदनन्यधीः ॥ स्फटिकाभंस्वर्णकांतिंद्विभुजं
चकृतांजलिम् ॥ १४१ ॥ कुंडलद्वयसंशोभिमुखांभोजंमुहुर्मुहुः ॥ अयुतं १०००० तुपुरश्चर्यारामस्याग्रेशिव
स्यच ॥ १४२ ॥ पूजांतुवैष्णवेपीठेशैवेवापिविधीयते ॥ आवृत्तिभिर्विनानित्यंनक्ताशीविजितेंद्रियः ॥ १४३ ॥
क्षुद्ररोगनिवृत्त्यर्थमष्टोत्तरशतंमुनेः ॥ जप्त्वात्रिदिनमेकांतेतेभ्योमुच्येततत्क्षणात् ॥ १४४ ॥ क्षुद्रभूतप्रशांत्य
र्थमष्टोत्तरशतंमुनेः ॥ जप्त्वैवतद्भयान्मुक्तोभवेदेवंनसंशयः ॥ १४५ ॥ महारोगादिशांत्यर्थमष्टोत्तरसहस्रकम् ॥
जप्त्वातस्मात्प्रमुच्येतनिश्चितंनियताशनः ॥ १४६ ॥ जयाभिकांक्षिणांराज्ञामस्मादन्यन्नविद्यते ॥ ध्यायेद्राक्ष
सहंतारमयुतंनियताशनः ॥ १४७ ॥ जपन्नियतमाश्वेवजयेद्दुर्जयमप्यरिम् ॥ संधानायतुसुग्रीवसंधातारंस्मर

न्नपि ॥ १४८ ॥ अयुतेनैववलिनासंधिमाप्नोत्यसंशयम् ॥ लंकायादाहकंध्यायेज्जपन्नयुतमंजसा ॥ १४९ ॥
शत्रुराष्ट्रंदहेद्देवविक्षुब्धमपिचानघ ॥ जयार्थीरिपुसंघातंतस्मादन्योनविद्यते ॥ १५० ॥ यस्तुगेहेहनूमंतंसर्वदेवं
प्रपूजयेत् ॥ तंवंदेतस्यमंत्रेणतस्यलक्ष्मीरचंचला ॥ १५१ ॥ दीर्घमायुर्भवेद्देवसर्वतोविजयीभवेत् ॥ मायाद्भिभू
तसंक्षोभंतद्दर्शनेनैवजायते ॥ १५२ ॥ शत्रवःसर्वदामित्राभावेनैवचतेसदा ॥ शैवानांवैष्णवानांचपट्सुकर्मसु
दर्शकः ॥ १५३ ॥ नान्यंसाधनमस्त्येवमंत्रादस्माद्धनूमतः ॥ चोरव्याघ्रादिभीतानामयमेवपरायणम् ॥१५४॥
परापहृतराज्यानांधर्पितानांपरैःपुनः ॥ सन्नाहभाजांयुद्धेपुरुद्धानांपरसैनिकैः ॥ १५५ ॥ यात्राकालेहनूमंतं
स्मरन्यस्तुस्वकाद्गृहात् ॥ निर्गच्छतिसवेगेनइष्टार्थमभिगच्छति ॥ १५६ ॥ स्वापकालेस्मरन्नित्यंचोरभूता
दिकान्यजेत् ॥ मद्वयंवासुदेवाद्यंहनूमंतंपदंततः ॥ १५७ ॥ गच्छेतिफलितपदंधगेत्विधगितेतिच ॥ आपूरा
स्वपुराडाहेतिसद्यः प्रत्ययकारकः ॥ १५८ ॥ चतुर्विंशत्यक्षरकोमंत्रोयंप्लीहरोगहृत् ॥ नागवल्लीदलेचैवमष्ट
प्रगुणितंशुभम् ॥ १५९ ॥ वंशजंशकलंस्थाप्यक्रमात्प्लीहोदरोपरि ॥ सप्तारण्योपलाग्निंवैदूरेधृत्वाप्रतापपेत् ॥
॥ १६० ॥ मंत्रेणानेनाभिमंत्र्यसप्तवारंतथापुनः ॥ तथाभिमंत्रयेदेवंसप्तभिस्तुविचक्षणः ॥ १६१ ॥ स्फोट
द्वारंभवेत्प्लीहभस्मीभूतंनसंशयः ॥ कर्पूराद्यष्टगंधेनपुच्छाकारेपटेलिखेत् ॥ १६२ ॥ कोकिलाख्यस्यलेखि
न्यारूपंहनुमतोमनुम् ॥ तदधोष्टादशार्णंतुमंत्रमध्येभिधामरेः ॥ १६३ ॥ मूर्ध्निबद्धेनतेनैवत्रैलोक्यंजयतिध्रुवम् ॥
यद्वासेनाजयेच्छायांपताकायांसमालिखेत् ॥ १६४ ॥ चंद्रसूर्यग्रहेजाप्यंमातृकामोक्षणावधि ॥ होमयेच्चदशां

शेनतिलसर्पपकादिभिः ॥ १६५ ॥ युद्धकालेपताकायांगजाश्वोपरिशोभितम् ॥ दर्शयेत्परसैन्यस्यतद्भंगःस्या
त्सुनिश्चितम् ॥ १६६ ॥ मालामंत्रंकर्पूरकस्तूरीकुंकुमकेसरगोरोचनसकिडीअगरुदेवदारुचंदनमित्यष्टगंधे
नलिखेत् ॥ मालामंत्रंजपेद्यस्तुहनूमंतंस्मरन्रणे ॥ वज्रांगोजायतेयुद्धेहनूमत्समविक्रमः ॥ १६७ ॥ अथरक्षांप्र
वक्ष्यामिसर्वसिद्धिप्रदायकाम् ॥ स्तंभनंसर्वसैन्यानांभूतानांचवशंकरम् ॥ १६८ ॥ रोचनाकुंकुमाभ्यांचभूर्ज
पत्रेसुशोभने ॥ सुवर्णमयलेखिन्यायंत्रेमंत्रदलंलिखेत् ॥ १६९ ॥ साध्यनामचतन्मध्येमूलमंत्रंदलाष्टके ॥ माला
मंत्रंचतद्बाह्येत्रिधार्ह्रींकारवेष्टितम् ॥ १७० ॥ वेष्टयेयंत्रंत्रिलोहेनकटिबाहुशिरःस्थितम् ॥ धारयेद्यइमांरक्षांविघ्न
स्तस्यनविद्यते ॥ १७१ ॥ रणेराजकुलेद्यूतेव्यवहारेपराभवे ॥ शस्त्रंनाक्रमतेवश्यंवज्रदेहोमहाबलः ॥ १७२ ॥ उद्दु
पादिकदोषांश्चविषंस्थावरजंगमम् ॥ नभयंविद्यतेतस्यस्त्रीणांचैवातिवल्लभः ॥ १७३ ॥ तस्यपीडांनकुर्वंति
ग्रहाश्चैवह्युपग्रहाः ॥ जलवह्निभयंनास्तिनास्तितस्करजंतथा ॥ १७४ ॥ ज्वराःसर्वेविनश्यंतित्र्याहिकाद्यामहा
बलाः ॥ अग्निजादिमहारोगायंत्रराजप्रभावतः ॥ १७५ ॥ तारंहकारोग्निसमः षड्दीर्घस्वरबिंदुमान् ॥ प्रण
वांतोऽष्टाक्षरकोमूलमंत्रउदाहृतः ॥ १७६ ॥ ताराद्यंवज्रकायेतिवज्रतुंडेतिह्युद्धरेत् ॥ कपिलःपिंगलः
प्रोक्त्वाऊर्ध्वकेशमहाबल ॥ १७७ ॥ रक्तमुखतडिज्जिह्वमहारौद्रपदंततः ॥ दंष्ट्रोत्कटककटारावकरालास्यवदे
त्ततः ॥ १७८ ॥ महादृढप्रहारिंश्चलंकेश्वरवधायतु ॥ महासेतुबंधपदंमहाशैलप्रवाहच ॥ १७९ ॥ गगनेचरए
ह्येहिभगवच्चमहापदम् ॥ बलपराक्रमपदंहिभैरवाज्ञाचयेतिच ॥ १८० ॥ एह्येहिमहारौद्रदीर्घपुच्छेनवेष्टयाथच

वैरिणाम् ॥ भंजयद्वितयंचोक्त्वारूंक्रूंहूंचफडंतकम् ॥ १८१ ॥ पंचविंशत्याध्यधिकःप्रोक्तोमंत्रःपडक्षरः॥माला
ख्योऽयंज्वरादीनांरोगाणामंतकःस्मृतः ॥ १८२ ॥ सर्वतंत्रसंग्रहे ॥ मंत्रःॐहंहनुमतेरुद्रात्मकायहुंफट्॥१८३॥
नदीतीरेनिर्जनेध्यानम् ॥ महाशैलंसमुत्पाट्यधावंतंरावणंप्रति ॥ तिष्ठतिष्ठरणेदुष्टघोरनादंसमुच्चरन् ॥ १८४ ॥
लाक्षारक्तारुणंरौद्रंकालांतकयमोपमम् ॥ ज्वलदग्निसमंनेत्रंसूर्यकोटिसमप्रभम् ॥ १८५ ॥ अंगदाद्यैर्महावीरै
र्वेष्टितंरुद्ररूपिणम् ॥ एवंरूपंहनूमंतंध्यात्वायःप्रजपेन्मनुम् ॥१८६॥ लक्षजपात्प्रसन्नःस्यात्सत्यंतेकथितंमया॥
ध्यानैकमात्रतःपुंसांसिद्धिरेवनसंशयः ॥ १८७ ॥ प्रातःस्नात्वानदीतीरउपविश्यकुशासने ॥ प्राणायामंषडंगंच
मूलेनसकलंचरेत् ॥ १८८ ॥ पुष्पांजल्यष्टकंदत्वाध्यात्वारामंससीतकम् ॥ ताम्रपात्रेततःपद्ममष्टपत्रंसकेस
रम् ॥ १८९ ॥ रक्तचंदनघृष्टेनलिखेत्तस्यशलाकया ॥ कर्णिकायांलिखेन्मंत्रंतत्रावाह्यकपिंप्रभुम् ॥ १९० ॥
कर्णिकायांहनूमंतंध्यात्वापाद्यादिकंततः ॥ गंधपुष्पादिकंचैवनैवेद्यंमूलमंत्रतः ॥१९१॥ सुग्रीवंलक्ष्मणंचैवअंग
दंनलनीलकम् ॥ जांबवंतंचकुमुदंकेशरिणंदलेदले ॥१९२॥ पूर्वादिक्रमतोदेवान्पूजयेद्गंधचंदनैः ॥ पवनंचांज
नंचैवपूजयेद्दक्षवामतः ॥ १९३ ॥ दलाग्रेष्टकपिभ्योपिपुष्पांजल्यष्टकंततः ॥ ध्यात्वाजपेन्मंत्रराजंलक्षंयावत्तु
साधकः ॥ १९४ ॥ लक्षांतदिवसंप्राप्यकुर्याच्चपूजनंमहत् ॥ एकाग्रमनसाध्यायेत्तस्मिन्पवननंदनम् ॥१९५॥
दिवारात्रौजपंकुर्याद्यावत्संदर्शनंभवेत् ॥ सुदृढंसाधकंमत्वानिशीथेपवनात्मजः ॥ १९६ ॥ सुप्रसन्नस्ततो
भूत्वाप्रयातिसाधकाग्रतः ॥ यथेप्सितंवरंदत्वासाधकायकपिःप्रभुः ॥१९७॥ वरंलब्ध्वासाधकेंद्रोविहरेदात्मनः

सुखैः ॥ एतद्धिसाधनंपुण्यंदेवानामपिदुर्लभम् ॥ १९८ ॥ तवस्नेहान्मयाख्यातंसाधकाभीष्टसिद्धये ॥ अथध्वजवीरहनुमन्मंत्रः ॥ स्फुटग्रंथे ॥ ॐअस्यश्रीध्वजवीरहनुमन्मंत्रस्यब्रह्माऋषिः । गायत्रीछंदः । ध्वजवीरब्रह्मा देवता । बंबीजम्।रंशक्तिः॥धंकीलकम्।सर्वाभीष्टसिद्ध्यर्थंजपेविनियोगः॥ अथऋष्यादिन्यासः॥ब्रह्मऋषयेनमः शिरसि । गायत्रीछंदसेनमःमुखे। ध्वजवीरब्रह्मदेवतायैनमः हृदये। बंबीजायनमः गुह्ये । रंशक्तयेनमःपादयोः। धंकीलकायनमःनाभौ ॥ विनियोगायनमः सर्वांगे ॥ अथमंत्रन्यासः ॥ ॐआंअंगुष्ठाभ्यांनमः १ रींतर्जनीभ्यां नमः २ क्रोंमध्यमाभ्यांनमः ३ टं अनामिकाभ्यांनमः ४ ठंकनिष्ठिकाभ्यांनमः ५ डंकरतलकरपृष्ठाभ्यांनमः ६ ढं हृदयायनमः ७ णं शिरसेस्वाहा ८ बं शिखायैवषट् ९ रं कवचायहुं १० धं नेत्रत्रयायवौषट् ११ ध्वज वीरायनमः अस्त्राय फट् १२ ॥ अथ ध्यानम् ॥ ध्वजवीरमहावीरधनंजयजयप्रद ॥ जयकर्त्ताघहर्त्ताचतस्मै रुद्रायतेनमः ॥ १९९ ॥ अथ मूलमंत्रः ॥ ॐ आंरींक्रों टं ठं डं ढं णं बं रं धं ध्वजवीरायनमः ॥ लक्षं पुरश्चरणं दशांशं हवनादिकम् ॥ २०० ॥ इति ॥ अत्र मूलंमृग्यम् ॥

अथटीका॥पूर्वोक्तप्रारंभादिश्लोकानांकठिनशब्दानामर्थःप्रतिपाद्यते॥श्रीहनुमतोमंत्रान्वक्तुंप्रतिजानीते ॥१॥ अथेति । मंत्रमुद्धरति । इंद्रेति वराहोहःइंद्रस्वरऔविंदुःताभ्यांयुतःहौं ॥ हसफस्वरूपंअग्नीरः॥२॥एतेझिंटीशविंदुयुताः॥एविंदुयुताःतेनहस्फ्रें॥गदीत्वः । पांताग्निरुद्रेंदुयुतः पांतःफः॥अग्नीरः॥रुद्रए॥ इंदुविंदुस्तैर्युतःख्फ्रें॥३॥हसरामनुचंद्राढ्याःऔविंदुयुताः ह्स्फ्रौं॥ हसखफराःशिवेंद्राढ्याः एविंदुयुताः तेनह्स्ख्फ्रें ह्सौमर्न्विदुगौऔविंदुयुतौह्सौःपरंस्पष्टम् ॥४॥ ङेयुतोहनुमान्हनुमतेहार्दनमः ॥यथा॥ हौंह्स्फ्रेंख्फ्रेंह्सौंस्फ्रें ह्स्रौं हनुमतेनमः । अस्यहनुमन्मंत्रस्यरामचंद्रऋषिः।जगतीछंदः।हनुमान्देवता।ह्स्रौंबीजम्।ह्स्फ्रेंशक्तिः।ममाभीष्टसिद्ध्यर्थेजपेविनियोगः॥५॥पष्ठंह्सौमितिबीजम्।ह्स्फ्रें

मितिशक्तिः ॥६॥ ऱ्हौंहृत् । हस्फ्रेंशिरः । ख्फ्रेंशिखा । इत्यादि । वर्णन्यासमाह ॥ मूर्ध्नीति । एकैकंसर्वत्र० ॥७॥ पदन्यासमाह ॥पडिति॥
पदद्वंद्वंहनुमतेनमइति ॥ ८ ॥ ध्यानमाह ॥ वालेति ॥ वातात्मजंहनूमंतम् ॥९॥१०॥ दलेषुतदाह्वयान्हनुमन्नामानि ॥ ११ ॥ तानाह ॥
रामभक्तायइत्यादि ॥ १२ ॥ १३ ॥ १४ ॥१५॥१६॥१७॥१८॥१९ ॥ शस्त्राक्षतादयोवारत्रयमंत्रितेनभस्मनामार्जिताअचिराच्छुष्यंतिन
श्यंति ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ देहचंदनंदेहेधृतंयच्चंदनंतेनयुतम् । भस्मांबुचमंत्रितंयस्मैदेयंसवश्यःस्यात् ॥ २५ ॥ ईशाने
त्यादितद्गृहंचिरमित्यंतएकःप्रयोगः।भूतांकुशतरोःकरंजस्य। अरिष्टस्यईशानदिशिस्थितेनमूलेनांगुष्ठमितांहनुमत्प्रतिमांकृत्वाप्राणान्संस्था
प्यसिंदूरैरभ्यर्च्यंतद्गृहद्वारिनिखन्यतेतत्रसर्वोपद्रवनाशस्तद्वृद्धिश्च ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ शिवावितांशि
वेनापिरक्षितम् शत्रुमेवंकुर्वन्हन्यात् ॥ अर्द्धचंद्रेत्यादिरिपुमुद्धतामित्यंतएकोमारणप्रयोगः ॥ उन्मत्तोधत्तूरः॥श्लेष्मातकश्चिक्कणफलोवृक्षः॥
अक्षोविभीतकस्तदुत्थसमिद्भिश्चहुतंचरेतज्जुहुयात् । सतघस्रान् दिवसान् ॥३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ पराधीनोब
द्धोनिगडात्शृंखलातोमुच्यते । विद्वेषणादीनिविद्वेषमारणोच्चाटनान्तत्कृतपल्लवंलिखन्नेवमेवकुर्यात् ॥ अमुकंद्वेषय २ इतिद्वेष्ये । मारय
२ इतिमारणे । इत्यादिपल्लवलेखनम् ॥ ४० ॥ ४१ ॥ कुवेराक्षःसूक्ष्मकणस्तिक्तक्षुपविशेषः । सागरगोटाइतिमहाराष्ट्रप्रसिद्धः ॥ ४२ ॥
॥ ४३ ॥ यद्धान्यैर्होमःतदाप्तिः । राजीलवणयुतेनयत्पादरजसाहूयतेसम्रियते ॥ ४४ ॥ ४५ ॥ ४६ ॥ यंत्रमाह ॥ वलयेति ॥ पुच्छाकारं
वलयत्रयंविलिख्यमध्येआमितिबीजेनवेष्टितंसाध्यनामालिखेत् ॥ तदुपर्यष्टदलेषुहुमिति ॥४७॥४८॥ बहिरेकंवलयंकृत्वोपरिचतुरस्रंकृत्वा।
तदग्राणिसंवर्ध्यंतत्रत्रिशूलानिकृत्वात्रिशूलेषुक्रोमिति॥ वज्रेषुहसौमिति विलिख्यतन्मालामंत्रेणवक्ष्यमाणेनसंवेष्ट्यतत्पुनर्वलयत्रयेणवेष्टयेत्
॥४९॥ ५०॥५१॥ नाभिःकस्तूरी ॥ त्यक्ताशउपवासी॥५२॥५३॥५४॥ मालामंत्रमाहप्रणवइति । वाक् । ऐं ॥ हरिप्रियाश्रीं ॥ मायादीर्घ
त्रयान्विता ऱ्हां ऱ्हीं ऱ्हूं पूर्वोक्तमूलमंत्रस्थम् ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥
॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ अत्रिर्दंःवायुर्यंःस्वरूपमन्यत् ॥ ७८ ॥ ७९ ॥ चतुर्वि

शतिश्लोकैर्निष्पन्नोमालामंत्रोयथा ॥ ॐनमोहनुमतेप्रकटपराक्रमआक्रांतदिङ्मंडलयशोवितानधवलीकृतजगत्रितयवज्रदेहज्वलदग्निसूर्य
कोटिसमप्रभतनूरुहरुद्रावतार लंकापुरीदहनोदधिलंघनदशग्रीवशिरः कृतांतक सीताश्वासनवायुसुतांजनीगर्भसंभूतश्रीरामलक्ष्मणानं
दकरकपिसैन्यप्राकारसुग्रीवसख्यकारणवालिनिवर्हणकारणद्रोणपर्वतोत्पाटनाशोकवनविदारणाक्षकुमारकच्छेदनवनरक्षाकरसमूहनिभंजन
ब्रह्मास्त्रब्रह्मशक्तिग्रसनलक्ष्मणशक्तिभेदनिवारणविशल्यौषधिसमानयनबालोदितभानुमंडलग्रसनमेघनादहोमविध्वंसनइंद्रजिद्वधकारणसी
तारक्षकराक्षसीसंघविदारणकुंभकर्णादिवधपरायण श्रीरामभक्तितत्परसमुद्रव्योमद्रुमलंघनमहासामर्थ्यमहातेजः पुंजविराजमानस्वा
मिवचनसंपादितार्जुनसंयुगसहायकुमारब्रह्मचारिन्गंभीरशब्दोदयदक्षिणाशामार्तंडमेरुपर्वतपीठिकार्चनसकलमंत्रागमाचार्यममसर्वग्रहविना
शनसर्वज्वरोच्चाट नसर्वविषविनाशनसर्वापत्तिनिवारणसर्वदुष्टनिवर्हणसर्वव्याघ्रादिभयनिवारणसर्वशत्रुच्छेदनममपरस्यचात्रिभुवनपुंस्त्रीनपुं
सकात्मकंसर्वजीवजातंवशय २ ममाज्ञाकारकंसंपादय २ नानानामधेयान्सर्वान्राज्ञःसपरिवारान्ममसेवकान्कुरु २ सर्वशस्त्रास्त्रविषाणि
विध्वंसय२ ह्रांह्रींह्रूंह्रां ३ एह्येहिह्सौंह्स्ख्फ्रेंह्सौंख्फ्रेंह्स्फ्रैंह्सौंसर्वशत्रून्हन २ परदलानिपरसैन्यानिक्षोभय २ ममसर्वकार्यजातंसाधय २
सर्वदुष्टदुर्जनमुखानिकीलय २ घे ३ हा २ हुं ३ फट् ३ स्वाहा ॥ मालामंत्रोयमष्टाशीत्यधिकपंचशतवर्णः ॥ ५८८ ॥ ८० ॥
मंत्रांतरमाह ॥ द्वादशेति ॥ ह्स्फ्रेंख्फ्रेंह्स्त्रौंह्स्ख्फ्रेंह्सौमिति ॥ ८१ ॥ अस्यहनुमत्पंचकूटमंत्रस्य । रामचंद्रऋषिः ॥ गायत्रीछंदः ॥
कपीश्वरोदेवता ॥ ममाभीष्टसिद्ध्यर्थेजपेविनियोगः ॥ ८२ ॥ षडंगमाह ॥ रामदूतइति ॥ हनुमदाद्याश्चतुर्थ्यंतावीजपूर्वाः ॥ षडंगमंत्रा
यथा ॥ ह्स्फ्रेंहनुमतेहृत् ॥ ख्फ्रेंरामभक्तायशिरः ॥ ह्स्त्रौंलक्ष्मणप्राणदात्रेशिखाइत्यादिपूर्ववत्द्वादशवर्णवत् ॥ ८३ ॥ ८४ ॥ मंत्रांतर
माह । तार इति । तार ॐवाक्ऐं । कमलाश्रीं । मायादीर्घत्रयाद्या ह्रां ह्रीं ह्रूं पंचकूटानिच इदानीमुक्तानि रुद्रार्णएकादशाक्षरः मंत्रः
ॐऐं श्रीं ह्रां ह्रीं ह्रूं ह्स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्सौं॥८५॥मंत्रांतरमाह। हृदयमिति। तद्वत्। ङेंतोनमोभगवते आंजनेयायमहाबलायस्वाहे
ति ॥ ८६ ॥ ८७ ॥ षडंगमाह ॥ आंजनेय इति ॥ आंजनेयायहृत् रुद्रमूर्त्तयेशिर इत्यादि ॥ ८८ ॥ ८९ ॥ ध्यानमाह ॥ दहनेति ॥

॥ ९० ॥ ९१ ॥ प्रयोगानाह ॥ जितेंद्रिय इति ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ उदररोगनाशकमंत्रमाह ॥
पवनेति । सद्योजातओंकारस्तद्युतंपवनद्वयंयोयोहनुस्वरूपंशशांकाढचोमहाकालःसर्विदुर्मःमंकामिकातःफलफलस्वरूपम् । सनेत्राक्रिया
इयुतोलःलि । णांतस्तः । मीनोधः । गस्वरूपं । सात्वतोधः । गितआयुरापस्वरूपं । लोहितंपःरूडाहस्वरूपांवेदनेत्राक्षरःचतुर्विंशत्यर्णः ।
यथायोयोहनुमंतफलफलितधगधगितःआयुरापरूडाहेति ॥ १०० ॥ १०१ ॥ प्लीहरोगःउदररोगःतन्नाशकप्रयोगमाह ॥ प्लीहेति । आर
ण्यगोमयकरीषोत्पन्नेग्नौबदर्युत्थांयष्टिंसप्तधामूलमंत्रेणतापयेत् । तयोदरस्थितेवंशखंडेताडितेरोगोनश्यति ॥ १०२ ॥ १०३ ॥ १०४ ॥
॥ १०५ ॥ प्रयोगांतरमाह ॥ पुच्छेति । पुच्छाकारेवस्त्रेकोकिलापिच्छलेखिन्याष्टगंधैर्हनुमद्रूपंकृत्वातदुदरेऽष्टादशार्णविलिख्याधिमंत्रितेन
शिरोबद्धेनतेनारीञ्जयति ॥ १०६ ॥ १०७ ॥ १०८ ॥ १०९ ॥ ११० ॥ यंत्रमाह ॥ लिखेदिति । अष्टार्णमालामंत्रौवक्ष्यमाणौ । दुरोदरेद्यूते
॥ १११ ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥ अष्टार्णमाह ॥ वियदिति । वियत्हःअग्नीरः । यथा ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐमित्यष्टार्णः
॥ ११६ ॥ मालामंत्रमाह ॥ वज्रेति । यथा—ॐवज्रकायवज्रतुंडकपिलपिंगलऊर्ध्वकेशमहाबलरक्तमुखतडिज्जिह्वमहारौद्रदंष्ट्रोत्कटकहह
करालिनेमहादृढप्रहारिन्लंकेश्वरवधायमहासेतुबंधमहाशैलप्रवाहगगनेचरएह्येहिभगवन्महाबलपराक्रमभैरवाज्ञापयएह्येहिमहारौद्रदीर्घपु
च्छेनवेष्टयवैरिणंभंजय २ हुंफट् ॥ ११७ ॥ ११८ ॥ ११९ ॥ १२० ॥ १२१ ॥ बाणनेत्रेंदुवर्णःपंचविंशत्युत्तरशतार्णः । अष्टार्णमाला
मंत्रौस्वतंत्रावितिसूचयन्नाह । अष्टार्णेति ॥ १२२ ॥ १२३ ॥ १२४ ॥ १२५ ॥ पूर्वमित्यादिमंत्रस्योद्धारश्चायंमंत्रः । पूर्वंषडशीतितमेश्लोके
प्रतिपादितः ॥ १२६ ॥ १२७ ॥ १२८ ॥ मंत्रांतरमाह ॥ प्रणवमिति । प्रकटपराक्रमायेतिङेंतंचतुर्थ्यंतम् ॥ १२९ ॥ १३० ॥ वज्रदेहे
त्यादि । अग्रेसंबुद्ध्यंतपदानिउच्चारणीयानि ॥ १३१ ॥ १३२ ॥ १३३ ॥ १३४ ॥ मायात्रयंह्रांह्रींह्रूं ॥ १३५ ॥ हरहरक्षोभयक्षोभयसाध
यसाधय ॥ १३६ ॥ १३७ ॥ करषडंगन्यासमाह ॥ नमइत्यादित्रिभिः ॥ १३८ ॥ १३९ ॥ १४० ॥ ध्यानमाह ॥ स्फटिकाभमिति
॥ १४१ ॥ विधिमाह ॥ अयुतमिति ॥ १४२ ॥ १४३ ॥ प्रयोगानाह ॥ क्षुद्रेत्यादिना ॥ १४४ ॥ १४५ ॥ १४६ ॥ १४७ ॥ १४८ ॥

॥ १४९ ॥ १५० ॥ १५१ ॥ १५२ ॥ १५३ ॥ १५४ ॥ १५५ ॥ १५६ ॥ मंत्रांतरमाह ॥ मद्वयमिति ॥ १५७ ॥ १५८ ॥ मंत्रप्रयोगाः ॥ १५९ ॥ १६० ॥ १६१ ॥ १६२ ॥ १६३ ॥ १६४ ॥ १६५ ॥ १६६ ॥ १६७ ॥ अथसैन्यादीनांरक्षाप्रयोगः ॥ अथेत्यादिना॥१६८॥ ॥ १६९ ॥ १७० ॥ १७१ ॥ १७२ ॥ १७३ ॥ १७४ ॥ १७५ ॥ अष्टाक्षरमंत्रोद्धारमाह ॥ तारमिति । ॐह्रांह्रींह्रूंह्रैंह्रौंह्रः ॐअयंमंत्रप्रकाशःपूर्वोक्तएव ॥ १७६ ॥ अथमालामंत्रोद्धारमाह । ताराद्यमिति । अयमपिमंत्रःसप्तदशाधिकशततमश्लोकमारभ्यप्रतिपादितःस्पष्टएव ॥ १७७ ॥ १७८ ॥ १७९ ॥ १८० ॥ १८१ ॥ १८२ ॥ अथमंत्रांतरमाह ॥ १८३ ॥ १८४ ॥ १८५ ॥ १८६ ॥ १८७ ॥ १८८ ॥ ॥ १८९ ॥ १९० ॥ १९१ ॥ १९२ ॥ १९३ ॥ १९४ ॥ १९५ ॥ १९६ ॥ १९७ ॥ १९८ ॥ अथध्वजवीरहनुमन्मंत्राराधनविधानम् ॥ स्पष्टोर्थः ॥ ध्वजवीरोनामकुरुपांडवयुद्धप्रसंगेअर्जुनरथध्वजेस्थितइति । अत्रमूलंमृग्यम्। कस्मिंस्तंत्रउक्तंतन्नज्ञायते ॥ १९९ ॥ २०० ॥

इति श्लोकानां व्याख्या ॥

अथपंचमुखिध्यानम् ॥ ध्यायेद्वानरनारासिंहखगराट्क्रोडाश्ववक्त्रंस्फुटंपद्माक्षीस्फुटपंचवक्त्ररुचिरंबालार्ककोटिद्युतिम् ॥ हस्तेशूलकपालमुद्गरवरंकौमोदकीभूरुहंखट्वांगांकुशपाशपर्वतधरंपीताम्बरंवानरम् ॥ २०१ ॥

इति श्रीहरिकृष्णविनिर्मितेबृ० ध० उपासनास्तवकेहनुमदुपासनाध्यायेहनुमन्मंत्रपटलनिरूपणंनामप्रकरणंत्रयोदशम् ॥ १३ ॥ श्लोकाः ९०७

अथ हनुमत्पूजापद्धतिः ॥ ब्राह्ममुहूर्त्तेशयनतलादुत्थाय । करचरणौप्रक्षाल्य । निजासनेसमुपविश्य । निजशिरसिश्वेतवर्णसहस्रदलकमलकर्णिकांतर्गतचंद्रमंडलोपरिस्वगुरुंशुक्लवर्णंशुक्लालंकारभूपितंज्ञानानंदमुदितमानसंसच्चिदानंदविग्रहंचतुर्भुजंज्ञानमुद्रापुस्तकवरदाभयकरंत्रिनयनंप्रसन्नवदनेक्षणंसर्वदेवं परमशिवस्वरूपंध्या

त्वा तच्चरणयुगलकमलविगलदमृतधारयास्वात्मानंप्लुतंविभाव्यमानसोपचारैः संपूज्यदंडप्रणामंमनसाकुर्या
त् ॥ तत्रप्रणाममंत्रः ॥ नमामिसद्गुरुंशांतंप्रत्यक्षंशिवरूपिणम् ॥ शिरसायोगपीठस्थंमुक्तिकामार्थसि
द्धये ॥ १ ॥ इति गुरुंप्रणम्य सुप्रसन्नंविभाव्यमनसातदाज्ञांगृहीत्वाअजपाजपसंकल्पंकृत्वाहंसः पंचविं
शतिवारंजप्त्वागुरूपदिष्टमार्गेणनादानुसंधानपूर्वकंनिरस्तसमस्तोपाधिनाकेनापिचिद्विलासेनप्रवर्त्तमानोस्मी
तिविभाव्य स्वकार्यानुष्ठानायासमुद्रमेखलेदेविपर्वतस्तनमंडले । विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे
॥ १ ॥ इति भूमिंप्राथ्यश्वासानुसारेणतस्यांपादंनिधायनद्यादौगत्वावैदिकं स्नानंनिर्वत्यतांत्रिकंप्रार
भेत ॥ तत्रादौ मूलम् । आत्मतत्वायस्वाहा १ मूलंविद्यातत्वायस्वाहा २ मूलंशिवतत्वायस्वाहा ॥
अथवा ॐ ह्रीं स्वाहा इत्याचम्य मूलंस्मरन् मलापकर्षस्नानंविधायपुनराचम्यदेशकालौसंकीर्त्य
श्रीमद्धनुमद्देवताप्रीतयेतांत्रिकविधिनास्नानमहंकरिष्ये । जलेत्रिकोणंकृत्वा सूर्यमंडलाद्गंगादितीर्थान्या
वाह्य आचम्य स्वात्मानंप्रोक्ष्य मूलेनमृत्तिकयास्नपनंविधाय मूलंपठन् कुंभमुद्रयास्वदेवतांत्रिभिरभि
षिच्य श्रवणादिसप्तच्छिद्राणिनिरुध्यत्रिर्निमज्ज्योन्मज्जेत् ॥ इति स्नानविधिः ॥ अथसंध्या ॥ वैदिकींकृत्वा
तांत्रिकीयथा पूर्ववदाचम्य स्वमूलेनप्राणायामः ऋष्यादिकरषडंगन्यासौविधाय पूर्ववत्तीर्थमावाह्य वामहस्ते
तज्जलंनिधाय दक्षहस्तेनाच्छाद्य लंवंरंयंहं इति त्रिरभिमंत्र्य मूलमुच्चरंस्तत्वमुद्रया। मूर्ध्निसप्तधामूलेनचत्रिधा
भ्युक्ष्य शेषजलंदक्षहस्तेसमाधाय तेजोरूपंध्यात्वा इडयादेहांतःपापंप्रक्षाल्य कृष्णवर्णंतज्जलंपापरूपंपिंगल

याविरच्य पुरःकल्पितवज्रशिलायांफडितिनिक्षिपेत् ॥ ततोऽर्घ्यंविधाय ॐ ह्रांह्रींहंसः श्रीमार्तंडभैरवायप्रकाश
शक्तिसहितायइदमर्घ्यंपरिकल्पयामिस्वाहा ॥ इतित्रिरर्घ्यंकुलसूर्यायदत्वा ॥ हृत्पद्मात्सूर्यमंडलेहनुमद्देवतां
नीत्वा तत्रविधिवद्ध्यात्वा ॐअंजनीजायविद्महेवायुपुत्रायधीमहि । तन्नःकपिःप्रचोदयात् ॥ इतिमूलगा
यत्री अनयाचतसृषुसंध्यासुसूर्यमंडलेहनुमद्देवतायैअर्घ्यंदत्वायथाशक्तिजपेत् ॥ यथाशक्तिस्वस्वगायत्रीं
जप्त्वापुनर्मूलगायत्रींचजप्त्वामूलमंत्रंचजपित्वा प्राणायामादिनाजपंसमर्प्यमंडलेभ्योहनुमत्तेजःस्वस्वस्थाने
हनुमंतंचहृदि आनीयध्यायेत् ॥ इतिसंध्याविधिः ॥ अथतर्पणम् ॥ पूर्ववदाचम्यप्राणायामादिकृत्वा तीर्थ
मावाह्य मूलेनजलंसप्तधाऽमृतमुद्रयाऽमृतीकृत्य । तत्रजले यंत्रंध्यात्वा तत्रदेवतांहृदयात्सपरिवारामानीयप
डंगयोगेन संकलीकृत्य कुंडलिन्याःप्रयोगेणामृतेनाभिषिच्य विधिवत्प्रपूज्य ऐशान्यां ऐंश्रींश्रीं अमुकानं
दनाथभैरवस्तृप्यताम् इतित्रिः संतर्प्य वन्हौ परमगुरुश्रीपादुकांतर्पयामि ॥ नैर्ऋत्यां परमाचार्यगुरुश्रीपादु
कांतर्पयामि ॥ वायव्ये परमेष्ठिगुरुश्रीपादुकांतर्प्पयामि ॥ इति त्रिःसकृद्वासंतर्प्य दिव्यसिद्धमानवौघानपि
गुरून्संतर्प्य जले यंत्रं विभाव्य मूलेनश्रीहनुमद्देवतातृप्यतामितित्रिःसंतर्प्य । रामभक्तंतर्पयामि ॥ महाते
जसंत० कपिराजंत० महाबलंत० द्रोणाद्रिहारकंत० मेरुपीठिकार्चनकारकंत० दक्षिणाशाभास्करंत० सर्ववि
घ्ननिवारकंत० सुग्रीवंत० अंगदंत० नीलंत० जांबवंतंत० नलंत० सुषेणंत० द्विविदंत० मैंदंत० इंद्रंत०
अग्निंत० यमंत० नैर्ऋतिंत० वरुणंत० वायुंत० कुबेरंत० ईशानंत० ब्रह्माणंत० अनंतंत० इति संतर्प्य प्राणा

यामादि विधाय देवंस्वहृदि विसृजेदिति तीर्थंच विसृजेत्स्वस्थाने ॥ इति तर्पणम् ॥ ॥ ततोगृहमागत्य जला
दिना द्वारदेवताः पूजयेत् ॥ ॐ धांधात्र्यैनमः विंविधात्र्यैनमः दक्षिणभागे ॥ ॐ गंगंगायैनमः य
मुनायैनमःवामभागे ॥ द्वारश्रियैनमःदेहल्यैनमःऊर्ध्वे ॥ वास्तुपुरुषायनमःअधः॥इतिसंपूज्य वीराद्यासनेनो
पविश्य ॥ पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता । त्वंचधारयमांदेविपवित्रंकुरुचासनम् ॥ १ ॥ इतिपृथिवीं
संप्रार्थ्य ॥ अपसर्पंतुतेभूतायेभूताभुविसंस्थिताः । येभूताविघ्नकर्त्तारस्तेनश्यंतुशिवाज्ञया ॥ २ ॥ इतितर्जनी
मध्यमाभ्यामूर्ध्वोर्ध्वतालत्रयदानेनवामपार्ष्णिघातत्रयेणदिव्यदृष्ट्याच त्रिविधान्विघ्नानुत्सार्य्यछोटिकाभिर्द
शदिग्बंधंकृत्वाचतुर्दिक्षुवह्निप्राकारंसंचिंत्यप्राणायामंकुर्यात् ॥ ॥ अथभूतशुद्धिप्राणप्रतिष्ठांतर्मातृकान्यास
बहिर्मातृकान्यासान्कृत्वा ॥ ॥ अथप्रधानदेवतान्यासान्कुर्यात् ॥ तत्रादौऋष्यादिन्यासः ॥ श्रीरामचंद्रऋ
षयेनमः शिरसि । जगतीछंदसेनमःमुखे । हनुमद्देवतायैनमःहृदये । ह्स्रौंबीजायनमःगुह्ये । ह्स्फ्रेंशक्त्येनमः
पादयोः ॥ विनियोगायनमःसर्वांगे ॥ अथवर्णन्यासः ॥ ॐह्रौंनमःमूर्ध्नि १ ॐ ह्स्फ्रेंनमःभाले २ ॐ ख्फ्रेंनमः
नेत्रयोः ३ ॐ ह्स्रौंनमःमुखे ४ ॐ स्फ्रेंनमः कंठे ५ ॐ ह्स्रौं नमःबाह्वोः ६ ॐ हंनमः हृदये ७ ॐ नुंनमःकुक्षौ
८ ॐ मंनमः नाभौ ९ ॐतेंनमः लिंगे १० ॐ नंनमः जानुद्वये ११ ॐ मः नमः पादयोः १२ ॥ ॥ अथ
पदन्यासः ॥ॐ ह्रौं मूर्ध्नि १ ॐ ह्स्फ्रेंभाले २ ॐ ख्फ्रेंमुखे ३ ॐ ह्सौंहृदि ४ ॐ स्फ्रेंनाभौ ५ ॐ ह्स्रौंऊर्वोः६
ॐ हनुमतेजंघयोः ७ ॐ नमः पादयोः ८ अथगायत्रीमंत्रन्यासः ॥ ॥ ॐ अंजनीजाय अंगुष्ठाभ्यांनमः

१ ॐ विघ्नहेतर्जनीभ्यांनमः २ ॐ वायुपुत्रायमध्यमाभ्यांनमः ३ ॐ धीमहिअनामिकाभ्यांनमः ४ ॐ तन्नः कपिः कनिष्ठिकाभ्यांनमः ५ ॐ प्रचोदयात्करतलकरपृष्ठाभ्यांनमः ६ अथ हृदयादिन्यासः ॥ ॐ अंजनीजायहृदयायनमः १ ॐविघ्नहेशिरसेस्वाहा २ ॐ वायुपुत्रायशिखायैवषट् ३ ॐ धीमहिकवचायहुं ४ ॐ तन्नः कपिः नेत्रत्रयायवौषट् ५ ॐ प्रचोदयातअस्त्रायफट् ६॥ ॥ अथांगुलिन्यासः ॥ ॐ ह्रांअंजनीसुतायअंगुष्ठाभ्यांनमः १ ॐ ह्रींरुद्रमूर्तयेतर्जनीभ्यांनमः २ ॐ ह्रूंरामदूतायमध्यमाभ्यांनमः ३ ॐ ह्रैंवायुपुत्रायअनामिकाभ्यांनमः ४ ॐ ह्रौंअग्निगर्भायकनिष्ठिकाभ्यांनमः ५ ॐ ह्रः ब्रह्मास्त्रनिवारणायकरतलकरपृष्ठाभ्यांनमः ६ ॥ अथ हृदयाद्यंगन्यासः ॥ ॐ ह्रांअंजनीसुतायहृदयायनमः १ ॐ ह्रींरुद्रमूर्त्तयेशिरसेस्वाहा २ ॐ ह्रूंरामदूतायशिखायैवषट् ३ ॐ ह्रैंवायुपुत्रायकवचायहुं ४ ॐ ह्रौंअग्निगर्भायनेत्रत्रयायवौषट् ५ ॐ ह्रः ब्रह्मास्त्रनिवारणायअस्त्रायफट् ६ ॥ ॥ अथ प्रकारांतरेणकरन्यासः ॥ ॐ ऐंह्रींहनुमतेरामदूतायअंगुष्ठाभ्यांनमः १ ॐ लंकाविध्वंसनायतर्जनीभ्यांनमः २ ॐ अंजनीगर्भसंभूतायमध्यमाभ्यांनमः ३ ॐ शाकिनीडाकिनीविध्वंसनायअनामिकाभ्यांनमः ४ ॐ किलकिलबुभुक्कारेणविभीषणायहनुमद्देवाय कनिष्ठिकाभ्यांनमः ५ ॐ ह्रींश्रींह्रौंह्रांफट्स्वाहाकरतलकरपृष्ठाभ्यांनमः ६ ॥ ॥ अथ हृदयादिन्यासः ॥ ॐ ऐंह्रींहनुमतेरामदूतायहृदयायनमः १ ॐ लंकाविध्वंसनायशिरसेस्वाहा २ ॐ अंजनीगर्भसंभूतायशिखायैवषट् ३ ॐ शाकिनीडाकिनीविध्वंसनायकवचायहुं ४ ॐ किलकिलबुभुक्कारेणविभीषणायहनुमद्देवायनेत्रत्रयायवौषट् ५ ॐ ह्रींश्रीं

ह्रौंह्रांफट्स्वाहाअस्त्रायफट् ६ ॥ ॥ अथ पंचाशद्वर्णमातृकान्यासः ॥ ॐ ह्रींहनुमतेअंनमः शिरसि १ ॐ ह्रींहनु
मतेआंनमः मुखवृत्ते २ ॐ ह्रींहनुमतेइंनमः दक्षनेत्रे ३ ॐ ह्रींहनुमतेईनमःवामनेत्रे ४ ॐ ह्रींहनुमतेउंनमः दक्ष
कर्णे ५ ॐ ह्रींहनुमतेऊंनमः वामकर्णे ६ ॐ ह्रींहनुमते ऋं नमः दक्षनासे ७ ॐ ह्रींहनुमते ॠंनमःवामनासे ८
ॐ ह्रींहनुमनेऌंनमःदक्षगंडे ९ ॐ ह्रींहनुमतेॡंनमःवामगंडे १० ॐ ह्रींहनुमतेएंनमःऊर्ध्वोष्ठे ११ ॐ ह्रींहनु
मतेऐंनमःअधरोष्ठे १२ ॐ ह्रींहनुमतेओंनमःऊर्ध्वदंतपंक्तौ १३ ॐ ह्रींहनुमतेऔंनमःअधोदंतपंक्तौ१४ ॐ ह्रीं
हनुमतेअंनमःमूर्ध्नि१५ॐ ह्रींहनुमतेअःनमःअस्थि१६ॐ ह्रींहनुमतेकंनमःदक्षबाहुमूले१७ॐ ह्रींहनुमतेखंनमः
कूर्परे १८ ॐ ह्रींहनुमतेगंनमःमणिबंधे १९ ॐ ह्रींहनुमतेघंनमःदक्षहस्तांगुलिमूले २० ॐ ह्रींहनुमते
ङंनमःदक्षहस्तांगुल्यग्रे २१ ॐ ह्रींहनुमतेचंनमःवामबाहुमूले २२ ॐ ह्रींहनुमतेछंनमःकूर्पंरे २३ ॐ
ह्रींहनुमतेजंनमःमणिबंधे २४ ॐ ह्रींहनुमतेझंनमःवामहस्तांगुलिमूले २५ ॐ ह्रींहनुमतेञंनमःवामहस्तां
गुल्यग्रे २६ ॐ ह्रींहनुमतेटंनमःदक्षपादमूले २७ ॐ ह्रींहनुमतेठंनमःजानुनि २८ ॐ ह्रींहनुमतेडं
नमःगुल्फे २९ ॐ ह्रींहनुमतेढंनमःदक्षपादांगुलिमूले ३० ॐ ह्रींहनुमतेणंनमःदक्षपादांगुल्यग्रे ३१
ॐह्रींहनुमतेतंनमःवामपादमूले ३२ ॐ ह्रींहनुमतेथंनमःजानुनि ३३ ॐ ह्रींहनुमतेदंनमःगुल्फे ३४ ॐह्रींहनु
मतेधंनमःवामपांदागुलिमूले ३५ ॐह्रींहनुमतेनंनमःवामपादांगुल्यग्रे ३६ ॐ ह्रींहनुमतेपंनमःदक्षपार्श्वे ३७
ॐह्रींहनुमतेफंनमःवामपार्श्वे ३८ ॐ ह्रींहनुमतेबंनमःपृष्ठे ३९ ॐ ह्रींहनुमतेभंनमःनाभौ ४० ॐ ह्रींहनुमतेमं

नमः उदरे ४१ ॐ ह्रींहनुमतेयंत्वगात्मनेनमः वामांसे ४२ ॐ ह्रीं हनुमतेरंअसृगात्मनेनमःदक्षांसे ४३ ॐ ह्रीं
हनुमतेलंमांसात्मनेनमःककुदि ४४ ॐ ह्रींहनुमतेवंमेदआत्मनेनमःहृदादिदक्षकरांतम् ४५ ॐ ह्रींहनुमते
शंअस्थ्यात्मनेनमःहृदादिवामकरांतम् ४६ ॐ ह्रींहनुमतेषंमज्जात्मनेनमःहृदादिदक्षपादांतं ४७ ॐ ह्रींहनु
मतेसंशुक्रात्मनेनमःहृदादिवामपादांतं ४८ ॐ ह्रींहनुमतेहंप्राणात्मनेनमःदक्षपादादिहृदयांतम् ४९ ॐ ह्रीं
हनुमतेलंजीवात्मनेनमःवामपादादिहृदयांतम् ५० ॐ ह्रींहनुमतेक्षंपरमात्मनेनमः हृदादिमूर्धांतम् ॥ ५१ ॥
इतिविन्यस्य ॥ ॥ अथांतर्यजनम् ॥ ॥ मूलाधारेमूलविद्यांविद्युत्कोटिसमप्रभाम् ॥ सूर्यकोटिप्रतीका
शांचंद्रकोटिप्रभांप्रिये ॥ १ ॥ बिसतंतुस्वरूपांतांबिंदुत्रिवलयांप्रिये ॥ ऊर्ध्वशक्तिनिपातेनसहजेनवरानने ॥२॥
मूलशक्तिदृढत्वेनमध्यशक्तिप्रबोधतः ॥ परमानंदसंदोहमानंदंचिंतयेत्परम् ॥ ३ ॥ इत्यंतर्यजनंकृत्वा
पीठपूजांकुर्यात् ॥ मूलाधारेआधारशक्त्येनमः । प्रकृत्यैनमः । तत्रागाधसर्वतोमुखसुधाब्धिभ्यांनमः ॥
तत्रकस्मैचित्कमठायनमः । तदुपरिसहस्रफणिफणामंडितमणिप्रकाशिताशेषलोकशेषायनमः । तलायनमः ।
वितलायनमः । सुतलायनमः । रसातलायनमः । तलातलायनमः । महातलायनमः । पातालायनमः । अष्ट
दिग्गजेभ्योनमः । तदुपरिभूमंडलायनमः । सुधांबुधयेनमः । मणिद्वीपायनमः । मेरवेनमः । मेरोर्दक्षिणदि
ग्भागेकस्मैचिद्रत्नसानवेनमः । तन्मध्येसुरतरवेनमः । तन्मूलेचिंतामणिगृहायनमः । तन्मध्येरत्नवेदिकायै
नमः । वेद्यांपूर्वभागेनवरत्नखचितनूतनमणिपीठायनमः । एवंपीठंभावयित्वा ॥ तत्रैवहृदयेस्वाभेदेनश्रीहनु

मंतंध्यायेत् ॥ ध्यायेद्बालदिवाकरद्युतिनिभंदेवारिदर्पापहं देवेंद्रप्रमुखंप्रशस्तयशसंदेदीप्यमानंरुचा ॥ सुग्रीवा
दिसमस्तवानरयुतंसुव्यक्ततत्वप्रियंसंरक्तारुणलोचनंपवनजंपीतांबरालंकृतम् ॥ १ ॥ इतिध्यात्वा । स्वपुरतो
बिंदुत्रिकोणषट्कोणचतुरस्राणिमंडलानिपंक्तिद्वयेनैकेनवादशसंख्याकानिकृत्वातत्राधाराणिसंस्थाप्य । तत्र
प्रथममंडलाधारेशंखपात्रंकलशंवासंस्थाप्यगंगेत्यादिनातीर्थजलंसंपूर्य गंधाक्षतपुष्पाणिप्रणवेननिक्षिप्य हनुम
द्गायत्रीमंत्रेणसंपूज्यधेनुमुद्रांप्रदर्श्य वह्निसूर्यसोमकलाभिः पूजयेत् । रंवह्निमंडलायदशकलात्मनेनमः ।
अंअर्कमंडलायद्वादशकलात्मनेनमः । संसोममंडलायषोडशकलात्मनेनमः । इतिसंपूज्य ॥ ततोद्वितीयादि
मंडलाधारेषुपाद्यपात्रमर्घ्यपात्रं मधुपर्कपात्रमाचमनपात्रं गंधपात्रं पुष्पपात्रमक्षतपात्रं नैवेद्यपात्रंमुखवास
पात्रंसंस्थाप्यतेषुपात्रेषुस्वस्वपदार्थान्संस्थाप्य धूपपात्रंघृततैलदीपंवामेतैलदीपंदक्षेघृतदीपंत्रिकोणषट्कोणयं
त्रोपरिसंस्थाप्यपुरतः शंखंघंटांचसंस्थाप्यसंपूज्य ॥ अथ पाद्यपात्रमादायमूलमुच्चरन्श्रीहनुमद्देवतायैनमः
पाद्यंसमर्पयामि एवंमूलेनार्घ्यं मूलेनमधुपर्कंमूलेनाचमनीयंमूलेनशंखोदकेनघंटानादपुरःसरेणस्नानमभिषे
कंचकृत्वाशुद्धदुकूलवस्त्रेणांगंप्रोञ्छ्यविचित्रपटवस्त्रकुंकुमकेसरकस्तूरीचंदनसिंदूरमुकुटकुंडलहारनूपुरादिना
नालंकारान्मूलेनदत्वा॥पुनराचमनीयंदत्व॥ततोमध्यमानामांगुष्ठाग्रैर्गंधोनमः इतिगंधम् ॥ अंगुष्ठतर्जनीभ्यांपु
ष्पाणिवौषट् इतिपुष्पैः संपूज्य॥अथ यंत्रकेसरेष्वंगपूजा॥हनुमतेनमः पादौपूजयामि।सुग्रीवसखाय०गुल्फौ०
अंगदमित्राय० जंघे०। रामदासाय० ऊरू०। अक्षघ्नाय० कटिं०। लंकादहनाय०वालधिं० । राममणिदाय०

नाभिं०।सागरोल्लंघनाय० मध्यमं०। लंकामर्दनाय० केशावलिं० । संजीवनाहर्त्रे० स्तनौ० । सौमित्रिप्राणदा
य० वक्षः०। कुंठितदशकंठाय० कंठं० । रामाभिषेककारिणे० हस्तौ० । मंत्ररचितरामायणाय० वक्रं० ।
प्रसन्नवदनाय० वदनं० । पिंगनेत्राय० नेत्रे० । श्रुतिपारगाय० श्रुतिं० । ऊर्ध्वपुंड्रधारिणे० कपोलं० । मणि
कंठमालिने० शिरः० । सर्वाभीष्टप्रदाय० सर्वांगंपूजयामि॥ इत्यंगपूजां प्रथमावरणार्चनंविधाय॥ ॥ अथा
वरणपूजांकुर्यात् ॥ अथाष्टदलेषुपूर्वादिक्रमेण । रामभक्तायनमः रामभक्तपादुकां पूजयामितर्पयामि १ महा
तेजसेनमः महातेजःपादुकां पू० त० २ कपिराज्ञेनमः कपिराजपादुकां पू० त० ३ महाबलायनमः महाबल
पादुकां पू० त० ४ द्रोणाद्रिहारकायनमः द्रोणाद्रिहारकपादुकां पू० त० ५ मेरुपीठिकार्चनकारकायनमः
मेरुपीठिकार्चनपादुकां पू० त० ६ दक्षिणाशाभास्करायनमः दक्षिणाशाभास्करपादुकां पू० त० ७ सर्वविघ्न
निवारकायनमः सर्वविघ्ननिवारकपादुकां पू० त० ८ इति द्वितीयावरणम् ॥ पुनः तद्वहिश्चाष्टदलेषु पूर्वादि
क्रमेण ॥ सुग्रीवायनमः सुग्रीवपादुकां पू० त० १ अंगदायनमः अंगदपादुकां पू० त० २ नीलायनमः नील
पादुकांपू० त० ३ जांबवतेनमः जांबवत्पादुकांपू० त० ४ नलायनमःनलपादुकांपू० त० ५ सुषेणायनमः
सुषेणपादुकांपू० त० ६ द्विविदायनमःद्विविदपादुकांपू० त० ७ मैंदायनमःमैंदपादुकांपू० त० ८ इतितृतीया
वरणम् ॥ पुनःचतुरस्रेदशदिक्षुपूर्वादिक्रमेण॥ इंद्रायनमःइंद्रपादुकांपू० त० १ अग्नयेनमःअग्निपादुकांपू० त०
२ यमायनमःयमपादुकांपू० त० ३ निर्ऋतयेनमःनिर्ऋतिपादुकांपू० त० ४ वरुणायनमःवरुणपादुकांपू० त०

५ वायवेनमः वायुपादुकांपू० त० ६ कुबेरायनमः कुबेरपादुकांपू० त० ७ ईशानायनमः ईशानपादुकांपू० त०८
ब्रह्मणेनमः ब्रह्मपादुकांपू० त० ९ अनंतायनमः अनंतपादुकांपू० त० १० इतिचतुर्थावरणम् ॥ इतिपुष्पाक्षता
दिभिरावरणपूजांविधाय ॥ धूपपात्रंफट्इतिसंपूज्यपुरतःस्थापयित्वावामतर्जनींस्पृशन्श्रीपात्रामृतेनधूपंनिवे
दयामिनिवेद्य ॥ वामेनपाणिनाघंटांवादयन्मध्यमानामिकांगुष्ठैर्धूपंधृत्वागायत्र्यामूलमंत्रेणत्रेधाधूपयेत्॥ततो
दीपंसंमुखेसंस्थाप्यपूर्ववत्प्रोक्षणंपूजनंकृत्वा । वाममध्यमयादीपपात्रंस्पृशन्दीपंनिवेदयामीतिनिवेद्यवामेनपा
णिनाघंटांवादयन्मध्यमानामिकामध्येदीपपात्रमंगुष्ठेनधृत्वादर्शयन्गायत्रींमूलंचपठन्दीपंनिवेदयेत् ॥ ततो
नानानैवेद्यंस्वर्णरजतादिपात्रेनिक्षिप्यहमित्यवगुंठ्य । धेनुमुद्रयाऽमृतीकृत्यनैवेद्यपात्रंस्पृशन्गायत्रींमूलमंत्रंच
पठन्दक्षानामिकांगुष्ठाभ्यामुत्सृजेत् । ततःपुनराचमनीयंदत्वामूलेनकर्पूरादिसुवासितंतांबूलंनिवेदयामीति
दत्वा ॥ अत्रावसरेकेचनआवरणपूजांकुर्वंति ॥ अस्तु ॥ वीरेभ्योबलिदानंदत्वाआरार्त्तिकंकृत्वामंत्रपुष्पंदत्वा
क्षमाप्यसंप्रार्थ्यकवचंपठित्वामालांसंपूज्यप्रतिदिनंयथासंकल्पितंतत्संख्याकंनतुन्यूनाधिकंजपंकृत्वा । जपंनि
वेद्यसहस्रनामस्तोत्रंस्तवराजादिकंचपठित्वादेवंनमस्कृत्यवैश्वदेवंकृत्वामौनेनभोजनंकुर्यादितिनित्यार्चनवि
धिः॥१॥इतिश्रीहरिकृष्णविनिर्मितेबृ० ध० उपासनास्तबकेहनुमदुपासनाध्यायेहनुमत्पद्धतिनिरूपणंनामप्रक
रणंचतुर्दशम् ॥१४॥ अथहनुमद्दीपदानपूजापद्धतिः॥ ॥आचम्यप्राणानायम्य देशकालौस्मृत्वा॥ममइहजन्म ॥ ४० ॥
निजन्मांतरेचक्षिप्रामुकफलावाप्त्यर्थंश्रीरामरूपीहनुमद्देवताप्रीत्यर्थंमंत्रसिद्ध्यर्थं पंचपलैकतैलेनवायथाशक्त्यापं

चपलमानताम्रपात्रेणएकविंशतितंतुनिर्मिताभिस्त्रिभिर्वर्त्तिभिर्नित्यदीपदानमहंकरिष्य इतिसंकल्प्य॥सुमुखश्चै
कदंतश्चेतिपठित्वा॥पुण्याहंवाचयित्वा॥गणेशंसंपूज्य॥गुरुचरणारविंदंध्यात्वानमस्तेनाथेतिसंस्तुत्य॥भक्त्यास
मागतोहंतेपादयोर्भक्तवत्सल ॥ दीपकार्यंचभवतांसंपाद्यंवैनमोनमः ॥ इत्याज्ञांगृहीत्वा॥ कपिलागोमयोपलिप्त
भूमौदीपयंत्रंविलिख्यरक्तचंदनरक्ततंडुलैस्तद्यंत्रंसंपूर्य ॥ यद्वाधातुनिर्मितयंत्रंगोमयोपलिप्तभूमौनिधायतन्म
ध्येश्रीरामरूपीहनुमद्दीपयंत्रराजायनमः ॥ मूलंदीपप्रियायश्रीहनुमतेत्रिरावृत्तिः नमः ॥ अग्नीशासुरवायव्ये
षुहृदयादि॰ संपूज्य ॥ दिक्ष्वस्त्रंचसंपूज्य ॥ यंत्रराजमहाराजहनुमान्प्रियकारक ॥ दीपंस्थापयमद्दत्तंमत्का
मान्परिपूरय ॥ इतियंत्रराजंसंप्रार्थ्य ॥ ॐ हौंरामदूतायविद्महे । वायुपुत्रायधीमहि ॥ तन्नोहनुमत्प्रचोद
यात् ॥ १ ॥ इतिगायत्रीमंत्रेणपात्रमभिमंत्र्यतेनैवमूलपूर्वेणदीपपात्रंयंत्रोपरिस्थापयेत्॥ॐ ह्रांह्रींह्रूंहनुमताय
एहिएहिममसन्निहितंकुरुकुरुस्वाहा ॥ १ ॥ अनेनशुद्धतैलेनपूरयामिजगत्पते ॥ श्रीहनूमन्महावीर्यकार्यंसा
धयमेहित॥ २ ॥ एतिमंत्रेण दीपपात्रंतैलेनापूर्य ॥ तत्रचतुरंगुलांसूक्ष्माग्रांस्थूलमूलांस्वर्णादिशलाकांदक्षिणतः
क्षिप्त्वा ॥ ॐ हौंहनुमन्वर्त्तिकल्पयकल्पयस्वाहा ॥ कन्याकरस्पर्शितेयथातंतुनिर्मितेवर्त्तिकेश्रीहनुमतेइष्टा
न्मत्कामान्परिपूरयेतिवर्त्तिंदीपांतरेनिक्षिप्य ॥ ॐ हौंहनुमन्संधुक्ष्वममईप्सितं सिद्धयतुस्वाहा ॥ श्रीहनूम
न्महावीर्ययोगज्वलितविग्रह ॥ भवसन्निहितोदेवज्वालारूपेणवर्त्तिषु ॥ १ ॥ ॐ ह्रांह्रींह्रूंश्रीहनुमन्ममसमीहि
तंउद्दीपय २ हुंफट्स्वाहा रामप्रियायहनुमतेवातात्मजाय ॥ यथादीपयतेदीपंतथाकार्यंप्रदीपय ॥ इतिप

ठित्वा ॥ मूलपूर्वकंगायत्र्याप्रज्वाल्यमूलगायत्रीभ्यांत्रिधाभिमंत्र्यप्राणप्रतिष्ठांकुर्यात् ॥ ॐ आं ह्रीं क्रों यं रं लं
वं शं षं सं हं ळं क्षं हं सः सोहं दीपस्यप्राणाइहप्राणाः॥पुनस्तान्युच्चार्यदीपस्यजीवइहस्थितः ॥ पुनस्तान्युच्चार्य
दीपस्यसर्वेन्द्रियाणिपुनस्तान्युच्चार्यदीपस्यवाङ्मनश्चक्षुश्रोत्रघ्राणप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा ॥ इति
त्रिः पठित्वापुनस्तस्मिन्नेवहनुमत्प्राणप्रतिष्ठांकृत्वा ॥ पुनश्चअकारादिक्षकारांतंमातृकयामूलेन गायत्र्याचा
भिमंत्र्यगंधादिदत्वान्यासंकुर्यात्॥ मूलेनप्राणायामत्रयंकृत्वा ॥ ॐ अस्यश्रीद्वादशवर्णात्मकहनुमन्मंत्रस्य ॥
रामचंद्रऋषिः ॥ जगतीछंदः ॥ हनुमान् देवता ॥ ह्सौंबीजम् ॥ ह्स्ख्फ्रेंशक्तिः ॥ ह्रौंकीलकम् ॥ दीपपूजने
विनियोगः ॥ रामचंद्रऋषयेनमः शिरसि ॥ जगतीछंदसेनमः मुखे ॥ हनुमद्देवतायैनमः हृदि ॥ ह्सौंबीजायनमः
गुह्ये॥ह्स्ख्फ्रेंशक्तयेनमःपादयोः॥ ह्रौंकीलकायनमः सर्वांगे ॥ इतिऋष्यादिन्यासः ॥ ह्रौं अंगु० ह्स्फ्रेंतर्ज०॥ ख्फ्रें
मध्य०॥ ह्स्रौंअना०॥ ह्स्ख्फ्रेंकनि०॥ ह्सौंकर०॥ इतिकरन्यासः॥ ह्रौंहृदयायनमः ह्स्फ्रेंशिरसेस्वाहा ॥ ख्फ्रें
शिखायैवषट् ॥ ह्स्रौंकवचायहुम् ॥ ह्स्ख्फ्रेंनेत्रत्रयायवौषट् ॥ ह्सौं अस्त्रायफट् ॥ इतिहृदयादिन्यासः ॥ मूले
नसर्वांगे॥अथांगन्यासः ॥ ह्रौंनमः मूर्ध्नि ॥ ह्स्फ्रेंनमः भाले ॥ ख्फ्रेंनमः नेत्रयोः ॥ ह्स्रौंनमः मुखे ॥ ह्स्ख्फ्रेंनमः
कंठे ॥ह्सौंनमः हस्तद्वये ॥ अथाक्षरन्यासः ॥ हनुमतेनमः जंघयोः ॥ नमोनमः पादयोः ॥ हंनमः हृदि ॥ नुंनमः
उदरे ॥ मंनमः नाभौ ॥ तेंनमः लिंगे ॥ नंनमः जान्वोः ॥ मंनमः पादयोः ॥ मूलेनव्यापकंविधाय ॥ अथध्या
नम्॥अस्यश्रीहनुमद्दीपदानमालामंत्रस्यरामचंद्रऋषिः हनुमान्देवतादीपप्रदानेप्रयोगसिद्ध्येजपेविनियोगः॥

रांरींरूंरैंरौंरः इत्यनेनकरपडंगन्यासौकृत्वा ॥ ॐ हनुमंतायअनाथनाथायअनंतबाहवेसेतुबंधनायरामप्रियायवायुपुत्रायअंजनीगर्भरत्नायइमंदीपंगृह्ण २ रक्ष २ दुष्टान्नाशय २ पातय २ घातय २ शत्रून्जहि २ ॐ ह्रीं किलि २ बुभुक्कारेण ॐ स्वाहा ॥ मालामंत्रंकार्यपरत्वेनयोजयित्वादीपदेवंमानसैरुपचारैःसंपूज्य ॥ अद्यपूर्वोच्चरितएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममनिखिलोपद्रवशांतिपूर्वकंसकलाभीष्टसिद्ध्यर्थंश्रीरामरूपिहनुमद्देवताप्रीत्यर्थंपंचपलैकंवायथाशक्त्यातैलनिर्मितंपंचपलमितताम्रपात्रस्थितंनित्यदीपंश्रीहनुमंतायसंप्रददेनमम ॥ इत्युक्त्वासाक्षतंजलंदक्षिणहस्तेनादायमूलंगायत्रींचोच्चार्य ॥ ॐ ऐंइत्यादिद्वादशवर्णान्हनुमंतायअनाथनाथायअनंतबाहवेसेतुबंधनायरामप्रियायवायुपुत्रायअंजनीगर्भरत्नाय ह्रूं ह्रौंइमंदीपंगृह्ण २मां रक्ष २दुष्टान्नाशय २ पातय २ घातय २ शत्रून्जहि २ ॐ ऐंश्रीं ह्रां ह्रीं ह्रूं ह्रौं ह्रस्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं स्वाहाअनेनदीपवर्येणपश्चिमाभिमुखेनमांरक्ष २ ममवरप्रदानायह्रूं३ह्रीं३क्लीं३स्वाहा॥जलंभूमौक्षिप्त्वा॥उदङ्मुखोभूत्वाकरौसंपुटीकृत्य ॥ ॥ॐ तंथंदंधंनंपंफंबंभंमंॐ स्वाहा ॥ सकृज्जपेत ॥ मूलमंत्रस्यपूर्वोक्तन्यासान्विधाय॥व्यग्रताऽऽलस्यनिष्ठीवक्रोधपैशुन्यपादप्रसारणादिविधुरःशनैरोष्ठौचालयन् । ध्यानानुरक्तचेतामध्यमामध्यपर्वणिमालांसंस्थाप्यमेरुमनुलंघयन् । अष्टोत्तरशतंजपेत् ॥ ततोदीपेपुष्पांजलीन्दत्वापूजामारभेत ॥ दीपाग्रेयंत्रंलिखेत् । तन्मध्येमूलेनहनुमंतंसंपूज्य । अग्निनैर्ऋत्यवायव्येशानकोणेषुहृदयादीन्संपूज्य । स्वाग्रेनेत्रदिक्ष्वस्त्रंचसंपूज्य ॥ ॥ मूलेनाधारंप्रक्षाल्यलिखितपीठेनिधाय ॥ ॥ मूलेनाभिमंत्र्य । मंवह्निमंडलायधूम्रार्चिरादिदश

कलात्मनेश्रीहनुमतेविशेषार्घः ॥ अर्घपात्राधारायनमः ॥ इतिसंपूज्यअस्त्रेणशंखंप्रक्षाल्य ॥ ॥ मूलेनासाद्य ॥
ॐ अर्कमंडलायतपिन्यादिद्वादशकलात्मनेश्रीहनुमंतायसामान्यार्घपात्रायनमः ॥ इतिसंपूज्य ॥ ॐ मूले
नलोमविलोममातृकयापरमामृतबुद्ध्याशुद्धजलेनापूर्य ॥ तत्रअकथादित्रिरेखांत्रिकोणंसंचिंत्य ॥ हृदयायनमः
इतिसंपूज्य । ॐ संसोमायकामप्रदायामृतादिषोडशकलात्मनेहनुमतेर्घामृतायनमः ॥ इतिसंपूज्य ॥ अंकुश
मुद्रयासूर्यमंडलात्तीर्थानावाह्य ॥ तज्जलेनिक्षिप्यमूलेनाष्टवारमभिमंत्र्य ॥ गंधाद्यैरभ्यर्च्य ॥ धेनुमुद्रयाऽ
मृतीकृत्य ॥ कवचेनावगुंठ्य ॥ मत्स्यमुद्रयाच्छाद्यास्त्रेणसंरक्षणम् ॥ शंखचक्रगरुडसंकलीकरणमुद्राःप्रदर्श्य॥
तज्जलेनदेवमात्मानंपूजाद्रव्याणिचसंप्रोक्ष्य ॥ अनेनैवचक्रमेणपाद्याचमनीयमधुपर्कपात्राणिसंस्थाप्य॥पूज्य
पूजकयोर्मध्येविशेषार्घ्यपात्रंसंस्थाप्य ॥ तेषुसर्वेषुशंखजलबिंदुंनिक्षिप्य ॥ आत्मानमिष्टदेवतारूपंसंचिंत्य ॥
मूलेनमूर्ध्निहृदयेगुह्येपादयोःसर्वांगेपंचपुष्पांजलीन्दत्वा॥प्राणायामत्रयपूर्वकंऋष्यादिन्यासान्विधाय॥दीपपीठे
आधारशक्त्यादिपरतत्वांतेभ्योहनुमंतायपार्षदेभ्योदेवेभ्योनमः ॥ इतिपुष्पादिनासंपूज्य॥पीठस्याष्टदलेषुविम
लादिशक्तिभ्योनमः ॥ इत्येताःसंपूज्य ॥ पुष्पांजलिमादाय ॥ ॐ नमोहनुमतेसर्वभूतात्मनेवायुनंदनायसर्वात्म
संयोगयोगपद्मपीठात्मनेनमः ॥ इतिसमस्तपीठंसंपूज्य ॥ पुष्पांजलिमादाय ॥ मूलमंत्रांते ॥ एहिएहिहनुम
न्महावीरामितद्युते ॥ सांगायावाहयेशीघ्रंसान्निध्यंकुरुसिद्धये ॥ १ ॥ देवेशभक्तिसुलभपरिवारसमन्वित ॥ याव ॥ ४२ ॥
त्त्वांपूजयिष्यामितावत्त्वंसुस्थिरोभव ॥२॥ आवाहनादिनवमुद्राः प्रदर्श्य ॥ षोडशोपचारैः पूजयेत् ॥ तद्यथा॥

मूलंगायत्रींचोच्चार्य । सांगायसायुधायसवाहनायसपरिवाराय सशक्तिकायश्रीरामरूपिहनुमंतायआसनं
परिकल्पयामिनमः ॥ १ ॥ एवमनेनैवमंत्रेणयावदुपचारानुपचरेत् ॥ ॥ मू॰ गा॰ सां॰ स्वागतम् ॥
सुस्वागतम् ॥ २ ॥ मू॰ गा॰ सां॰ पाद्यम् ॥ ३ ॥ मूलं॰ गा॰ सां॰ अर्घ्यम्॰ ॥ ४ ॥ मू॰ गा॰ सां॰ आचम
नीयम्॰ ॥ ५ ॥ मू॰ गा॰ सां॰ मधुपर्कम्॰ ॥६॥ मू॰ गा॰ सां॰ रत्नपादुकां॰ ॥७॥ मू॰ गा॰ सां॰ पंचामृत
स्नानम्॰ ॥८॥ मू॰ गा॰ सां॰ शुद्धस्नानं॰ ॥९॥ मू॰ गा॰ सां॰ आचमनीयं॰ ॥१०॥ मू॰ गा॰ सां॰ दिव्य
वस्त्रयुगुलं॰ ॥ ११ ॥ मू॰ गा॰ सां॰ नानालंकाराणि॰ ॥१२॥ मू॰ गा॰ सां॰ यज्ञोपवीतं॰ ॥ १३ ॥ मू॰ गा॰
सां॰ रत्नसिंहासनं॰ ॥ १४ ॥ मू॰ गा॰ सां॰ कनिष्ठिकयागंधं॰ ॥ १५ ॥ मू॰ गा॰ सां॰ पुष्पं॰ ॥ १६ ॥
मू॰ गा॰ सां॰ धूपं॰ ॥ १७ ॥ मू॰ गा॰ सा॰ दीपं॰ ॥ १८ ॥ मू॰ गा॰ सां॰ नैवेद्यं॰ ॥ १९ ॥ मू॰ गा॰
सां॰ मध्येपानीयम्॰॥२०॥ मू॰ गा॰ सां॰उत्तरापोशनं॰ ॥२१॥ मू॰ गा॰ सां॰तांबूलं॰॥२२॥ इत्युपचर्य ॥
पूजितोसियथाशक्तियथालब्धोपचारकैः॥ अनुज्ञांभगवन्देहिपरिवारार्चनायमे ॥ १ ॥ अथ पीठपूजाप्रारंभः ॥
आंआधारशक्त्यैनमः॥ मूंमूलशक्त्यैनमः ॥ कूंकूर्मायनमः ॥ वंवराहायनमः ॥ भूंभूम्यैनमः ॥ क्षींक्षीरसागराय
नमः ॥ रंरत्नमंडपायनमः॥ पांपारिजातायनमः ॥ रंरत्नसिंहासनायनमः ॥ पीठेपूर्वादिदिक्षु ॥ धंधर्मायनमः॥
ज्ञांज्ञानायनमः ॥ वंवैराग्यायनमः ॥ ऐंऐश्वर्यायनमः ॥ अग्न्यादिकोणेपु ॥ अं अग्नयेनमः ॥ अं अधर्माय
नमः ॥ अं अवैराग्यायनमः ॥ अं अनैश्वर्यायनमः ॥ सं सत्वायनमः ॥ रंरजसेनमः ॥ तं तमसेनमः ॥ मां

मायातत्वायनमः ॥ विं विद्यातत्वायनमः ॥ कं कलातत्वायनमः ॥ आं आत्मनेनमः ॥ अं अन्तरात्मने
नमः । पं परमात्मनेनमः ॥ ह्रीं ज्ञानात्मनेनमः ॥ चं चंद्रमंडलायनमः ॥ सूं सूर्यमंडलायनमः ॥ सों सोम
मंडलायनमः ॥ विं विमलायैनमः ॥ ॐ उत्कर्षायैनमः ॥ ज्ञां ज्ञानायैनमः । क्रीं क्रियायैनमः । यों योगायैन
मः ॥ प्रं प्रकृत्यैनमः ॥ शं शक्त्यैनमः ॥ ईं ईशानायैनमः ॥ अं अनुग्रस्तायैनमः ॥ ॥ इतिपीठंसंपूज्य ॥ ॥ अथा
वरणपूजा ॥ ॥ केसरेपुहृदयाय० शिं शिरसे० शीं शिखायै० कं कवचाय० नं नेत्रत्रयाय० अं अस्त्राय० गंधाक्ष
तैरभ्यर्च्य ॥ अभीष्टसिद्धिंमेदेहिशरणागतवत्सल ॥ भक्त्यासमर्पयेतुभ्यंप्रथमावरणार्चनम् ॥१॥ पुष्पांजलिंदत्वा
हस्तौप्रक्षाल्य ॥ अष्टदलपत्रेपु ॥ रामभक्ताय० महातेजाय० कपिराजाय० महाबलाय० द्रोणाद्रिहारकाय०
मेरुपीठिकार्चनाय० दक्षिणाशाभास्कराय० सर्वविघ्ननिवारकाय० गंधाक्षतैरभ्यर्च्य ॥ अभीष्टसिद्धिंमेदेहि०॥
द्वितीयावरणार्चनम् ॥ २ ॥ पुष्पांजलिंदत्वाहस्तौप्रक्षाल्य ॥ ॥ पट्कोणेपु॥सुग्रीवाय० अंगदाय० सुषेणाय०
नलाय० नीलाय० जांबवते० प्रहस्ताय० सुवेषाय० गंधाक्षतैरभ्यर्च्य ॥ अभीष्टसिद्धिंमेदेहि०॥तृतीयावरणा
र्चनम् ॥३॥ पुष्पांजलिंदत्वाहस्तौप्रक्षाल्य॥ ॥दलसंधिपु ॥ रक्षोघ्नाय० विशघ्नाय० रिपुघ्नाय० व्याधिघ्नाय० चोर
घ्नाय० भूतघ्नाय०परशस्त्रास्त्रमंत्रघ्नाय० भयघ्नाय० गंधाक्षतैरभ्यर्च्य॥अभीष्टसिद्धिंमेदेहि०॥चतुर्थावरणार्चनम्
॥४॥भूपुरेप्रथमरेखायामष्टदिक्षु॥ऐरावताय० पुंडरीकाय०वामनाय०कुमुदाय०अंजनाय० पुष्पदंताय० सार्व
भौमाय० सुप्रतीकाय० गंधाक्षतैरभ्यर्च्य ॥ अभीष्टसिद्धिंमेदेहि० ॥ पंचमावरणार्चनम् ॥५॥ ॥ भूपुरेद्वितीय

रेखायांपूर्वादिक्रमेण ॥ लंइंद्रायसुराधिपतयेसांगायसपरिवारायनमः १ रंअग्नयेतेजोधिपतयेसां० २ टंयमा
यप्रेताधिपतयेसां०३ क्षंनिर्ऋतयेरक्षोधिपतयेसां०४ वंवरुणायजलाधिपतयेसां०५ यंवायवेप्राणाधिपतयेसां०६
संसोमायनक्षत्राधिपतयेसां० ७ हं ईशानायविद्याधिपतयेसां० ८ पूर्वेशानमध्येआंब्रह्मणेलोकाधिपतयेसां० ९
निर्ऋतिवरुणमध्येह्रींअनंतायनागाधिपतयेसां० १० गंधाक्षतैरभ्यर्च्य ॥ अभीष्टसिद्धिंमेदेहि० ॥ षष्ठावरण
पूजनम् ६॥ ॥ भूपुरेतृतीयरेखायाम्॥वंवज्राय० शंशक्तये० दंदंडाय० खंखड्गाय० पंपाशाय० अंअंकुशाय०
गंगदायै० शूंशूलाय० पंपद्माय० चंचक्राय० गंधाक्षतैरभ्यर्च्य ॥ अभीष्टसिद्धिंमेदेहि०॥ सप्तमावरणार्चनम् ७
इत्यावरणपूजांकृत्वा ॥ धूपदीपनैवेद्यादीनिसमर्प्य ॥ प्रणवादिसबीजान्यायुधानिसंपूज्य ॥ ततोंगदेवताः
प्रधानदेवतायांविलीनाविभाव्य ॥ धूपस्थानंसंपूज्य ॥ मू० गा० सां०ॐ वनस्पतिरसोद्भूतोगंधाढ्योगंधउ
त्तमः ॥ आघ्रेयः सर्वदेवानांधूपोयंप्रतिगृह्यताम् ॥१॥ धूपं०॥ दीपपात्रंसंपूज्य वाममध्यमयास्पृष्ट्वा ॥ मू०गा०
सां० ॐ सुप्रकाशोमहादीपःसर्वतस्तिमिरापहः ॥ सबाह्याभ्यंतरज्योतिर्दीपोयंप्रतिगृह्यताम् ॥ २ ॥ दीपं० ॥
अथनैवेद्यम् ॥ वमितिअमृतजलेनान्नंस्वर्णादिपात्रेनिधाय ॥ तत्पात्रंत्रिकोणवृत्तचतुरस्रमंडलेनिधाय ॥ तुलसीं
दत्वा ॥ मूलेनशंखांबुनाप्रोक्ष्य ॥ धेनुमुद्रयाजलममृतीकृत्य । चक्रमुद्रयासंरक्ष्य ॥ अस्त्रेणावगुंठ्य । मूलेनसं
क्षोभ्य ॥ गायत्र्याभिमंत्र्य ॥ वंअमृतात्मकंवामांगुष्ठेनपात्रंस्पृशन् ॥ अमृतोपस्तरणमसिस्वाहा ॥ इतिजलं
दत्वा । मू०गा०सां० ॐ सत्पात्रसिद्धंसुहविर्विविधानेकभक्षणम्॥ निवेदयामितेदेवसानुगायजुपस्वभो ॥ ३ ॥

नैवेद्यं० ॥ ॐ प्राणायस्वाहेत्यादिप्राणादिपंचमुद्राः प्रदर्श्य ॥ ग्रासमुद्राश्चप्रदर्श्य ॥ देवंभुंजानंध्यायनक्षणं मूलमंत्रंजपंस्तिष्ठेत ॥ ततोअमृतोपस्तरणमसिस्वाहेतिउत्तरापोशनंदत्वा ॥ उच्छिष्टान्नंविश्वक्सेनायसमर्प्य ॥ अथनित्यहोमंकुर्यात्॥लौकिकमग्निंप्रोक्ष्य॥पर्युक्ष्य वैदिकक्रमेणसंस्कृत्य॥मूलेनदेवमावाह्य॥गंधपुष्पैः संपूज्य॥ पंचविंशतिघृताक्तान्नाहुतीर्हुत्वा ॐ पीठदेवताभ्यः स्वाहा ॥ ॐ अंगदेवताभ्यः स्वाहा ॥ इति हुत्वा ॥ मूलेनपूर्णाहुतिंदत्वा ॥ मू० गा० सां० शुद्धाचमनं० करोद्वर्त्तनं० मुखवासार्थतांबूलं० आदर्शं० छत्रं० चामरं० सर्वराजोपचारान्० ॥ मू० गा० सां० महानीराजनदीपं० ॥ मू० गा० सां० मंत्रपुष्पं० पंचनमस्कारान्कृत्वा ॥ प्रदक्षिणाचतुष्टयंविधाय० ॥ स्तोत्रैः स्तुत्वा । प्रार्थनास्तोत्रादिभिः प्रार्थयेत् ॥ ततोयथाशक्ति मूलमंत्रं नित्यक्रमसंख्याकंवाजप्त्वा ॥ कवचपाठंकृत्वा भगवतेपूजांजपंचनिवेद्य । गुरवेदक्षिणांसंकल्प्य ॥ विसर्जनमुद्रयां जलौचागतंनासारंध्रद्वाराहृदयंप्रविष्टंभगवंतंविभाव्य । मूलेनपंचांगंविधायगुरुंनमस्कृत्यदेवंसाष्टांगंप्रणम्य ॥ क्षमाप्य ॥ यस्यस्मृत्येत्यादिजपित्वा ॥ परमेश्वरार्पणंकृत्वा ॥ सुहृद्युतोभुंजीत ॥ रचितोहरिरायेणनित्यदीपविधिक्रमः ॥ आब्रह्मस्तंबपर्यंतंदेशिकान्सुखयत्यलम् ॥ १ ॥ इति श्रीहरिकृष्णविनिर्मिते बृ० ध० उपासनास्तबकेहनुमदुपासनाध्यायेहनुमद्दीपदानपूजापद्धतिनिरूपणंनामप्रकरणं पञ्चदशम् ॥ ॥ श्लोकाः १०९ ॥

अथसप्तमुखिहनुमत्कवचम् ॥ ॥ उक्तंचाथर्वणरहस्ये ॥ ॥ ॐ अस्यश्रीसप्तमुखिवीरहनुमत्कवचस्तोत्रमंत्रस्य ॥ नारदऋषिः ॥ अनुष्टुप्छंदः॥श्रीसप्तमुखीकपिः परमात्मादेवता ॥ ह्रांबीजम्॥ह्रींशक्तिः ॥ ह्रूंकीलकम्॥

ममसर्वाभीष्टसिद्ध्यर्थेजपेविनियोगः ॥ ॐ ह्रांअंगु० ॐ ह्रींतर्ज० ॐ ह्रूंमध्य० ॐ ह्रैंअना० ॐ ह्रौंकनि०
ॐ ह्रः कर० एवंहृदयादिन्यासः ॥ अथध्यानम् ॥ वंदेवानरसिंहसर्परिपुवाराहाश्वगोमानुषैर्युक्तंसप्त
मुखैःकरैर्द्रुमगिरिंचक्रंगदांखेटकम् ॥ खट्वांगंहलमंकुशंफणिसुधाकुंभौशराब्जाभयाञ्छूलंसप्तशिखंदधानम
मरैःसेव्यंकपिंकामदम् ॥ ब्रह्मोवाच ॥ सप्तशीर्ष्णः प्रवक्ष्यामिकवचंसर्वसिद्धिदम् ॥ जप्त्वाहनुमतोनित्यं
सर्वपापैः प्रमुच्यते ॥ १ ॥ सप्तस्वर्गपतिःपायाच्छिखांमेमारुतात्मजः ॥ सप्तमूर्धाशिरोऽव्यान्मेसप्तार्चिर्भाल
देशकम् ॥ २ ॥ त्रिःसप्तनेत्रोनेत्रेऽव्यात्सप्तस्वरगतिःश्रुती ॥ नासांसप्तपदार्थोऽव्यान्मुखंसप्तमुखोवतु ॥ ३ ॥ सप्त
जिह्वस्तुरसनांरदान्सप्तहयोवतु ॥ सप्तछंदोहरिःपातुकंठंबाहूगिरिस्थितः ॥ ४ ॥ करौचतुर्दशकरोभूध
रोऽव्यान्ममांगुलीः ॥ सप्तर्षिध्यातोहृदयमुदरंकुक्षिसागरः ॥ ५ ॥ सप्तद्वीपपतिश्चित्तंसप्तव्याहृतिरूपवान् ॥ क
टिंमेसप्तसंस्थार्थदायकःसक्थिनीमम ॥ ६ ॥ सप्तग्रहस्वरूपीमेजानुनीजंघयोस्तथा ॥ सप्तधान्यप्रियःपादौसप्त
पातालधारकः ॥ ७ ॥ पशून्धनंचधान्यंचलक्ष्मींलक्ष्मीप्रदोवतु ॥ दारान्पुत्रांश्चकन्याश्चकुटुंबंविश्वपालकः ॥ ८ ॥
अनुक्तस्थानमपिमेपायाद्वायुसुतः सदा ॥ चौरेभ्योव्यालदंष्ट्रिभ्यःशृंगिभ्योभूतराक्षसात् ॥ ९ ॥ दैत्येभ्योऽप्य
थयक्षेभ्योब्रह्मराक्षसजाद्भयात् ॥ दंष्ट्राकरालवदनोहनुमान्मांसदावतु ॥ १० ॥ परशस्त्रमंत्रतंत्रयंत्राग्निजलवि
द्युतः ॥ रुद्रांशःशत्रुसंग्रामात्सर्वावस्थासुसर्वभृत् ॥ ११ ॥ ॐनमोभगवतेसप्तवदनाय आद्यकपिमुखायवीरह
नुमतेसर्वशत्रुसंहारणाय ठंठंठंठंठंठं ॐनमःस्वाहा ॥ १२ ॥ ॐनमोभगवतेसप्तवदनाय द्वितीयनारसिंहा

स्याय अत्युग्रतेजोवपुषे भीषणाय भयनाशनाय हंहंहंहंहंहंहं ॐनमःस्वाहा ॥ १३ ॥ ॐनमोभगवतेसप्तव
दनाय तृतीयगरुडवक्त्रायवज्रदंष्ट्रायमहाबलाय सर्वरोगविनाशनाय मंमंमंमंमंमंमं ॐनमःस्वाहा ॥ १४ ॥
ॐनमोभगवते सप्तवदनाय चतुर्थक्रोडतुंडायसौमित्रिरक्षकाय पुत्राद्यभिवृद्धिकराय लंलंलंलंलंलंलं ॐनमः
स्वाहा ॥ १५ ॥ ॐनमोभगवते सप्तवदनाय पंचमाश्ववदनाय रुद्रमूर्त्तये सर्ववशीकरणाय सर्वनिगमस्वरूपाय
रुंरुंरुंरुंरुंरुंरुं ॐनमःस्वाहा ॥ १६ ॥ ॐनमोभगवते सप्तवदनाय षष्ठगोमुखाय सूर्यस्वरूपाय सर्वरोगहराय मु
क्तिदात्रे ॐॐॐॐॐॐॐ ॐनमःस्वाहा ॥१७॥ ॐनमोभगवते सप्तवदनाय सप्तममानुषमुखाय रुद्रावता
राय अंजनीसुताय सकलदिग्यशोविस्तारकाय वज्रदेहाय सुग्रीवसाह्यकराय उदधिलंघनाय सीताशुद्धि
कराय लंकादहनाय अनेकराक्षसांतकाय रामानंददायकाय अनेकपर्वतोत्पाटकाय सेतुबंधकाय कपिसैन्य
नायकाय रावणांतकाय ब्रह्मचर्याश्रमिणे कौपीनब्रह्मसूत्रधारकाय रामहृदयाय सर्वदुष्टग्रहनिवारणाय शाकि
नीडाकिनीवेतालब्रह्मराक्षसभैरवग्रहयक्षग्रहपिशाचग्रहब्रह्मग्रहक्षत्रियग्रह वैश्यग्रहशूद्रग्रहांत्यजग्रहम्लेच्छग्र
हसर्पग्रहोच्चाटकाय मम सर्वकार्यसाधकाय सर्वशत्रुसंहारकाय सिंहव्याघ्रादिदुष्टसत्वाकर्षकायैकाहिकादि
विविधज्वरच्छेदकाय परयंत्रमंत्रतंत्रनाशकाय सर्वव्याधिनिकृंतकाय सर्पादिसर्वस्थावरजंगमविषस्तं
भनकराय सर्वराजभयचोरभयाग्निभयप्रशमनायाध्यात्मिकाधिदैविकाधिभौतिकतापत्रयनिवारणाय सर्व
विद्या सर्वसंपत्सर्वपुरुषार्थदायकायासाध्यकार्यसाधकाय सर्ववरप्रदाय सर्वाभीष्टकराय ॐह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः

ॐनमःस्वाहा ॥ १८ ॥ यइदंकवचंनित्यंसप्तास्यस्यहनूमतः ॥ त्रिसंध्यंजपतेनित्यंसर्वशत्रुविनाशनम् ॥ १९ ॥ पुत्रपौत्रप्रदंसर्वसंपद्राज्यप्रदंपरम् ॥ सर्वरोगहरंचायुःकीर्तिदंपुण्यवर्धनम् ॥ २० ॥ राजानंसवशंनीत्वात्रैलोक्यविजयीभवेत् ॥ इदंहिपरमंगोप्यंदेयंभक्तियुतायच ॥ २१ ॥ नदेयंभक्तिहीनायदत्वासनिरयंव्रजेत् ॥ २२ ॥ नामानिसर्वाण्यपिवर्गदानिरूपाणिविश्वानिचयस्यसंति ॥ कर्माणिदेवैरपिदुर्घटानितंमारुतिंसप्तमुखंप्रपद्ये ॥ २३ ॥ इतिश्रीहरिकृष्णविनिर्मिते बृ० ध० उपासनास्तबके हनुमदुपासनाध्यायेऽथर्वणरहस्योक्तं सप्तमुखीहनुमत्कवचनिरूपणं नाम प्रकरणं षोडशम् ॥ १६ ॥ ॥ श्लोकाः ९३ ॥

श्रीगणेशायनमः ॥ श्रीहनुमत्सहस्रनामस्तोत्रम् ॥ रुद्रयामले ॥ कैलासशिखरेरम्येदेवदेवंमहेश्वरम् ॥ ध्यानोपरतमासीनंनन्दिशृङ्गिगणैर्वृतम् ॥ १ ॥ ध्यानान्तेचप्रसन्नास्यमेकान्तेसमुपस्थितम् ॥ दृष्ट्वाशंभुंतदादेवीपप्रच्छकमलानना ॥ २ ॥ देव्युवाच ॥ शृणुदेवप्रवक्ष्यामिसंशयोऽस्तिमहान्मम ॥ रुद्रैकादशमाख्यातंपुराहंनचवेद्मितम् ॥ ३ ॥ कथयस्वमहाप्राज्ञसर्वतोनिर्णयंशुभम् ॥ यमाराधयतोलोकेभुक्तिमुक्तिफलंभवेत् ॥ ४ ॥ मंत्रंयंत्रंतथान्यासंध्यानंचविधिपूजनम् ॥ तत्सर्वंब्रूहिमेनाथकृतार्थाचभवाम्यहम् ॥ ५ ॥ ईश्वरउवाच ॥ शृणुदेविप्रवक्ष्यामिगोप्यंसर्वागमेसदा ॥ सर्वस्वंममलोकानांनृणांस्वर्गापवर्गदम् ॥ ६ ॥ दशविष्णुर्द्वादशार्कास्तेचैकादशसंस्मृताः ॥ रुद्रः परमचंडश्चलोकेस्मिन्भुक्तिमुक्तिदः ॥ ७ हनुमान्समहादेवः कालकालःसदाशिवः ॥ भुक्तिदोमुक्तिकैवल्यमुक्तिदः सर्वकामदः ॥ चिद्रूपीचजगद्रूपस्तथारूपविराडभूत् ॥ ८ ॥ रावणस्यवधार्थायरामस्यच

हितायच ॥ ९ ॥ अंजनीगर्भसंभूतोवायुरूपीसनातनः ॥ यस्यस्मरणमात्रेणसर्वविघ्नंविनश्यति ॥ १० ॥ मंत्रं
तस्यप्रवक्ष्यामिकामदंसुरदुर्लभम् ॥ नित्यंपरतरंलोकेदेवदैत्येषुदुर्लभम् ॥ ११ ॥ प्रणवंपूर्वमुद्धृत्यकामराजं
ततोवदेत् ॥ ॐनमोभगवतेहनुमतेपिततोवदेत् ॥१२॥ ततोवैश्वानरोमायामंत्रराजमिमंप्रिये ॥ एवंबहुतरामंत्राः
सर्वशास्त्रेषुगोपिताः ॥ १३ ॥ येनविज्ञानमात्रेणत्रैलोक्यंवशमानयेत् ॥ वह्निशीतंकरोत्येववातंचस्थिरतांनये
त् ॥ १४ ॥ विघ्नंचनाशयत्याशुदासवत्स्याज्जगत्रयम् ॥ ध्यानंतस्यप्रवक्ष्यामिहनुर्येनप्रसीदति ॥ १५ ॥
प्रदीप्तस्वर्णवर्णाभंबालार्कारुणलोचनम् ॥ स्वर्णमेरुविशालांगंशतसूर्यसमप्रभम् ॥ १६ ॥ रक्ताम्बरधरासीनं
सुग्रीवादियुतंतथा ॥ गोष्पदीकृतवारीशंमशकीकृतराक्षसम् ॥ १७ ॥ पुच्छवन्तंकपीशन्तंमहारुद्रंभयंकरम् ॥
ज्ञानमुद्रालसद्बाहुंसर्वालंकारभूषितम् ॥ १८ ॥ ध्यानस्यधारणादेवविघ्नान्मुक्तःसदानरः ॥ त्रिपुलोकेषुविख्या
तः सर्वत्रविजयीभवेत् ॥ १९ ॥ नाम्नांतस्यसहस्रन्तुकथयिष्यामितेशृणु ॥ यस्यस्मरणमात्रेणवादीमूकोभवे
द्ध्रुवम् ॥ २० ॥ स्तम्भनंपरसैन्यानांमारणायचवैरिणाम् ॥ दारयेच्छाकिनीःशीघ्रंडाकिनाभूतप्रेतकान् ॥
॥ २१ ॥ हरणंरोगशत्रूणांकारणंसर्वकर्मणाम् ॥ तारणंसर्वविघ्नानांमोहनंसर्वयोषिताम् ॥ २२ ॥ धारणंसर्व
योगानांवारणंशीघ्रमापदाम् ॥२३॥ ॐअस्यश्रीहनुमत्सहस्रनामस्तोत्रमंत्रस्यसदाशिवऋषिः ॥ अनुष्टुपछंदः
श्रीहनुमान्देवता ॐक्लींइतिबीजम् नमइतिकीलकम् स्वाहेतिशक्तिः समस्तपुरुषार्थसिद्ध्यर्थंजपेविनियोगः ॥
ओमोंकारनमोरूपमोंनमोरूपपालकः ॥ ॐकारमयोंकारकृदोंकारात्मासनातनः ॥ २४ ॥ ब्रह्मब्रह्ममयो

ब्रह्मज्ञानीब्रह्मस्वरूपवित् ॥ कपीशः कपिनाथश्चकपिनाथःसपालकः ॥ २५ ॥ कपिनाथप्रियःकालः कपिना
थस्यघातकः ॥ कपिनाथःशोकहर्ताकपिभर्त्ताकपीश्वरः ॥ २६ ॥ कपिजीवनदाताचकपिमूर्तिः कपिर्भृतः ॥
कालात्माकालरूपीचकालकालस्तुकालभुक् ॥ २७ ॥ कालज्ञानीकालकर्त्ताकालहानिःकलानिधिः ॥ कलानि
धिप्रियःकर्ताकलानिधिसमप्रभः ॥ २८ ॥ कलापीकलपाताचकीशत्राताकिशांपतिः ॥ कमलापतिप्रियःकाक
स्वरघ्नःकुलपालकः ॥२९॥ कुलभर्ताकुलत्राताकुलाचारपरायणः ॥ काश्यपाह्लादकःकाकध्वंसीकर्मकृतांपतिः ॥
॥३०॥ कृष्णःकृष्णस्तुतिःकृष्णकृष्णरूपोमहात्मवान्॥ कृष्णवेत्ताकृष्णभर्ताकपीनःक्रोधवान्कपिः ॥३१॥ काला
रातिः कुबेरश्चकुबेरवनपालकः ॥ कुबेरधनदाताचकौशल्यानन्दजीवनः ॥३२॥ कौशलेशप्रियःकेतुःकपालीकाम
पालकः ॥ कारुण्यः करुणारूपःकरुणानिधिविग्रहः ॥ ३३ ॥ कारुण्यकर्तादाताचकपिः काव्यःकृतान्तकः ॥
कूर्मःकूर्मपतिःकूर्मभर्ताकूर्मस्यप्रेमवान् ॥३४॥ कुक्कुटः कुक्कुटाह्वानःकुञ्जपःकमलाननः॥कुञ्जरःकलभः केकिनाद
जित्कल्पजीवनः ॥ ३५ ॥ कल्पाभवासीकल्पान्तत्राताकल्पविबोधकः ॥ कलभः कलहस्तश्चकम्पःकम्पपति
स्तथा ॥ ३६ ॥ कर्मफलप्रदःकर्माकमनीयः कलापवान् ॥ कमलासनश्चवंधश्चकमलासनपूजकः ॥ ३७ ॥ कम
लासनसेवीचकमलासनमानितः ॥ कमलासनप्रियः कंबुः कंबुकंठोऽपिकामधुक् ॥ ३८ ॥ किञ्जल्करूपीकि
ञ्जल्कः किञ्जल्काविनिवासकः ॥ खगनाथप्रियः खड्गीखगनाथप्रहारकः ॥ ३९ ॥ खगनाथसुपूज्यश्चखगनाथ
प्रबोधकः॥ खगनाथसुपूज्यश्चखरध्वंसीखरांतकः ॥ ४० ॥ खरारिप्रियबन्धुश्चखरारिजीवनः सदा ॥ खड्गहस्तः

खड्गधनः खड्गहानीचखड्गपः ॥ ४१ ॥ खञ्जरीटप्रियःखञ्जः खञ्जत्राताखमूर्तिमान् ॥ खेचरःखेचरत्राताखेचरा
त्माखरारिजित् ॥ ४२ ॥ खञ्जरीटपतिःपूज्यःखञ्जरीटेवचञ्चलः ॥ खद्योतबन्धुःखद्योतःखद्योतनप्रियःसदा
॥ ४३ ॥ गरुत्मान्गरुडोगोप्योगरुत्मान्गर्वहारकः ॥ गर्विष्टोगर्वहर्ताचगर्वहागर्वनाशकः ॥ ४४ ॥ गर्वोगुणप्रि
योगाणोगुणसेवीगुणान्वितः ॥ गुणत्रातागुणरतोगुणवन्तप्रियोगुणी ॥ ४५ ॥ गणेशोगणपाताचगणरूपोगण
प्रियः ॥ गंभीरोऽथगुणाकारोगरिमागरिमप्रदः ॥ ४६ ॥ गणरक्षोगणहरोगणदोगणसेवितः ॥ गवेशोगवयत्रा
तागर्जितःसगणाधिपः ॥ ४७ ॥ गंधमादनहर्ताचगन्धमादनपूजकः ॥ गन्धमादनसेवीचगंधमादनरूपधृक् ॥
॥ ४८ ॥ गुरुर्गुरुप्रियोगौरोगुरुसेव्योगुरून्नतः ॥ गुरुगीतापरोगीतागीतविद्यागुरुर्गुरुः ॥ ४९ ॥ गीतप्रियोगीतर
तोगीतज्ञोऽगीतवानपि ॥ गायत्र्याजापकोगोष्ठोगोष्ठदेवोऽथगोष्ठपः ॥ ५० ॥ गोपालोगोपदोगोष्ठोगोपीवल्लभ
वत्सलः ॥ गोपीजनप्रियोबंधोगन्धपोगन्धपूजकः ॥ ५१ ॥ गोष्पदीकृतवारीशोगोविन्दोगोपबन्धकः ॥ गोव
र्धनधरोगर्वोगोवर्धनप्रपूजकः ॥ ५२ ॥ गंधर्वोगन्धर्वरतोगंधर्वानंदनंदितः ॥ गन्धोगदाधरोगुप्तोगदा
योगुह्यदेश्वरः ॥ ५३ ॥ गिरिजापूजकोगीश्चगीर्वाणोगोष्पतिस्तथा ॥ गिरिर्गिरिप्रियोगर्वोगर्भपोगर्भवासकः ॥
॥ ५४ ॥ गभस्तिग्रासकोग्रासोग्रासदाताग्रहेश्वरः ॥ ग्रहोग्रहेशपोग्राहोग्रहदोपविनाशनः ॥ ५५ ॥ ग्रहारूढो
ग्रहपतिर्ग्रहणोग्रहणाधिपः ॥ गोलोगव्योगवेष्यश्चगवाक्षोमोक्षदायकः ॥ ५६ ॥ गणोगम्योगणेदातागरुडध्वज ॥ ४७ ॥
वल्लभः ॥ गेहोगेहप्रदोगम्योगीतागानपरायणः ॥ ५७ ॥ गह्वरोगह्वरत्राणोगर्गोगर्गाश्रयप्रदः ॥ गर्गप्रियोगर्ग

रतोगौतमोगौतमप्रदः ॥ ५८ ॥ गंगास्नायीगयानाथोगयापिंडप्रदायकः ॥ गौतमीतीर्थचारीचगौतमीतीर्थपू
जकः ॥ ५९ ॥ गगणेंद्रोगणत्राताग्रंथदोग्रंथकारकः ॥ घनाङ्गोघातकोघोरोघोररूपीघनप्रदः ॥ ६० ॥ घोरदं
ष्ट्रोघोरनखोघोरघातीघनेतरः ॥ घोरराक्षसघातीचघोररूपीघदर्पहा ॥ ६१ ॥ घर्मोघर्मप्रदश्चैवघर्मरूपीघनाघनः
घनध्वनिरतोघंटावाद्यप्रियघृणाकरः ॥ ६२ ॥ घौघोघनस्वनोघूर्णोघूर्णितोऽपिवनालयः ॥ ङकारोङप्रदोङन्तश्चं
द्रिकामोदमोदकः ॥६३॥ चंद्ररूपश्चन्द्रवन्द्यश्चंद्रात्माचन्द्रपूजकः ॥ चंद्रप्रेमश्चन्द्रबिंबश्चामरप्रियचंचलः॥६४॥
चंद्रवक्त्रश्चकोराक्षश्चंद्रनेत्रश्चतुर्भुजः ॥ चंचलात्माचरश्चामीचलत्खञ्जनलोचनः ॥ ६५ ॥ चिद्रूपश्चिन्नपानश्चच
लच्चित्तचितार्चितः ॥ चिदानन्दश्चितश्चैत्रश्चैत्रवंशस्यपालकः ॥ ६६ ॥ छत्रश्छत्रप्रदश्छत्रीछत्ररूपीछिदांछदः ॥
छलहाछलदश्छित्रश्छिन्नघातीक्षपाकरः ॥ ६७ ॥ छद्मरूपीछद्महारीछतीछलतरुस्तथा ॥ छायाकरद्युतिश्छन्द
श्छंदविद्याविनोदकः ॥ ६८ ॥ छिन्नारातिश्छिन्नपापश्छन्दवारणवाहकः॥छन्दश्छत्रहनश्छिप्रश्छवनश्छन्मयः
श्छमी॥६९॥क्षमागारःक्षमाबन्धःक्षपापतिप्रपूजकः॥छलघातीछिद्रहारीछिद्रान्वेषणपालकः ॥७०॥ जनोजनार्द
नोजेताजितारिर्जितसंगरः॥जितमृत्युर्जरातीतोजनार्दनप्रियोजयः॥७१॥जयदोजयकर्ताचजयपाताजयप्रियः॥
जितेंद्रियोजितारातिर्जितेंद्रियप्रियोजयी ॥ ७२ ॥ जगदानंददाताचजगदानंदकारकः ॥ जगद्वंद्योजगज्जी
वोजगतामुपकारकः ॥ ७३ ॥ जगद्धाताजगद्धारीजगद्बीजोजगत्पिता ॥ जगत्पतिप्रियोजिष्णुर्जिष्णुजिज्जि
ष्णुरक्षकः ॥७४॥जिष्णुवन्द्योजिष्णुपूज्योजिष्णुमूर्तिविभूषितः ॥ जिष्णुप्रियोजिष्णुरतोजिष्णुलोकाभिवासकः

॥७५॥जयोजयप्रदोजायोजायकोजयजाड्यहा॥ जयप्रियोजनानन्दोजनदोजनजीवनः ॥७६॥ जयानन्दोजया
पुष्पवल्लभोजयपूजकः ॥ जाड्यहर्ताजाड्यदाताजाड्यकर्ताजडप्रियः ॥ ७७ ॥ जगन्नेताजगन्नाथोजगदीशोज
नेश्वरः ॥ जगन्मंगलदोजीवोजगत्पावनपावनः ॥ ७८ ॥ जगत्त्राणोजगत्प्राणोजानकीपतिवत्सलः ॥ जान
कीपतिपूज्यश्चजानकीपतिसेवकः ॥ ७९ ॥ जानकीशोकहारीचजानकीदुःखभञ्जनः ॥ यजुर्वेदोयजुर्वेत्ता
यजुःपाठप्रियव्रती ॥ ८० ॥ जिष्णुर्जिष्णुरतोजिष्णुधाताजिष्णुविनाशनः ॥ जिष्णुहाजिष्णुपातातुजिष्णुरा
क्षसघातकः ॥ ८१ ॥ जतीनामग्रगण्यश्चजतीनांवरदायकः ॥ झंझुरोझूर्झनवहोझंझावातनिषेवितः ॥८२॥ झिल्ली
रवस्वनोञन्तोञवर्णोऽञनतोञदः ॥ टकारादिष्टकारान्तष्टवर्णष्टप्रपूजकः ॥ ८३ ॥ टिट्टिभष्टिट्टिभरतष्टिटि
भप्रियवत्सलः ॥ ठकारवर्णनिलयष्ठकारार्णववासितः ॥ ८४ ॥ ठकारवीरनिरतष्ठकारप्रियदर्शकः ॥ डमरु
ध्वनिरतोडंकोडंकिनीप्राणहारकः॥८५॥ डाकिनीवरदाताचडाकिनीभयनाशनः ॥ डिंडिमध्वनिकर्ताचडिम्भो
डिंभातरेतरः ॥ ८६ ॥ ढक्काढक्कानवोढक्कावाद्यढक्कामहोत्सवः ॥ णंत्योणान्तोणवर्णश्चणसेव्योणप्रपूजकः ॥८७॥
तंत्रीतंत्रप्रियस्तल्पस्तंत्रजित्तंत्रवादकः ॥ तंत्रपूज्यस्तंत्ररतस्तंत्रविद्याविशारदः ॥ ८८ ॥ तंत्रमंत्रजयीतं
त्रधारकस्तंत्रवाहकः ॥ तंत्रवेत्तातंत्रकर्तातंत्रयंत्रवरप्रदः ॥ ८९ ॥ तंत्रदस्तंत्रदाताचतंत्रपस्तंत्रदायकः ॥
तत्वदाताचतत्वज्ञस्तत्वस्तत्वप्रकाशकः ॥ ९० ॥ तंद्राचतपनस्तल्पस्तलातलनिवासकः ॥ तपस्तपप्रियस्ताप
त्रयस्तापीतपःपतिः॥९१॥तपस्वीचतपोज्ञातातपत्यामुपकारकः॥तपास्तपोव्रतस्तापीतापदस्तापहारकः॥९२॥

तपःसिद्धिस्तपोऋद्धिस्तपोनिधिस्तपःप्रभुः ॥ तीर्थस्तीर्थरतस्तीव्रस्तीर्थवासीतुतीर्थदः ॥ ९३ ॥ तीर्थपस्तीर्थ
कृत्तीर्थस्वामीतीर्थविरोधकः ॥ तीर्थसेवीतीर्थपतिस्तीर्थव्रतपरायणः ॥ ९४ ॥ त्रिदोषहात्रिनेत्रश्चत्रिनेत्रप्रियपा
लकः ॥ त्रिनेत्रप्रियदासश्चत्रिनेत्रप्रियपूजकः ॥ ९५ ॥ त्रिविक्रमस्त्रिपादूर्ध्वस्तरणिस्तारणिस्तमः ॥ तमोरू
पीतमोध्वंसीतमसस्तमघातकः ॥ ९६ ॥ तमोधृक्तामसस्तप्तस्तमोमालीतमोऽन्तकः ॥ तमोहृत्तमकृत्ता
म्रस्ताम्रौषधिगुणप्रदः ॥ ९७ ॥ तैजसस्तेजसांमूर्तिस्तेजसः प्रतिपालकः ॥ तरुणस्तर्कविद्याचतर्कशास्त्र
विशारदः ॥ ९८ ॥ तिमिङ्गिलस्तत्त्वकर्तातत्त्वदाताचतत्त्ववित् ॥ तत्त्वदर्शीतत्त्वगामीतत्त्वभुक्तत्त्ववाह
नः ॥ ९९ ॥ त्रिदिवंत्रिदिवेशश्चत्रिकालश्चतमिस्रहा ॥ स्थाणुः स्थाणुप्रियस्थाणुः सर्वतोऽपिचवासकः
॥ १०० ॥ दयासिन्धुर्दयारूपोदयानिधिर्दयापरः ॥ दयामूर्तिर्दयादातादयादानपरायणः ॥ १ ॥
देवेशोदेवदोदेवोदेवराजाधिपालकः ॥ दीनबंधुर्दीनदातादीनोद्धरणदिव्यधृक् ॥ २ ॥ दिव्यदेवोदिव्यरूपो
दिव्यासननिवासकः ॥ दीर्घकेशोदीर्घपुच्छोदीर्घसूत्रोऽपिदीर्घभुक् ॥ ३ ॥ दीर्घदर्शीदूरदर्शीदीर्घबाहुस्तु
दीर्घपः ॥ दानवारिर्दरिद्रारिर्दैत्यारिर्डस्स्वभञ्जनः ॥ ४ ॥ दंष्ट्रीदिंडिदंडधरोदंडद्योदंडप्रदायकः ॥ दामोदरप्रि
योदत्तात्रेयपूजकतत्परः ॥ ५ ॥ दूर्वादलपतिर्दर्दुदद्रुरोगविनाशकः ॥ धर्मोधर्माधिपोधर्मीधर्मशास्त्रपरायणः ॥
॥ ६ ॥ धर्मात्माधर्मनेताचधर्मधुक्धर्मधारकः ॥ धर्मध्वजोधर्ममूर्त्तिधर्मराजस्यत्रासकः ॥ ७ ॥ धाताध्येयो
धनोधन्योधनदोधनपोधनी ॥ धनदत्राणकर्ताचधनपप्रतिपालकः ॥ ८ ॥ धरणीधरप्रियोधन्वीधनुष्मान्धनधा

९

रकः ॥ धन्वीसवत्सलोधीरोधातामोदप्रदायकः ॥ ९ ॥ धात्रेशवरदाताचधात्रेशप्रतिपूजकः ॥ धात्रात्माचधरा
नाथोधरानाथप्रबोधकः ॥ १० ॥ धर्मिष्ठोधर्मकेतुश्चधवलोधवलप्रियः ॥ धवलाचलवासीचधेनुदोधेनुपोधनी ॥
॥ ११ ॥ ध्वनिरूपोध्वनिप्राणोध्वनिधर्मप्रबोधकः ॥ धर्माध्यक्षोध्वजोधूम्रोधातुरोधीविरोधकः॥१२॥नारायणो
नरोनेतानदीशोनरवानरः ॥ नदीसंक्रमणोनाढ्योनाढ्यवेत्तानटप्रियः ॥ १३ ॥ नारायणात्मकोनंदीनंदीशृंगीग
णाधिपः ॥ नंदिकेश्वरवर्त्माचनंदिकेश्वरपूजकः ॥ १४ ॥ नरसिंहोनटीनर्मीनखयुद्धविशारदः ॥ नखायुधोन
लोनीलोनलनीलप्रमोदकः ॥ १५ ॥ नवद्वारपुराधारोनवद्वारपुरातनः ॥ नरनारायणस्तुत्योनखनाथमहेश्वरः ॥
॥ १६ ॥ नखदंष्ट्रायुधोनित्योनिराकारोनिरंजनः ॥ निष्कलंकोनिरवद्योनिर्मलोनिर्ममोनगः ॥ १७ ॥ नगरग्रा
मपालश्चनिरंतरनगारिपः ॥ नागकन्याभयध्वंसीनागारिप्रियनागरः ॥ १८ ॥ पीताम्बरः पद्मनाभःपुंडरीका
क्षपावनः ॥ पद्माक्षःपद्मवक्त्रश्चपद्मासनप्रपूजकः ॥ १९ ॥ पद्ममालीपद्मपरःपद्मपूजनतत्परः ॥ पद्मपाणिः पद्म
पादः पुंडरीकाक्षपावनः ॥ २० ॥ पावनः पवनात्माचपवनात्मजपापहा ॥ परःपरतरःपद्मःपरमःपरमात्मकः ॥
॥२१॥ पीतांबरप्रियःप्रेमप्रेमदःप्रेमपालकः ॥ प्रौढः प्रौढतरःप्रेतदोपहाप्रेतनाशकः ॥ २२ ॥ प्रभंजनान्वयःपंच
पञ्चाक्षरमनुप्रियः ॥ पन्नगारिःप्रतापीचप्रपन्नपरदोपहा ॥ २३ ॥ पराभिचारशमनः परसैन्यविनाशकः ॥ प्रति
वादिमुखस्तंभःपुराधारःपुरारिनुत ॥ २४ ॥ पराजितः परब्रह्मपरात्परपरात्परः ॥ पातालगःपुराणश्चपुरातनप्लवं
गमः ॥ २५ ॥ पुराणपुरुपः पूज्यः पुरुषार्थप्रपूरकः ॥ प्लवंगेशः पलाशोऽपिपृथुकः पृथिवीपतिः ॥ २६ ॥

पुण्यशीलःपुण्यराशिः पुण्यात्मापुण्यपालकः ॥ पुण्यकीर्तिः पुण्यगीतिः प्राणदःप्राणपोषकः ॥ २७ ॥ प्रवीण
श्चप्रसन्नश्चपार्थध्वजनिवासकः ॥ पिंगकेशःपिंगरोमाप्रणवःपिंगलप्रणः ॥ २८ ॥ पराशरःपापहर्तापिप्पलाश्रय
सिद्धिदः ॥ पुण्यश्लोकपुरातीतःप्रथमःपुरुषःपुमान् ॥२९॥ पुराधरश्चप्रत्यक्षःपरमेष्ठीपितामहः॥फुल्लारविंदवदनः
फुल्लत्कमललोचनः ॥३०॥फूत्कारःफूत्करःफूश्चफूदमंत्रपरायणः ॥ स्फटिकाद्रिनिवासीचफुल्लेन्दीवरलोचनः ॥
॥३१॥वायुरूपीवायुसुतोवाय्वात्मावामनाशकः॥वनोवनचरोबालोबालत्राताबालकः ॥३२॥ विश्वेशोविश्वनाथ
श्चविश्वात्माविश्वपालकः ॥ विश्वधाताविश्वकर्ताविश्ववेत्ताविशांपतिः ॥३३॥ विमलोविमलज्ञानोविमलानंददाय
कः ॥ विमलोत्पलवक्रश्चविमलात्माविलासकृत्॥३४॥बिंदुमाधवपूज्यश्चबिंदुमाधवसेवकः ॥ बीजोथवीर्यदोबीज
हारीबीजप्रदोविभुः॥३५॥विजयोबीजकर्ताचविभूतिर्भूतिदायकः॥विश्ववंद्योविश्वगम्योविश्वहर्ताविराट्तनुः ३६
तुलकारहताराातिर्वसुदेवोवनप्रदः ॥ ब्रह्मपुच्छोब्रह्मपरोवानरोवानरेश्वरः ॥ ३७ ॥ बलिबंधनकृद्विश्वतेजाविश्व
प्रतिष्ठितः ॥ विभोक्ताचवासुदेवोवीरवीरोवसुंधरः ॥ ३८ ॥ वनमालीवनध्वंसीवारुणोवैष्णवोबली ॥ विभीषण
प्रियोविष्णुसेवीवायुगतिर्विदुः ॥ ३९ ॥ विपश्चावायुवंशश्चवेदवेदांगपारगः ॥ बृहत्तनुर्बृहत्पादोबृहत्कायोबृह
द्यशाः ॥ ४० ॥ बृहन्नासोबृहद्बाहुर्बृहन्मूर्तिर्बृहत्स्तुतिः ॥ बृहद्धनुर्बृहज्जंघोबृहत्कायोबृहत्करः ॥ ४१ ॥ बृहद्गति
र्बृहत्पुच्छोबृहल्लोकफलप्रदः ॥ बृहत्सेव्योबृहच्छक्तिर्बृहद्विद्याविशारदः ॥ ४२ ॥ बृहल्लोकरतोविद्याविद्यादाता
विदिक्पतिः ॥ विग्रहोविग्रहरतोव्याधिनाशीचव्याधिदः ॥ ४३ ॥ विशिष्टोबलदाताचविघ्ननाशोविनायकः ॥

वराहोवसुधानाथोभगवान्भवभंजनः ॥ ४४ ॥ भाग्यदोभयकर्ताचभगोभृगुपतिप्रियः ॥ भव्योभक्तोभरद्वाजो
भवांघ्रिभयनाशनः ॥ ४५ ॥ माधवोमथुरानाथोमेघनादोमहामुनिः ॥ मायापतिर्मनस्वीचमायातीतोमनो
त्सुकः ॥ ४६ ॥ मैनाकवंदितामोदोमनोवेगीमहेश्वरः ॥ मायानिर्जितरक्षाश्चमायानिर्जितविष्टपः ॥ ४७ ॥
मायाश्रयश्चनिलयोमायाविध्वंसकोमयः ॥ मनोयमपरोयाम्योयमदुःखनिवारणः ॥ ४८ ॥ यमुनातीरवासीच
यमुनातीर्थचारणः ॥ रामोरामप्रियोरम्योराघवोरघुनंदनः ॥ ४९ ॥ रामप्रपूजकोरुद्रोरुद्रसेवीरमापतिः ॥ राव
णारीरमानाथोवत्सलोरघुपुंगवः ॥ ५० ॥ रक्षोघ्नोरामदूतश्चरामेष्टोराक्षसांतकः ॥ रामभक्तोरामरूपोराजराजो
रणोत्सुकः ॥ ५१ ॥ लंकाविध्वंसकोलंकापतिघातीलताप्रियः ॥ लक्ष्मीनाथप्रियोलक्ष्मीनारायणात्मपालकः ॥
॥ ५२ ॥ लवणाब्धिहेलकश्चलंकेशगृहभंजनः ॥ ब्रह्मस्वरूपीब्रह्मात्माब्रह्मज्ञोब्रह्मपालकः ॥ ५३ ॥ ब्रह्मवादीचवि
क्षेत्रंविश्वबीजंचविश्वधृक् ॥ विश्वंभरोविश्वमूर्तिर्विश्वाकारोऽथविश्वधृक् ॥ ५४ ॥ विश्वात्माविश्वसेव्योऽथविश्वो
विश्वेश्वरोविदुः ॥ शुक्तः शुक्तप्रदः शुक्तः शुक्तात्माचशुभप्रदः ॥ ५५ ॥ शर्वरीपतिशूरश्चशरभश्चश्रुतिश्रवाः ॥
शाकंभरीशक्तिधरःशत्रुघ्नःशरणप्रदः ॥ ५६ ॥ शंकरःशान्तिदःशांतःशिवःशूलीशिवार्चितः ॥ श्रीरामरूपःश्रीवासः
श्रीप्रदः श्रीकरः शुचिः ॥ ५७ ॥ श्रीशः श्रीदः श्रीकरश्चश्रीकान्तप्रियश्रीनिधिः ॥ षोडशः स्वरसंयुक्तः षोड
शात्माप्रियंकरः॥ ५८ ॥ षडंगस्तोत्रनिरतःषडाननप्रपूजकः ॥ षट्शास्त्रवेत्तापड्बाहुःपट्स्वरूपःपड्र्मिपः ॥५९॥ ॥ ६० ॥
सनातनः सत्यरूपः सत्यलोकप्रबोधकः ॥ सत्यात्मासत्यदाताच सत्यव्रतपरायणः ॥ ६० ॥ सौम्यः

सौम्यप्रदः सौम्योदक्सौम्यः सौम्यपालकः ॥ सुग्रीवादियुतः सर्वः संसारभयनाशनः ॥ ६१ ॥ सूत्रात्मासूक्ष्म
संध्यश्चस्थूलः सर्वगतिः पुमान् ॥ सुरभिः सागरः सेतुः सत्यः सत्यपराक्रमः ॥ ६२ ॥ सत्यगर्भः सत्यसेतुः
सिद्धिस्तुसत्यगोचरः ॥ सत्यवादीसुकर्माचसदानंदैकईश्वरः ॥ ६३ ॥ सिद्धिः साध्यः सुसिद्धिश्चसंकल्पः
सिद्धिहेतुकः ॥ सप्तपातालचरणः सप्तर्षिगणवन्दितः ॥ ६४ ॥ सप्ताब्धिलंघनोवीरः सप्तद्वीपोरुमण्डलः ॥
सप्तांगराज्यसुखदः सप्तमातृनिषेवितः ॥ ६५ ॥ सप्तच्छंदोविधिः सप्तसप्तपातालसंश्रयः ॥ संकर्षणः सह
स्रास्यःसहस्राक्षः सहस्रपात् ॥ ६६ ॥ हनुमान्हर्षदाताचहरोहरिर्हरीश्वरः ॥ क्षुद्रराक्षसघातीचक्षुद्रघ्नः
क्षान्तिदायकः ॥ ६७ ॥ अनादीशोह्यनंतश्चआनंदोऽध्यात्मबोधकः ॥ इंद्रईशोत्तमश्चैवउन्मत्तऋपित्रि
च्छिदः ॥ ६८ ॥ तृवर्णोतृपदोपेतऐश्वर्यऔपधीप्रियः ॥ औपधश्चांशुमांश्चैवअकारः सर्वकारणः ॥ ६९ ॥
इत्येतद्रामदूतस्यनाम्नांचैवसहस्रकम् ॥ एककालंद्विकालंवात्रिकालं श्रद्धयान्वितः ॥ ७० ॥ पठनात्पाठना
द्वापिसर्वसिद्धिर्भवेत्प्रिये ॥ मोक्षार्थीलभतेमोक्षंकामार्थीकाममाप्नुयात् ॥ ७१ ॥ विद्यार्थीलभतेविद्यांवेदव्याक
रणादिकम् ॥ इच्छाकामस्तुकामार्थोधर्मार्थीधर्ममक्षयम् ॥ ७२ ॥ पुत्रार्थीलभतेपुत्रंवरायुस्सहितंपुमान् ॥
क्षेत्रंचबहुसस्यंस्याद्गावश्चबहुदुग्धदाः ॥ ७३ ॥ दुःस्वप्नंचनृभिर्दृष्टंसुस्वप्नमुपजायते ॥ दुःखौघोनश्यतेतस्यसं
पत्तिर्वर्द्धतेचिरम् ॥ ७४ ॥ वस्तुचतुर्विधंतस्यभवत्येवनसंशयः ॥ अश्वत्थमूलेजपतांनास्तिवैरिकृतंभयम् ॥ ७५ ॥
त्रिकालंपठनात्तस्यसिद्धिःस्यात्करसंस्थिता ॥ अर्धरात्रेरवौधृत्वाकंठदेशेनरःशुचिः ॥ ७६ ॥ दशावर्तपठेन्मर्त्यः

सर्वान्कामानवाप्नुयात् ॥ निशान्तेभौमेन्यग्रोधमूलेस्थिलाविचक्षणः ॥७७॥ दशावर्त्तंपठेन्मर्त्यःसार्वभौमःप्रजाय
ते ॥ अर्कमूलेऽर्कवारेतुयोमध्याह्नेशुचिर्जपेत् ॥ ७८ ॥ चिरायुःससुखीपुत्रीविजयीजायतेक्षणात् ॥ ब्राह्मेमुहूर्त्तेचो
त्थायप्रत्यहंचपठेन्नरः ॥७९॥ यंयंकामयतेकामंलभतेतंनसंशयः॥संग्रामेसन्निविष्टानांवैरिविद्रावणंपरम् ॥८०॥
डाकिनीभूतप्रेतेषुग्रहपीडाहरंतथा ॥ ज्वरापस्मारशमनंयक्ष्मप्लीहादिवारणम् ॥ ८१ ॥ सर्वसौख्यप्रदंस्तोत्रंसर्व
सिद्धिप्रदंतथा॥सर्वान्कामानवाप्नोतिवायुपुत्रप्रसादतः॥१८२॥इतिश्रीहरिकृष्णविनिर्मितेबृ० ध० उपासनास्तब
केहनुमदुपासनाध्यायेरुद्रयामलोक्तहनुमत्सहस्रनामस्तोत्रनिरूपणंनामप्रकरणंसप्तदशम्॥१७॥श्लोकाः १११४
अथश्रीमद्धनुमत्स्तवराजः ॥श्रीमद्विष्णवंघ्रिनिष्ठातिगुणगुरुतमश्रीमदानंदतीर्थत्रैलोक्याचार्यपादोज्ज्वलजलज
लसत्पांसवोस्मान्पुनंतु ॥वाचांयत्रप्रणेत्रीत्रिभुवनमहिताशारदाशारदेंदुज्योत्स्नाभद्रस्मितश्रीधवलितककुभाप्रे
मभारंबभार ॥१॥ उत्कंठाकुंठकोलाहलजवविदिताजस्रसेवानुवृद्धप्राज्ञात्मज्ञानधूतांधतमससुमनोमौलिरत्नाव
लीनाम् ॥भक्त्युद्रेकावगाढप्रघटनसघटात्कारसंघृष्यमाणप्रांतप्राग्र्यांघ्रिपीठोत्थितकनकरजःपिंजरारंजिताशाः
॥२॥ जन्माधिव्याध्युपाधिप्रतिहतिविरहप्रापकाणांगुणानामग्र्याणामर्पकाणांचिरमुदितचिदानंदसंदोहदानाम्
एतेषामेषदोषप्रमुषितमनसांद्वेषिणांदूषकाणांदैत्यानामार्त्तिमंधेतमसिविदधतांसंस्तवेनास्तिशक्तः ॥३॥ अस्या
विष्कर्तुकामंकलिमलकलुषेस्मिञ्जनेज्ञानमार्गंवंद्यंचंद्रेंद्ररुद्रद्युमणिफणिवयोनायकाद्यैरिहाद्य ॥ मध्वाख्यं
मंत्रसिद्धंकिमुतकृतवतोमारुतस्यावतारंपातारंपारमेष्ठ्यंपदमपविपदःप्राप्तुरापन्नपुंसाम् ॥ ४ ॥ उद्यद्विद्युत्प्रचं

डानिजरुचिनिकरव्याप्तलोकावकाशोबिभ्रद्धीमोभुजेयोऽभ्युदितदिनकराभांगदार्ढ्यप्रकांडे ॥ वीर्योद्धार्योगदा
ग्र्यामर्यमिहसुमतिंवायुदेवोविदध्यादध्यात्मज्ञाननेतायतिवरमहितोभूमिभूपामणिर्मे ॥ ५ ॥ संसारोत्ताप
नित्योपशमदसदयस्नेहहासांबुपूरप्रोद्यद्विद्यानवद्यद्युतिमणिकिरणश्रेणिसंपूरिताशः ॥ श्रीवत्सांकाधिवासोचि
ततरसरलश्रीमदानंदतीर्थक्षीरांभोधिर्विभिंद्याद्भवदनभिमतंभूरिमेभूतिहेतुः ॥ ६ ॥ मूर्धन्येषोंजलिर्मेदृढतर
मिहतेबध्यतेबंधपाशच्छेत्रेदात्रेसुखानांभजतिभुवि भविष्यद्विधात्रेद्युभर्त्रे ॥ अत्यंतंसंततंत्वंप्रदिशपदयुगेहंससं
तापभाजामस्माकंभक्तिमेकांभगवतउततेमाधवस्याथवायोः ॥ ७ ॥ साभ्रोष्णाभीषुशुभ्रप्रभमभयनभोभूरि
भूभृद्विभूतिभ्राजिष्णुर्भूर्ऋभूणांभवनमपिविभोभेदिवभ्रेबभूवे ॥ येनभ्रूविभ्रमस्तेभ्रमयतुसुभृशंबभ्रुवद्दुर्भृता
शान्भ्रांतिर्भेदावभासस्त्वितिभयमभिभूर्भोक्ष्यतोमायिभिक्षून् ॥ ८ ॥ येमुंभावंभजंतेसुरमुखसुजनाराधितं
तेतृतीयं भासंते भासुरैस्तेसहचरचलितैश्चामरैश्चारुवेषाः ॥ वैकुंठे कंठलग्नस्थिरशुचिविलसत्कांतितारु
ण्यलीलालावण्यापूर्णकांताकुचभरसुलभाश्लेषसंमोदसांद्राः ॥ ९ ॥ आनंदान्मंदमंदाददतिहिमरुतः कुंद
मंदारनंद्यावर्त्तामोदान्दधाना मृदुपदमुदितोद्गीतकैः सुंदरीणाम् ॥ वृंदैरावंद्यमुक्तेंद्वाहिमगुमदनाहींद्रदेवेंद्रसे
व्येमौकुंदे मंदिरेस्मिन्नविरतमुदयन्मोदिनां देवदेव ॥ १० ॥ उत्तप्तात्युत्कटत्विट्प्रकटकटकटध्वानसं
घट्टनोद्यद्विद्युद्व्यूढस्फुलिंगप्रकरविकिरणोत्काथिते बाधितांगान् ॥ उद्गाढं पात्यमाना तमसि ततइतः किंकरैः
पंकिलेतेपंक्तिर्ग्राव्णां गरिम्णाग्लपयति हिभवद्वेषिणोविद्धदाद्य ॥ ११ ॥ अस्मिन्नस्मद्गुरूणां हरिचरण

चिरध्यानसन्मंगलानांयुष्माकंपार्श्वभूमिंधृतरणरणिकस्वर्गिसेव्यांप्रपन्नः ॥ यस्तूदास्तेसआस्तेधिभवम
सुलभक्लेशनिर्मोकमस्तप्रायानंदंकथंचिन्नवसतिसततंपंचकष्टेतिकष्टे ॥ १२ ॥ क्षुत्क्षामान्रूक्षरक्षोरदखरनख
रक्षुण्णविक्षोभिताक्षानामग्नानंधकूपेक्षुरमुखमुखरैःपक्षिभिर्विक्षतांगान् ॥ पूयासृङ्मूत्रविष्ठाकृमिकुलकलिलेत
त्क्षणक्षिप्तशक्त्याद्यस्त्रव्राताार्दितांस्त्वद्विषउपजिहतेवज्रकल्पाजल्का: ॥१३॥ मातर्मेमातरिश्वन्पितरतुलगुरोभ्रा
तरिष्टाप्तबंधोस्वामिन्सर्वांतरात्मन्नजरजरयितर्जन्ममृत्य्वामयानाम्॥ गोविंदेदेहिभक्तिंभवतिचभगवन्नूर्जितांनि
र्निमित्तांनिर्व्याजांनिश्चलांसद्गुणगणबृहतींशाश्वतीमाशुदेव ॥ १४ ॥ विष्णोरत्युत्तमत्वादखिलगुणगणैस्तत्र
भक्तिंगरिष्ठांसंश्लिष्टेश्रीधराभ्यामसुमथपरिवारात्मनासेवकेपु ॥ यः संधत्तेविरंचिश्वसनविहगपानंतरुद्रेंद्रपूर्वे
ष्वाध्यायंस्तारतम्यंस्फुटमवतिसदावायुरस्मद्गुरुस्तम् ॥ १५ ॥ तत्त्वज्ञान्मुक्तिभाजः सुखयसिहिगुरोयोग्य
तातारतम्यादाधत्सेमिश्रबुद्धींस्त्रिदिवनिरयभूगोचरान्नित्यबद्धान् ॥ तामिस्रांधादिकाख्येतमसिसुबहुलंदुःखय
स्यन्यथाज्ञान्विष्णोराज्ञाभिरित्थंश्रुतिशतमितिहासादिचाकर्णयामः ॥ १६ ॥ वंदेहंतंहनूमानितिमहितमहा
पौरुषोबाहुशालीख्यातस्तेग्र्योऽवतारः सहितइहबहुब्रह्मचर्यादिधर्मैः ॥ सस्नेहानांसहस्वानहरहरहितंनिर्दहन्दे
हभाजामंहोमोहापहोयः स्पृहयतिमहतींभक्तिमद्यापिरामे ॥ १७ ॥ प्राक्पंचाशत्सहस्रैर्व्यवहितममितंयोजनैः
पर्वतंत्वंयावत्संजीवनाद्यौषधनिधिमधिकप्राणलंकामनैषीः ॥ अद्राक्षीदुत्पतंततउतगिरिमुत्पाटयंतंगृहीत्वा
यातंखेराघवांघ्रौप्रणतमपितदैकक्षणेलांहिलोकः ॥ १८ ॥ क्षिप्तःपश्चात्सलीलंशतमतुलमतेयोजनानांसउच्च

स्तावद्भिस्तारवांश्चाप्युपललवइवव्यग्रबुद्ध्यात्वयातः ॥ स्वस्वस्थानस्थितातिस्थिरशकलशिलाजालसंश्लेपन
प्टच्छेदांकः प्रागिवाभूत्कपिवरवपुपस्तेनमः कौशलाय ॥ १९ ॥ दृष्ट्वादुष्टाधिपोरःस्फुटितकनकसद्वर्मघृष्टा
स्थिकूटंनिष्पिष्टंहाटकाद्रिप्रकटतटतटाकातिशंकोजनोभूत् ॥ येनाजौरावणारिप्रियनटनपटुर्मुष्टिरिष्टंप्रदेष्टुंकिं
नेष्टेमेसतेष्टापदकटकतडित्कोटिभासृष्टकाष्ठः ॥ २० ॥ देव्यादेशप्रणीतिद्रुहिणहरवरावध्यरक्षोविधाताद्यासेव्यो
द्यहृयार्द्रःसहभुजमकरोद्रामनामामुकुंदः ॥ दुष्प्रापेपारमेष्ठ्येकरतलमतुलंमूर्ध्निविन्यस्यधन्यंतन्वन्भूयः प्रभू
तप्रणयविकसिताब्जेक्षणस्त्वेक्षमाणः ॥ २१ ॥ जघ्नेनिघ्नेनविघ्नोबहलबलबकध्वंसनाद्येनशोचद्भिप्रानुक्रोशपाशै
रसुविधृतिसुखस्यैकचक्राजनानाम् ॥ तस्मैतेदेवकुर्मः कुरुकुलपतयेकर्मणाचप्रणामान्किर्मीरिंदुर्मतीनांप्रथम
मथचयोनर्मणानिर्ममाथ ॥ २२ ॥ निर्मृद्भन्नत्ययत्नंविजरवरजरासंधकायास्थिसंधीन्युद्धेतंस्वध्वरेवापशुमिव
दमयन्विष्णुपक्षद्विडीशम् ॥ यावत्प्रत्यक्षभूतंनिखिलमखभुजंतर्पयामासिथासौतावत्यायोजितृप्त्याकिमुवद
भगवन्राजसूयाश्वमेधे ॥ २३ ॥ क्ष्वेलाक्षीणाट्टहासंतवरणमरिहन्नुद्गदोद्दामबाहोबह्वक्षौहिण्यनीकक्षपणसुनिपु
णंयस्यसर्वोत्तमस्य ॥ शुश्रूपार्थंचकर्थस्वयमयमथसंवक्तुमानंदतीर्थश्रीमन्नामन्समर्थस्त्वमपिहियुवयोः पाद
पद्मंप्रपद्ये॥२४॥द्रुह्यंतींहृद्रुहंमाद्रुतमनिलबलाद्द्रावयंतीमविद्यानिद्रांविद्राव्यसद्योरचनपटुमथापाद्यविद्यासमुद्र ॥
वाग्देवीसासुविद्याद्रविणदविदिताद्रौपदीरुद्रपत्न्याद्युद्रिक्ताद्रागभद्राद्रहयतुदयितापूर्वभीमाज्ञयाते ॥ २५ ॥ या
भ्यांशुश्रूपुरासीःकुरुकुलजननेक्षत्रविप्रोदिताभ्यांब्रह्मभ्यांबृंहिताभ्यांचितिसुखवपुपाकृष्णनामास्पदाभ्याम् ॥नि

भेंदाभ्यांविशेषाद्द्विवचनविषयाभ्यामुभाभ्याममूभ्यांतुभ्यंचक्षेमदेभ्यःसरसिजविलसल्लोचनेभ्योनमोस्तु ॥२६॥
गच्छन्सौगंधिकार्थंपथिसहनुमतःपुच्छमच्छस्यभीमःप्रोद्धर्त्तुंनाशकत्सत्वमुमुरुवपुषाभीषयामासचेति॥पूर्णज्ञा
नौजसोस्तेगुरुतमवपुषोःश्रीमदानंदतीर्थक्रीडामात्रंतदेतत्प्रमददसुधियांमोहकद्वेषभाजाम् ॥२७॥ वह्नीःकोटीर
टीकःकुटिलकटुमतीनुत्कटाटोपकोपान्द्राक्चत्वंसत्वरत्वाच्छरणदगदयापोथयामासिथारीन् ॥ उन्मथ्यातथ्य
मिथ्यात्ववचनवचनानुत्पथस्थांस्तथान्यान्प्रायच्छःस्वप्रियायैप्रियतमकुसुमंप्राणतस्मैनमस्ते॥२८॥देहादुत्क्रा
मितानामधिपतिरसतामक्रमाद्वक्रबुद्धिःक्रुद्धः क्रोधैकवश्यः कृमिरिवमणिमान्दुष्कृतीनिष्क्रियार्थम् ॥ चक्रेभू
चक्रमेत्यक्रकचमिवसतांचेतसः कष्टशास्त्रं दुस्तर्कंचक्रपाणेर्गुणगणविरहं जीवतांचाधिकृत्य ॥ २९ ॥ तद्दु
ष्प्रेक्षानुसारात्कतिपयकुनरैरादृतोन्यैर्विमृष्टोब्रह्माहंनिर्गुणोहं वितथमिदमितिह्येषपाखंडवादः ॥ तद्युक्त्याभास
जालप्रसरविषतरूद्दाहदक्षप्रमाणज्वालामालाधरोग्निः पवनविजयतेतेऽवतारस्तृतीयः ॥ ३० ॥ आक्रोशंतोनि
राशाभयभरविवशस्वाशयाश्छिन्नदर्पावाशंतोदेशनाशस्त्विवतिबतकुधियांनाशमाशाददाशु ॥ धावंतोऽश्लीलशी
लावितथशपथशापाः शिवाः शांतशौर्यास्त्वद्व्याख्यासिंहनादेसपदिददृशिरेमायिगोमायवस्ते ॥ ३१ ॥ त्रिष्वप्ये
वावतारेष्वरिभिरपघृणंहिंसितोनिर्विकारः सर्वज्ञः सर्वशक्तिः सकलगुणगणापूर्णरूपप्रगल्भः ॥ स्वच्छः स्वच्छं
दमृत्युः सुखयसिसुजनं देवकिंचित्रमत्र त्रातायस्यत्रिधामाजगदुतवशगंकिंकराः शंकराद्याः ॥ ३२ ॥ उद्यन्मं
दस्मितश्रीमृदुमधुमधुरालापपीयूषधारापूरासेकोपशांतासुखसुजनमनोलोचनापीयमानम् ॥ संद्रक्ष्येसुंदरंसंदु

हृदिहमहदानंदमानंदतीर्थश्रीमद्वक्रेंदुर्बिंबदुरिततुदुदितंनित्यदाहंकदानु ॥ ३३ ॥ प्राचीनाचीर्णपुण्योच्चयचतुर
तराचारतश्चारुचित्तानत्युच्चांरोचयंतींश्रुतिचितवचनाञ्छ्रावकांश्चोद्यचंचून् ॥ व्याख्यामुत्खातदुःखांचिरमुचि
तमहाचार्यचिंतारतांस्तेचित्रासच्छास्त्रकर्त्तश्चरणपरिचराञ्छ्रावयास्मांश्चकिंचित् ॥ ३४ ॥ पीठेरत्नोपक्लृप्तेरुचि
ररुचिमणिज्योतिपासन्निपण्णंब्रह्माणंभाविनंत्वांज्वलतिनिजपदेवैदिकाद्याहिविद्याः ॥ सेवंतेमूर्त्तिमत्यः सुचरि
तचरितंभातिगंधर्वगीतंप्रत्येकंदेवसंसत्स्वपितवभगवन्नर्त्तितद्योवधूपु ॥ ३५ ॥ सानुक्रोशैरजस्रंजनिमृतिनिरया
द्यूर्मिमालाविलेऽस्मिन्संसाराब्धौनिमग्नाञ्छरणमशरणानिच्छतोवीक्ष्यजंतून् ॥ युष्माभिः प्रार्थितः सञ्जलनिधि
शयनः सत्यवत्यांमहर्षेर्व्यक्तश्चिन्मात्रमूर्तिर्नखलुभगवतः प्राकृतेजातुदेहः ॥ ३६ ॥ अस्तव्यस्तंसमस्तश्रुति
गुरुमधमैरत्नपूगंयथार्थैरर्थंलोकोपकृत्यैगुणगणनिलयःसूत्रयामासकृत्स्नम् ॥ योसौव्यासाभिधानस्तमहमहर
हर्भक्तितस्त्वत्प्रसादात्सद्योविद्योपलब्ध्यैगुरुतममगुरुंदेवदेवंनमामि ॥ ३७ ॥ आज्ञामन्यैरधार्यांशिरसिपरिसर
द्रश्मिकोटीरकोटौकृष्णस्याक्लिष्टकर्मादधदनुसरणादर्थितोदेवसंघैः ॥ भूमावागत्यभूमन्नसुकरमकरोर्ब्रह्मसूत्र
स्यभाष्यं दुर्भाष्यंयस्यदस्योर्मणिमतउदितंवेदसद्युक्तिभिस्त्वम् ॥ ३८ ॥ भूत्वाक्षेत्रेविशुद्धेद्विजगणनिलयेरौ
प्यपीठाभिधानेतत्रापिब्रह्मजातिस्त्रिभुवनविशदेमध्यगेहाख्यगेहे ॥ पारिव्राज्याधिराजः पुनरपिवदरींप्राप्यकृ
ष्णंचनत्वाकृत्वाभाष्याणिसम्यग्व्यतनुतचभवान्भारतार्थप्रकाशम् ॥ ३९ ॥ वंदेतंत्वासुपूर्णममतिमनुदिनासे
वितंदेववृंदैर्वंदेवंदारुमीशेश्रियउतनियतंश्रीमदानंदतीर्थम् ॥ वंदेमंदाकिनीसत्सरिदमलजलासेकसाधिक्यसं

गंवंदेहंदेवभक्त्याभवभयदहनंसज्जनान्मोदयंतम् ॥ ४० ॥ सुब्रह्मण्याख्यसूरेः सुतइतिसुभृशंकेशवानंदतीर्थ
श्रीमत्पादाब्जभक्तः स्तुतिमकृतहरेर्वायुदेवस्यचास्य ॥ तत्पादार्चादरेणप्रथितपदलसन्मालयात्वेतयायेसंरा
ध्यामूनमंतिप्रततमतिगुणामुक्तिमेतेव्रजंति ॥ ४१ ॥ मनोजवंमारुततुल्यवेगंजितेंद्रियंबुद्धिमतांवरिष्ठम् । वाता
त्मजंवानरयूथमुख्यंश्रीरामदूतंशिरसानमामि॥४२॥ वायुर्भीमोभीमनादोमहौजाः सर्वेषांचप्राणिनांप्राणभूतः॥
नास्यावृत्तिर्देहिनांदेहपातेतस्माद्वायुर्देवदेवोविशिष्टः ॥ ४३ ॥ प्रथमोहनुमान्नामद्वितीयोभीमएवच ॥ पूर्णप्रज्ञ
स्तृतीयस्तुभगवत्कार्यसाधकः ॥ ४४ ॥ ब्रह्मांता गुरवः साक्षादिष्टंदैवंश्रियः पतिः ॥ आचार्याश्रीमदाचार्याः
संतुमेजन्मजन्मनि ॥ ४५ ॥ ज्ञानेविरागेहरिभक्तिभावेधृतिस्थितिप्राणबलेषुयोगे ॥ बुद्धौचनान्योहनुमत्समानः
पुमान्कदाचित्क्वचकश्चनैव ॥ ४६ ॥ वातेनकुंत्यांबलवान्सुजातः शूरस्तपस्वीद्विषतांनिहंता ॥ सत्येचधर्मेचरतः
सदैवपराक्रमेशत्रुभिरप्रधृष्यः॥४७॥यस्यत्रीण्युदितानिवेदवचने रूपाणिदिव्यान्यलंबट्तद्दर्शनमित्थमेवनिहितं
देवस्यभर्गोमहत् ॥ वायोरामवचोनयंप्रथमकंपृक्षोद्वितीयंवपुर्मध्वोयत्तुतृतीयमेतदमुनाग्रंथः कृतः केशवे ॥
॥ ४८ ॥ महाव्याकरणांभोधिमंथमानसमंदरम् ॥ कवयंतंरामकीर्त्याहनुमंतमुपास्महे ॥ ४९ ॥ मुख्यप्राणा
यभीमायनमोयस्यभुजांतरम् ॥ नानावीरसुवर्णानांनिकषाश्मायितंबभौ ॥ ५० ॥ स्वांतस्थानंतशय्यायपूर्ण
ज्ञानरसार्णसे ॥ उत्तुंगवाक्तरंगायमध्वदुग्धाब्धयेनमः ॥ ५१ ॥ येनाहमिहदुर्मार्गादुद्धृत्याभिनिवेशितः ॥ स
म्यक्छ्रीवैष्णवेमार्गेपूर्णप्रज्ञंनमामितम् ॥ ५२ ॥ अनन्याश्चितयंतोमांयेजनाः पर्युपासते ॥ तेषांनित्याभियु

क्तानांयोगक्षेमंवहाम्यहम् ॥ ५३ ॥ यःसर्वगुणसंपूर्णः सर्वदोषविवर्जितः ॥ प्रीयतांप्रीतएवालंविष्णुर्मेपरमःसुहृत् ॥ ५४ ॥ सूक्तिरत्नाकरेरम्येमूलरामायणार्णवे ॥ विहरंतोमहीयांसःप्रीयंतांगुरवोमम ॥ ५५ ॥ हनुमानंजनीसूनुर्वायुपुत्रोमहाबलः ॥ रामेष्टःफाल्गुनसखःपिंगाक्षोऽमितविक्रमः ॥ ५६ ॥ उदधिक्रमणश्चैवसीतासंदेशकारकः ॥ लक्ष्मणप्राणदाताचदशग्रीवस्यदर्पहा ॥ ५७ ॥ मारुतिःपाडवोभीमोगदापाणिर्वृकोदरः ॥ कौंतेयःकृष्णदूतश्चभीमसेनोमहाबलः ॥ ५८ ॥ जरासंधांतकोवीरोदुःशासनविनाशनः ॥ पूर्णप्रज्ञोज्ञानदातामध्वोध्वस्तदुरागमः ॥ ५९ ॥ तत्वज्ञोवैष्णवाचार्योव्यासशिष्योयतीश्वरः ॥ शुभतीर्थाभिधानश्चजितामित्रोजितेंद्रियः ॥ ६० ॥ श्रीमदानंदसन्नाम्नामेवंद्वादशकंजपेत् ॥ लभतेवैष्णवींभक्तिंगुरुभक्तिसमन्विताम् ॥ ६१ ॥ बुद्धिर्बलंयशोधैर्यंनिर्भयत्वमरोगता ॥ अजाड्यंवाक्पटुत्वंचहनुमत्स्मरणाद्भवेत् ॥ ६२ ॥ ॥ इति श्रीहरिकृष्णविनिर्मितेबृ॰ ध॰ उपासनास्तबकेहनुमदुपासनाध्यायेत्रिविक्रमपंडिताचार्यविरचितहनुमत्स्तवराजनिरूपणंनामप्रकरणमष्टादशम् ॥ १८ ॥ ॥ श्लोकाः ११७३ ॥ अथहनुमतःशत्रुञ्जयस्तोत्रम् ॥ ॐऐंश्रींह्रांह्रींह्रूंह्स्फ्रेंह्स्रौंख्फ्रेंह्स्ख्फ्रेंहसौंहांहनुमतेत्रैलोक्याक्रमणपराक्रमश्रीरामभक्तममपरस्यचसर्वशत्रूंश्चतुर्वर्णसंभवान्पुंस्त्रीनपुंसकान्भूतभविष्यद्वर्त्तमानान्दूरस्थसमीपस्थान्नानानामधेयान्नानासंकरजातीयान्कलत्रपुत्रमित्रभृत्यबंधुसुहृत्समेतान्प्रभुशक्तिसमेतान्धनधान्यादिसंपत्तियुतान्राज्ञोराजपुत्रसेवकान्मंत्रिसचिवसखीनात्यंतिकान्क्षणेनत्वरया एतद्दिनावधिनानोपायैर्मारय २ शस्त्रैश्छेदय २ अग्निनाज्वालय २ दाहय २ अक्षकुमारवत्पादत

आक्रमणेन शिलातले त्रोटय २ घातय २ बंधय २ भ्रामय २ भयातुरान्विसंज्ञान्सद्यःकुरु २ भस्मीभूतानु
द्धूलय २ भक्तजनवत्सल सीताशोकापहारक सर्वत्रमामेतंचरक्ष २ महारुद्रावतार हांहांहुंहुंभूतसंघैःसहभक्षय२
क्रुद्धचेतसानखैर्विदारय २ देशादस्मादुच्चाटयोच्चाटयपिशाचवद्भ्रंशय २ घेघेहुंफट्स्वाहा ॥ १ ॥ ॐनमोभग
वतेमहाबलपराक्रमाय महाविपत्तिनिवारणाय भक्तजनमनःकल्पनाकल्पद्रुमाय दुष्टजनमनोरथस्तंभनायप्र
भंजनप्राणप्रियायश्रीं ॥ २ ॥ अथध्यानम् ॥ श्रीमंतंहनुमंतमात्तरिपुभिद्भूभृत्तरुभ्राजितंवल्गद्वालधिबद्धवैरिनि
चयंचामीकराद्रिप्रभम् ॥ रोषाद्रक्तपिशंगनेत्रनलिनंभ्रूभंगमंगस्फुरत्प्रोद्यच्चंडमयूखमंडलमुखंदुःखापहंदुःखिना
म् ॥ १ ॥ कौपीनंकटिसूत्रमौंज्यजिनयुद्देहंविदेहात्मजाप्राणाधीशपदारविंदनिहितस्वांतंकृतांतंद्विषाम् ॥
२ ॥ इति ध्यात्वैवंसमरांगणस्थितमथानीयस्वहृत्पंकजेसंपूज्याखिलपूजनोक्तविधिनासंप्रार्थयेत्प्रार्थितम्
ध्यात्वा ॥ ॥ हनुमन्नंजनीसूनोमहाबलपराक्रम ॥ लोलल्लांगूलपातेनममारातीन्निपातय ॥ १ ॥ मर्कटाधि
पमार्तंडमंडलग्रासकारक ॥ लोलल्लां॰ ॥ २ ॥ अक्षक्षपणपिंगाक्षक्षितिजाशुग्विनाशन ॥ लोलल्लां॰ ॥ ३ ॥ रुद्रा
वतारसंसारदुःखभारापहारक ॥ लोलल्लां॰ ॥ ४ ॥ श्रीरामचरणांभोजमधुपायितमानस ॥ लोलल्लां॰ ॥ ५ ॥
वालिकालरदक्लांतसुग्रीवोन्मोचनप्रभो ॥ लोलल्लां॰ ॥ ६ ॥ सीताविरहवारीशमग्नसीतेशतारक ॥ लोलल्लां॰
॥ ७ ॥ रक्षोराजप्रतापाग्निदह्यमानजगद्वन ॥ लोलल्लां॰ ॥ ८ ॥ ग्रस्ताशेषजगत्स्वास्थ्यराक्षसांभोधिमंदर ॥
लोलल्लां॰ ॥ ९ ॥ पुच्छगुच्छस्फुरद्धूमानलदग्धारिपत्तन ॥ लोलल्लां॰ ॥ १० ॥ जगन्मनोदुरुल्लंघ्यपारावारवि

लंघन ॥ लोलल्लां० ॥ ११ ॥ स्मृतमात्रसमस्तेष्टपूरकप्रणतप्रिय ॥ लोलल्लां० ॥ १२ ॥ रात्रिंचरचमूराशिकर्त्तनैकविकर्त्तन ॥ लोलल्लां० ॥ १३ ॥ जानकीजानकीजानिप्रेमपात्रपरंतप ॥ लोलल्लां० ॥ १४ ॥ भीमादिकमहावीरवीरवेशावतारक ॥ लोलल्लां० ॥ १५ ॥ वैदेहीविरहक्लांतरामरोषैकविग्रह ॥ लोलल्लां० ॥ १६ ॥ वज्रांगनखदंष्ट्रेशवज्रिवज्रावगुंठन ॥ लोलल्लां० ॥ १७ ॥ अखर्वगर्वगंधर्वपर्वतोद्भेदनस्वर ॥ लोलल्लां० ॥ १८ ॥ लक्ष्मणप्राणसंत्राणत्राततीक्ष्णकरान्वय ॥ लोलल्लां० ॥ १९ ॥ रामादिविप्रयोगार्त्तभरताद्यार्त्तिनाशन ॥ लोलल्लां० ॥ २० ॥ द्रोणाचलसमुत्क्षेपसमुत्क्षिप्तारिवैभव ॥ लोलल्लां० ॥ २१ ॥ सीताशीर्वादसंपन्नसमस्तावयवाक्षत ॥ लोलल्लां० ॥ २२ ॥ इत्येवमश्वत्थतलोपविष्टः शत्रुंजयंनामपठेत्स्वयंयः ॥ सशीघ्रमेवास्तसमस्तशत्रुः प्रमोदते मारुतजप्रसादात् ॥ २३ ॥ ॥ इतिश्रीहरि० बृ० ध० उपासनास्तबके हनुमदुपासनाध्यायेशत्रुंजयहनुमत्स्तोत्रनिरूपणं नामप्रकरणमेकोनविंशम् ॥ १९ ॥ ॥ श्लोक ११९६॥अथद्वितीयंहनुमत्स्तोत्रम् ॥ ॥ विप्रादयोजनगणाःस्तवनंप्रचक्रुर्ब्रह्मस्वरूपजगतांपरिपालकस्य ॥ रामप्रभावबलपूरितरुद्रमूर्त्तेः श्रीरामदूतसततंहनुमन्नमस्ते ॥ १ ॥ श्रीरामदूतशरणागतदीनबंधोवज्रांगदेहकरुणाकररुद्रमूर्त्ते ॥ श्रीरामरामइतिजापकृतात्मशक्ते श्रीरामदूतसततंहनुमन्नमस्ते ॥ २ ॥ सिंदूरतैलरचितातिविभूषणात्मल्लाँङ्गूलताडनकृतासुरसंगनाश ॥ क्रोधाद्दशाननपुरीदहनप्रकारिञ्छ्रीरामदूतसततंहनुमन्नमस्ते ॥ ३ ॥ रामारिणाकृतहतौजनकात्मजायालंकास्थिताजनकजेतिसुशोधकारिन् ॥ सीतातिशोकहरणप्रबलारिहंतः श्रीरामदूतसततंहनुमन्नमस्ते ॥ ४ ॥

संमूर्छितांगविभुलक्ष्मणसौख्यकारिन्द्रौद्रांगदीर्घहनुमन्नगहस्तधारिन् ॥ दुष्टासुराहिमहिरावणनाशकारि
न्छ्रीरामदूतसततंहनुमन्नमस्ते ॥ ५ ॥ शैलीगदाधरसमर्जितवज्रकच्छिन्वामांघ्रिपीडितमनोजसुलब्धकीर्त्ते ॥
हेमारुतेभवसमस्तभयार्त्तिहारीश्रीरामदूतसततंहनुमन्नमस्ते ॥ ६ ॥ विप्रादिजातिकनिकेतननारिचानाग्रामा
धिवासकृतधामविशालकीर्त्ते ॥ श्रीरामदासदृढबुद्धिमतांवरिष्ठश्रीरामदूतसततंहनुमन्नमस्ते ॥ ७ ॥ फल्गुनदी
तटसमुद्भवजालिवृक्षेप्रासादमंडितमनोहरवासधाम्नि ॥ रूपंविभातिकपिराजमनोहरंतेश्रीरामदूतसततंहनुमन्न
मस्ते ॥ ८ ॥ शुक्लाशुभाद्रपदमासभवाद्वितीयाभातित्वदीयहवनोत्सवजातहर्षा ॥ यात्रालुसंवरजिताजनवी
थिकात्रश्रीरामदूतसततंहनुमन्नमस्ते ॥९॥ जन्मादिहीनपवनांजनिकात्तदेहश्रीजानकीपतिमनोजवदीप्तकांते ॥
नानाकपींद्रचमुनायकब्रह्मचारिन्छ्रीरामदूतसततंहनुमन्नमस्ते ॥ १० ॥ लांगूलधारकजितेंद्रियवायुपुत्रपद्मं
चहस्तरचितध्वजदीर्घमान ॥ श्रीरामसेवनपरेणसदोर्ध्वकायश्रीरामदूतसततंहनुमन्नमस्ते ॥ ११ ॥ हेपावनेय
जनरक्षकरामभक्तराजीवलोचनविशालसुभालधारिन् ॥ दीर्घार्कस्रग्धरजटामुकुटादिधारिन्छ्रीरामदूतसततंह
नुमन्नमस्ते ॥ १२ ॥ आवाहनादिशुभषोडशकोपचारास्तुभ्यंनिवेदनकृताहनुमन्मयाये ॥ अंगीकुरुष्वभगव
न्हनुमन्महेशश्रीरामदूतसततंहनुमन्नमस्ते ॥ १३ ॥ रोगान्विनाशयरिपूनथविघ्नजालंतापत्रयंयमभयंभवपाप
संचयम् ॥ दुःखानिनाशयविनाशयरिष्टकष्टंश्रीरामदूतसततंहनुमन्नमस्ते ॥ १४ ॥ हेभक्तवत्सलविभोभगवन्द
यालोपुत्रान्यशांसिखलुदेहिधनानिदेहि ॥ जायासुभाग्यकगवादिसुखानिदेहिश्रीरामदूतसततंहनुमन्नमस्ते

॥ १५ ॥ न्यूनातिरिक्तभवदोपचयंक्षमस्वपूजांगृहाणसकलांस्तुतिपाठयुक्ताम् ॥ देवप्रसीदभगवन्हनुमन्कृ
पालोश्रीरामदूतसततंहनुमन्नमस्ते ॥ १६ ॥ वाक्पूजनंत्वयिसमर्पितमेवभक्त्यादोषान्विहायसकलान्खलुतत्रसं
स्थान् ॥ सम्यग्गृहाणसुगुणानिवराजहंसःश्रीरामदूतसततंहरसंकटंमे ॥ १७ ॥ इति श्रीहरिकृष्णविनिर्मि
ते बृ० ध० उपासनास्तबकेहनुमदुपासनाध्यायेहनुमत्स्तोत्रंनामप्रकरणंविंशम् ॥ २० ॥ श्लोका१२१३॥ अथ
हनुमदुपनिपद् आथर्वणवेदेत्रिपंचाशत्तमम् ॥ ॐ सनकादियोगींद्राअन्येचऋषयस्तथा ॥ प्रह्लादाद्यावि
ष्णुभक्ताहनुमंतमिदंजगुः ॥ १ ॥ वायुपुत्रमहाबाहोकिंतत्वंब्रह्मवादिनाम् ॥ पुराणेष्वष्टादशसुस्मृतिष्वष्टादश
स्वपि ॥ २ ॥ चतुर्वेदेपुशास्त्रेपुविद्यास्वाध्यात्मिकेपुच ॥ सर्वेपुविबुधाद्येपुविघ्नसूर्येपुशक्तिपु ॥ ३ ॥ एतेपुमध्ये
किंतत्वंकथयस्वमहाबल ॥ हनुमानुवाच ॥ भोभोयोगींद्राऋषयोविष्णुभक्तास्तथैवच ॥ ४ ॥ शृणुध्वंमामकीं
वाचंभवबंधविनाशिनीम् ॥ एतेपुचैवसर्वेपुतत्वंचब्रह्मतारकम् ॥ ५ ॥ रामएवपरंब्रह्मरामएवपरंतपः ॥ रामएव
परंतत्वंश्रीरामोब्रह्मतारकम् ॥ ६ ॥ वायुपुत्रेणोक्तायोगींद्राऋषयोविष्णुभक्ताःपुनः पप्रच्छुर्हनुमंतंरामस्यां
गानितानिनोब्रूहीतिहनुमान्सहोवाचवायुपुत्रोविघ्नशक्तिदुर्गाक्षेत्रपालसूर्यरुद्रनारायणनारसिंहवासुदेववाराहम
न्त्रानन्यान्कांश्चित्सर्वान्मंत्राञ्छ्रीसीतालक्ष्मणहनुमद्भरतशत्रुघ्नविभीपणसुग्रावांगदजांबवत्प्रणवमन्त्रारामस्यां
गाभिजनितास्तान्विनारामोविघ्नकरोभवति ॥ पुनर्वायुपुत्रेणोक्तास्तेपुनर्हनुमंतंपप्रच्छुरांजनेयमहाबलविप्राणां
गृहस्थानांप्रणवाधिकारः कथंस्यादितिपुनरुवाचहनुमान् ॥ अयोध्यानगरेरम्येसमासीनोरामोमयापृष्टः सीता

पते योगींद्रमानसहंस विप्रगृहस्थानांप्रणवाधिकारणंकथंस्यादितिसहोवाचरामोयेषांमेपडक्षराधिकारावर्त्तंत
तेषांप्रणवाधिकारः स्यान्नान्येषांप्रणवस्यकेवलमकारोकारमकारार्द्धमात्रासहितस्यसाह्लेनयोराममंत्रंजपतित
स्याभयकरोहंस्यात्तस्मात्प्रणवस्याकारस्यचोकारस्यचमकारस्यचार्द्धमात्रासहितस्यऋषिच्छंदोदेवतातत्व
वर्णावस्थानस्वरवेदाग्नीनुच्चार्यन्यासंकृत्वाप्रणवंमन्मंत्रान्द्विगुणंजप्त्वापश्चाद्राममंत्रमाद्यतः प्रणवंयोजपेत्सरा
मोभवेदितिरामेणोक्तंतस्माद्रामांगिप्रणवः कथित इतिवायुपुत्रेणोक्ताःपुनर्हनुमंतंपप्रच्छुः ॥ रामभक्तविभीषणकृ
तस्यरामपरिचर्याश्रोतुमिच्छामः। सहोवाचहनुमान् बिभीषणोक्तरामचर्यायांसप्तसहस्राणिसंस्कृतवाक्यानि।
सप्तसहस्राणिगद्यानि। पंचशतान्यार्या । अष्टौसहस्राणिश्लोकाश्चतुर्विंशतिसहस्राणिपद्यानि । दशसहस्राणि
दंडकाइत्येवमनुक्रमंज्ञात्वाकृतकृत्योभवेदिति ॥१॥ इतिश्रीहरिकृष्ण० बृ० ध० उपासनास्तवकेहनुमदुपासना
ध्यायेहनुमदुपनिषन्निरूपणंनामप्रकरणमेकविंशम् ॥ २१ ॥ अथहनुमत्स्तोत्रम् । शंशंशंसिद्धिनाथंप्रणमति
चरणंवायुपुत्रंचरौद्रंवंवंवंविश्वरूपंहहहहहसितंगर्जितंमेघछत्रम् ॥ तंतंत्रैलोक्यनाथंतपतिदिनकरंतंत्रिणेत्रस्व
रूपंकंकंकंदर्पवश्यंकमलमनहरंशाकिनीकालरूपम् ॥ १ ॥ रंरंरंरामदूतंरणगजदमितंरावणच्छेददक्षंवंवंवंबाल
रूपंनतगिरिचरणंकंपितंसूर्यबिंबम् ॥ मंमंमंमंत्रसिद्धिंकपिकुलतिलकंमर्दनंशाकिनीनांहुंहुंहुंकारबीजंहनतिह
नुमतंहन्यतेशत्रुसैन्यम् ॥ २ ॥ दंदंदंदीर्घरूपंधरकरशिखरंपातितंमेघनादंऊंऊंउच्चाटितंवैसकलभुवतलंयोगि
नीवृंदरूपम् ॥ क्षंक्षंक्षंक्षिप्रवेगंक्रमतिचजलधिज्वालितंरक्षदुर्गंक्षेंक्षेंक्षेंक्षेमतत्वंदनरुहकुलकंमुच्यतेबिंबकारम् ॥

॥ ३ ॥ कंकंकंकालदुष्टंजलनिधितरणंराक्षसानांविनाशेदक्षंश्रेष्ठंकवीनांत्रिभुवनचरतांप्राणिनांप्राणरूपम् ॥
ह्रांह्रांह्रांह्रासतत्वंत्रिभुवनरचितंदैवतंसर्वभूते देवानांचत्रयाणांफणिभुवनधरंव्यापकंवायुरूपम् ॥ ४ ॥
त्वंत्वंत्वंवेदतत्वंबहुऋचयजुपांसामचाथर्वरूपं कंकंकंकंदनेत्वंननुकमलतलेराक्षसान्रौद्ररूपान् ॥ खंखंखं
खड्गहस्तंझटितिभुवतलेत्रोटितंनागपाशं ॐॐॐकाररूपंत्रिभुवनपठितंवेदमंत्राधिमंत्रम् ॥ ५ ॥ संग्रामेशत्रुम
ध्येजलनिधितरणेव्याघ्रसिंहेचसर्पेराजद्वारेचमार्गेगिरिगुहविवरेचोपरेकंदरेवा।भूतप्रेतादियुक्तेग्रहगणविषयेशा
किनीडाकिनीनांदेशेविस्फोटकानांज्वरवमनशिरोपीडनेनाशकस्त्वम् ॥६॥ इतिश्रीहरिकृष्णवि॰बृ॰ध॰उपास
नास्तबकेहनुमदुपासनाध्यायेहनुमत्पंचरत्नस्तोत्रनिरूपणंनामप्रकरणंद्वाविंशम् ॥ २२ ॥ ॥ श्लोकाः १२१९
॥ ॥ अथांजनेयास्त्रम् ॥ सुदर्शनसंहितायाम् ॥ ॥ अधुनागिरिजानंदआंजनेयास्त्रमुत्तमम् ॥ समंत्रंसप्र
योगंचवदमेपरमेश्वर ॥ १ ॥ ईश्वरोवाच ॥ ब्रह्मास्त्रंस्तंभकाधारिमहाबलपराक्रमम् ॥ मंत्रोद्धारमहंवक्ष्येशृणु
त्वंपरमेश्वरि ॥ २ ॥ आदौप्रणवमुच्चार्यमायामन्मथवाग्भवम् ॥ शक्तिवाराहबीजंचवायुबीजमनंतरम् ॥ ३ ॥
विषयंद्वितयंपश्चाद्वायुबीजमनंतरम् ॥ ग्रसयुग्मपुनर्वायुबीजोच्चार्यचपार्वति ॥ ४ ॥ स्फुरयुग्मवायुबीजंप्र
स्फुरद्वितयंपुनः ॥ वायुबीजंततोच्चार्यंहुंफट्स्वाहासमन्वितम् ॥ ५ ॥ आंजनेयास्त्रमनघेपंचपंचदशाक्षरम् ॥
कालरुद्रोऋषिःप्रोक्तोगायत्रीछंदउच्यते ॥ ६ ॥ देवताविश्वरूपश्रीवायुपुत्रःकुलेश्वरि ॥ हूंबीजंकीलकंग्लौंचह्रीं
कारंशक्तिमेवच ॥ ७ ॥ प्रयोगंसर्वकार्येषुचास्त्रेणानेनपार्वति ॥ विद्वेषोच्चाटनेष्वेवमारणेषुप्रशस्यते ॥ ८ ॥

अस्यश्रीहनुमदांजनेयास्त्रविद्यामंत्रस्य । कालरुद्रऋषिःगायत्रीछंदः ॥ विश्वरूपश्रीवायुपुत्रोदेवता । ह्रूंबीजं । ग्लौंकीलकं ॥ ह्लींशक्तिः । ममशत्रुनिग्रहार्थेहनुमन्नस्त्रजपेविनियोगः ॥ ॥ मंत्रप्रकाशः ॥ ॥ ॐ ह्लींक्लीं ऐंसौंग्लौंयंशोषय २ यंग्रस २ यंविदारय २ यंभस्मीकुरु २ यंस्फुर२ यं प्रस्फुर२ यंसौंग्लौंहूंफट्स्वाहा ॥ ॥ नाम द्वयंसमुच्चार्यमंत्रादौकुलसुंदरि ॥ प्रयोगेषुतथान्येषुसुप्रशस्तोह्ययंमनुः ॥ ९ ॥ आदौविद्वेषणंवक्ष्येमंत्रेणानेनपार्वति । काकोलूकदलग्रंथीपवित्रीकृतबुद्धिमान् ॥ १० ॥ तर्पयेच्छतवारंतुत्रिदिनाद्द्वेषमाप्नुयात् । ईक्ष्यकर्ममिदंमंत्रंमंत्रांतेत्रिशतंजपेत् ॥ ११ ॥ वसिष्ठारुंधतीभ्यांचभवेद्विद्वेषणंप्रिये । महद्विद्वेषणंभूत्वा कुरुशब्दंविनाप्रिये ॥ १२ ॥ मंत्रंत्रिशतमुच्चार्यनित्यंमेकलहप्रिये । ग्राहस्थानेग्रामपदेउच्चार्याष्टशतंजपेत्॥१३॥ ग्रामान्योन्यंभवेद्वैरमिष्टलाभोभवेत्प्रिये । देशशब्दंसमुच्चार्यद्विसहस्रंजपेन्मनुः ॥ १४ ॥ देशोनाशंसमायातिअन्योन्यंक्लेशमेवच । रणशब्दंसमुच्चार्यजपेदष्टोत्तरंशतम् ॥ १५ ॥ अग्नौन्नतातदावायुदिनांतिकलहोभवेत् ॥ उच्चाटनप्रयोगंचवक्ष्येहंतवसुव्रते ॥ १६ ॥ उच्चाटनपदातंच अस्त्रमष्टोत्तरंशतम् । तर्पयेद्धानुवारेभ्योनिशायांलवणांबुना॥१७॥त्रिदिनादिकमंत्रांतेउच्चाटनमथोभवेत् ॥ भौमेरात्रौतथानग्नोहनुमन्मूलमृत्तिकाम्॥१८॥ नग्नेनसंग्रहीलातुस्पृष्ट्वाचाष्टोत्तरंजपेत् । समांसंप्रेतभस्मचशल्यचूर्णसमांसशकम् ॥ १९ ॥ यस्यमूर्ध्निक्षिपेत्सद्यःकाकवद्भ्रमतेमहीम् । विप्रचांडालयोःशल्यंचिताभस्मतथैवच ॥ २० ॥ हनुमन्मूलमृद्ग्राह्यावद्धाप्रेतपटेनतु । ग्रहेवाग्राममध्येवापट्टनेरणमध्यमे ॥ २१ ॥ निक्षिपेच्छत्रूगर्त्तेषुसद्यश्चोच्चाटनंभवेत् । तडागेस्थापयि

त्वातुजलदारिद्यमाप्नुयात्॥२२॥मारणंसंप्रवक्ष्यामितवाहंशृणुसुव्रते।नरास्थिलेखिनींकृत्वाचितांगारंचकज्जलम् ॥२३॥प्रेतवस्त्रेलिखेदस्त्रंगत्तंकृत्वासमुत्तमम्।श्मशानेनिखनेत्सद्यःसहस्राद्रिपुमारणे ॥२४॥नकुर्याद्विप्रजातिभ्यो मारणंमुक्तिमिच्छता॥देवानांब्राह्मणानांचगवांचैवसुरेश्वरि॥२५॥उपद्रवंनकुर्वीतद्वेषबुद्ध्याकदाचन॥प्रयोक्तव्यं तथान्येषांनदोषो॥मुनिरब्रवीत् ॥ २६ ॥ इतिश्रीहरि० बृ० ध० उपासनास्तबकेहनुमदुपासनाध्यायेआंजनेयास्त्र निरूपणंनामप्रकरणंत्रयोविंशम् ॥ २३ ॥ श्लो० १२४५ ॥ अथहनुमदघोरास्त्रम् ॥ ॥ अथर्वणरहस्ये ॥ ॥ अस्यश्रीअनंतघोरप्रलयज्वालाग्निरौद्रवीरहनुमदसाध्यसाधनाघोरास्त्रमहामंत्रस्यईश्वरऋषिःअनुष्टुप्छंदः श्री रामलक्ष्मणौदेवता नानाछंदांसिमारुतात्मजेतिबीजम् अंजनीसूनुरितिशक्तिःवायुपुत्रइतिकीलकंश्रीहनुमत्प्रसा दसिद्ध्यर्थेजपेविनियोगः। ॐनमोभगवतेदावानलकालाग्निरुद्रहनुमंस्तेजोवितानधवलीकृतजगत्रितयवज्रदेह वज्रकायवज्रांगवज्रनखवज्रमुखवज्रबाहुवज्ररोमवज्रनेत्रवज्रदंतवज्रकरकमलभास्करायभीमकरपिंगलाक्षोग्रप्र लयकालरौद्रवीरभद्रावतारशरभशाल्वभैरवदोर्दंडलंकापुरीदहनउदधिलंघनदशग्रीवशिरःकृतांतसीताश्वासन ईश्वरपुत्रवायुसुतअंजनीगर्भसंभूतउदयभास्करबिंबानलग्रासकदेवदानवऋषिमुनिवरदायकपाशुपतास्त्रब्रह्मा स्त्रवैष्णवास्त्रनारायणास्त्रकालशक्तिकालदंडकालपाशाघोरास्त्रनिवारणाय नारायणास्त्रमृडाय सर्वशक्तिमयात्म काय परविद्यानिवारणाय अग्निदीप्ताय अथर्वणवेदसिद्धिस्थिरकालनिराहार वायुवेग मनोवग श्रीरामतारक परब्रह्म विश्वरूप निरंजन लक्ष्मणप्राणप्रतिष्ठानंदकर जलस्थलाग्निमर्ममनोभेदि २ सर्वशत्रूञ्छेदि २ ममवै

रिणः खादय २ मांसंजीवय २ पर्वतोत्पाटनाय सुग्रीवसाधारण निष्कलंकित कुमारब्रह्मचारिन्दिगंवर सर्वपापग्रहकुमारग्रहसर्वग्रहाञ्छेदय २ भेदय २ भिंधि २ खादय २ कंटकांस्ताडय २ मारय २ शोषय २ ज्वालय २ हयदेवदैत्यान्नाशय २ अतिशोषय २ सर्वत्रमांरक्षय २ शाकिनीडाकिनीर्विध्वंसय २ हनुमंता यममरक्ष २ ॐ ह्रांह्रींफट्स्वाहा ॥ १ ॥ ॐ नमोभगवते श्रीप्रतापहनुमंतायमहावीराय सर्व दुःखविनाशनायग्रहमंडलभूतमंडलप्रेतमंडलपिशाचमंडलोच्चाटनाय अंतरभवाब्दिकज्वरमाहेश्वरज्वरवैष्णव ज्वरब्रह्मज्वरविपमज्वरशीतज्वरवातज्वरएकाहिकद्याहिकत्र्याहिकचातुर्थिकार्द्धमासिकमासिकपाण्मासिक सांवत्सरिकवातपित्तश्लेष्मसान्निपातिकांतर्गतापस्मारिकभ्रमिकज्वराञ्छेदय २ भेदय २ ह्रींफट्स्वाहा ॥ २ ॥ ॐनमोभगवतेचिंतामणिहनुमतेअंगशूलाक्षिशूलशिरःशूलोदरशूलकर्णशूलहस्तशूलगुदशूलकटिशूल जंघाशूलपादशूलपित्तशूलवातशूलादिसर्वरोगाञ्छूलान्निर्मूलय २ दानवदैत्यकामिनीवेतालब्रह्मराक्षसकाला नलनागपाशानंतवासुकितक्षककर्कोटकशंखकुलिकपद्ममहापद्मकुमुदज्वलस्थरोगपाशमहानागिनीकालपाश विषंनिर्विषंकुरु २ स्वाहा ॥ ३ ॥ ॐ पातालगरुडहनुमंतभैरवायनमोगजसिंहेंद्रारिपाशबंधंछेदय २ प्रलयमारुतकालाग्निहनुमतेशृंखलाबंधंमोक्षय २ सर्ववालग्रहंछेदय २ सर्वकार्याणिसाधय २ मारणमोहनघृ णिमर्दय २ मारय २ वानरायममप्रसन्नश्रीरामरक्षसिंहभैरवस्वरूप ॐ द्रांद्रींक्षौंभैंग्रांश्रींक्रांक्लींक्रांक्रींहांहींहूं हैंहौंखख४ जय ४ खेंखेंहूंफट्स्वाहा॥४॥ॐनमोभगवतेकालाग्निरुद्रहनुमतेभ्रामय २ वद २ कुरु २ जय २ हस २

दुष्टग्रहंप्रज्वलय २ मर्दय २ त्रासय २ शमय २ अस्त्रोभत्रिशूलडमरुकालमृत्युपाशकपालखट्वांगधराय अभय
शाश्वताय २ आवर्त्ताय आद्यंतरभूपणाय परमंत्रपरयंत्रपरतंत्रशतसहस्त्रकोटिपुंजभेदय २ अग्निंबंधय २सर्वग्रहं
बंधय २ सर्वविषंबंधय २ अनंताग्निदष्टनागानां द्वादशकुलवृश्चिकानामेकादशकुलभूतान्हन २ वज्रतउत्तुंगानुच्चा
टय २ मारणमोहनवशीकरणस्तंभनजृंभणाकर्षणोच्चाटनमीलनविद्वेपणयुद्धतर्कान्ममवैरिणांबंधय २ ॐ नमो
भगवतेअंकुमारिपादत्रिहारवाणोग्रमूर्त्तयेग्रामवासिनेतिपूर्वशक्तायसर्वायुधानिअस्यक्षयायधारय २ लंलंलंग्रां
ग्रौंनिःस्वाहा ॥ ५ ॥ ॐ नमोभगवतेभद्रजातिनीलकंठहनुमते ॐ ठुंठुंठुंठंठंठंलंलंलंदेवदत्तदिगंबरअष्टमहाभै
रवअष्टांगधरायनवनाटकभैरवनवांगधरायअष्टमहाशक्तिअष्टांगधरायनवब्रह्ममयायदशविष्णुरूपायएकादश
रुद्रावतारायद्वादशार्कतेजायत्रयोदशसोममुखायवीरहनुमंतस्तंभनमोहनवशीकरणत्रिवश्यायनमःराजमुखबं
धनायवलीमुखबंधनमकरमुखबंधनशत्रुमुखजिह्वाव्याघ्रसर्पवृश्चिकअग्निज्वालाविपनिगडान्सर्वजनवैरिमुखबं
धन व्याघ्रमुखबंधनवायुवीरहनुमंतईश्वरावतारवायुनंदनअंजनिसुत बंधुबंधु सत्यबंधु अंहांहींहुं अस्यह्रीं
ह्रांग्रींत्रींयांभ्रेंभ्रेंभ्रांभ्रांहटहटखटखटसर्वखटविश्वखटशत्रुखटवश्यखटसर्वजनाद्दश्यखट । लंलांश्रींह्लांह्लींहूं
शत्रुमनःस्तंभय २ भेदय २ मेविजय २ यंह्लींवंह्रींहींहींहींहींसर्वजनसारह्रींहींखटविश्वखटशत्रुखटसर्वविपसर्वमं
त्रार्थसिद्धिंकुरुकुरुस्वाहा ॥ ६ ॥ रामचंद्रंमहादेवंवीरभद्रस्तवंकृतम् ॥ ईप्सितार्थलभेत्सद्यस्त्रिसंध्यंयःपठेन्नरः ॥
॥ ७ ॥ हनुमंतप्रसादेनसर्वत्रविजयीभवेत् ॥ लक्षमावर्त्तयेद्यस्तुप्रत्यक्षोजायतेध्रुवम् ॥ ८ ॥ इति श्रीहरि

कृष्णविनिर्मितेबृ० ध० उपासनास्तबकेहनुमदुपासनाध्यायेहनुमदघोरास्त्रनिरूपणंनामप्रकरणंचतुर्विंशम् २४॥
अथहनुमल्लक्षप्रदक्षिणाविधानम् ॥ ॥ युधिष्ठिरउवाच । भगवञ्ज्ञानिनांश्रेष्ठसर्वविद्याविशारद ॥ किंचिद्विज्ञ
तुमिच्छामिवक्तुमर्हस्यशेषतः ॥ १ ॥ अज्ञानादथवाज्ञानात्प्रमादाद्वाकृतानिहि । पापानिसुबहून्यत्रविलयंयां
तितद्वद ॥ २ ॥ व्यास उवाच ॥ लक्षप्रदक्षिणाः कार्यागोग्निद्विजहनुमताम् । पृच्छतेनारदायेतिप्राहब्रह्माशृ
णुष्वतत् ॥ ३ ॥ नारदउवाच ॥ येचपापरतानित्यंधर्माधर्मविवर्जिताः । व्रतहीनादुराचाराज्ञानहीनाश्चजंतवः ॥
॥ ४ ॥ तेषांपापविनाशार्थंप्रायश्चित्तंकथंभवेत् ॥ ब्रह्मोवाच ॥ किंवर्णयामिसाधूनांमाहात्म्यंचभवादृशाम् ॥५॥
साधुसाधुचविप्रेंद्रवच्मितेव्रतमुत्तमम् ॥ ब्रह्महत्यादिपापेषुसंकलीकरणेषुच ॥ ६ ॥ जातिभ्रंशकरेवापिअभक्ष्य
भक्षणेतथा ॥ विष्णुनानिर्मितंपूर्वंव्रतंलक्षप्रदक्षिणम् ॥ ७ ॥ सर्वेपामपिपापानांनाशकंपरमंशुभम् ॥ आपादे
शुक्लपक्षेतुएकादश्यांविशेषतः ॥ ८ ॥ द्वादश्यांपौर्णमास्यांवाप्रारभेद्व्रतमुत्तमम् ॥ देशकालौतुसंकीर्त्यनत्वागुरु
विनायकौ ॥ ९ ॥ लक्षप्रदक्षिणाः कार्यास्त्रीनग्नींश्चशुचिव्रत ॥ जितेंद्रियोजितप्राणोमुखेनमनुमुच्चरेत् ॥ १० ॥
नमस्तेगार्हपत्यायनमस्तेदक्षिणाग्नये ॥ नम आहवनीयायमहावेद्यैनमोनमः ॥ ११ ॥ गवांप्रदक्षिणाः कार्या
लक्षसंख्यायथाविधि ॥ पूर्वंपूज्यचगामेकांदत्वानैवेद्यमुत्तमम् ॥ १२ ॥ पश्चात्प्रदक्षिणाः कार्यानत्वातांचपुनः
पुनः ॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ १३ ॥ यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच ॥ एवंप्रदक्षिणाः
कृत्वासर्वपापैः प्रमुच्यते ॥ १४ ॥ कर्मनिष्ठंशुचिंविप्रंपूजयेद्विधिवद्बुधः ॥ ततः प्रदक्षिणाः कार्यायावल्लक्षंभवे

द्रती ॥ १५ ॥ भूमिदेवनमस्तुभ्यंनमस्तेब्रह्मरूपिणे ॥ पूजितोदेवदैत्यैस्त्वमतःशांतिंप्रयच्छमे ॥ १६ ॥ एवंहनु
मतेकार्याभूतप्रेतविनाशिने ॥ षोडशैरुपचारैश्चपूजयेद्वायुनंदनम् ॥ १७ ॥ ततः प्रदक्षिणाः कुर्यादात्मकार्यार्थ
सिद्धये ॥ १८ ॥ मनोजवंमारुततुल्यवेगंजितेंद्रियंबुद्धिमतांवरिष्ठम् ॥ वातात्मजंवानरयूथमुख्यंश्रीरामदूतं
शरणंप्रपद्ये ॥ १९ ॥ एवंप्रदक्षिणावर्त्तंकुर्याद्देवंप्रयत्नतः ॥ भूतप्रेतपिशाचाद्याविनश्यंतिनसंशयः ॥ २० ॥ आदि
त्यादिग्रहाः सर्वेशांतिंयांतिशिवाज्ञया ॥ उद्यापनंचसर्वासांकुर्यात्पूर्णफलाप्तये ॥२१॥ उद्यापनविधानादौपुण्या
हंवाचयेत्ततः ॥ आचार्यंवरयित्वाचप्रतिमाः स्वर्णसंभवाः ॥ २२ ॥ अव्रणंकलशंपूर्णंस्थापयेन्मंडलेशुभे ॥ विर
च्यलिंगतोभद्रंपूजयेद्देवमंजसा ॥ २३ ॥ पायसंजुहुयात्तत्रतत्तन्मंत्रैर्विचक्षणः ॥ अष्टोत्तरसहस्रंतुप्रायश्चित्तंचरे
च्छुभम् ॥ २४ ॥ मंडलंदक्षिणायुक्तमाचार्यायनिवेदयेत् ॥ ब्राह्मणान्भोजयेच्छक्त्यावित्तशाठ्यविवर्जितः॥२५॥
येकुर्वंतिव्रतमिदंपापमुक्ताभवंतिते ॥ भुक्तायथेप्सितान्भोगानंतेसायुज्यमाप्नुयुः ॥ २२६ ॥ अथप्रयोगः ॥ ॥
देशकालौस्मृत्वाममभूतप्रेतपिशाचादिबाधापरिहारद्वारा आदित्यादिनवग्रहशांतिद्वारा वा श्रीमन्महारुद्रहनु
मत्प्रीत्यर्थममुकसंख्यप्रदक्षिणांकरिष्ये इति संकल्प्यषोडशोपचारैर्हनुमंतंपूजयित्वाप्रदक्षिणाःकार्याः ॥ तत्र
मंत्रः ॥ मनोजवंमारुततुल्यवेगंजितेंद्रियंबुद्धिमतांवरिष्ठम् ॥ वातात्मजंवानरयूथमुख्यं श्रीरामदूतंशरणंप्रपद्ये
॥ १ ॥ इतिमंत्रंपठन् प्रदक्षिणाःप्रतिदिनंनियमानुसारंकृत्वाउत्तरपूजांकृत्वाप्रार्थयेत् ॥ अन्यथाशरणंनास्ति
त्वमेवशरणंमम ॥ तस्मात्कारुण्यभावेनरक्षमांपरमेश्वर ॥ १ ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर ॥ यत्पूजि

तंमयादेवपरिपूर्णतदस्तुमे ॥ २ ॥ इतिक्षमाप्य अनेनामुकसंख्याप्रदक्षिणाख्येनकर्मणाश्रीहनुमद्देवताप्रीय
ताम् ॥ इतिश्रीहरिकृष्णविनिर्मितेबृ० ध० उपासनास्तबकेहनुमदुपासनाध्यायेलक्षप्रदक्षिणाविधाननिरूपणं
नामप्रकरणंपञ्चविंशम् ॥ २५ ॥ श्लोकाः १२७९ ॥ अथहनुमद्व्रतपूजापद्धतिः ॥ तत्रादौहनुमद्व्रतंकर्त्तुमारभमा
णआचारानुसारेणविशिष्टाचारपरंपराप्राप्तंयथाशक्तिद्रव्यैःपंपापूजांकरिष्ये ॥ इतिसंकल्प्य ॥ मार्गशीर्ष
मासेशुक्लत्रयोदश्यांव्रतंकरिष्यमाणः ॥ द्वादश्यामेवनियतोब्रह्मचारीजितेंद्रियः ॥ सम्यग्रात्रिंयापयित्वाब्राह्मेमु
हूर्त्तेउत्थाय कर्त्तव्यंसर्वमालोकयति ॥ शौनकाद्याऊचुः ॥ हनुमद्व्रतसंकल्पंकर्त्तुकामोत्रवीज्जनः ॥ कस्मिन्देशे
व्रतंसम्यक्कर्त्तव्यंवदसूतज ॥ १ ॥ किंचव्रतंपूर्वतरैःकुत्राचरितमद्भुतम् ॥ संतिस्थलानिबहुधागोष्ठवृंदावनादयः
॥ २ ॥ वापीकूपतडागाद्याःकुल्याःकृत्रिमविस्तृताः ॥ नद्योनदाःसागराद्याःपर्वताःसरितोद्रुमाः ॥ ३ ॥ विचार्य
बहुधातत्त्ववदनोवदतांवर ॥ सूतउवाच ॥ साधुपृष्टंमहाभागाःसम्यगेवोच्यतेमया ॥४॥ बहवःसंतिदेशाश्चपुण्याः
पुण्यविवर्धनाः ॥ तथापिवक्ष्येयद्बुद्ध्यंतच्छृण्वंतुमुनीश्वराः ॥ ५ ॥ पूर्वंहनुमतःपूजाकृतापंपासरित्तटे ॥ तस्मात्पं
पासरित्तीरेहनुमद्व्रतमुत्तमम् ॥ ६ ॥ नानादेशेषुकर्तव्यापंपापूजाप्रयत्नतः ॥ ब्राह्मेमुहूर्त्तेचोत्थायशौचादि
भिरतंद्रितः ॥ ७ ॥ नित्यकर्मसमाप्याशुयोगक्षेमंसमाविशेत् ॥ ततश्चपंचभिर्वाद्यैरुपेतोबंधुभिर्वृतः ॥ ८ ॥
तत्रत्यांचनदींकांचिद्गत्वास्नात्वाचवाग्यतः ॥ अघमर्षणमंत्रैश्चशुचिःप्रयतमानसः ॥ ९ ॥ संध्यावंदनपूर्वं
चनित्यकर्मसमाप्यच ॥ पितॄन्संतर्प्ययत्नेनललाटेतिलकोज्ज्वलः ॥ १० ॥ षोडशानुपचारांश्चपंपायाःसर्वतो

व्रती॥११॥अथपूजा ॥ हेमकूटगिरिप्रांतजनानांगिरिसानुगाम् ॥ पंपामावाहयाम्यस्यांनद्यांहृद्यांप्रयत्नतः॥१॥
आवाहनम् ॥ तरंगशतकल्लोलेरिंगत्तामरसोज्ज्वले॥ पंपानदिनमस्तुभ्यंगृहाणासनमुत्तमम् ॥२॥ आसनम् ॥
हृद्यंसुगंधसंपन्नंशुद्धंशुद्धांबुसत्कृतम् ॥ ॥ पाद्यंगृहाणपंपाख्येमहानदिनमोस्तुते ॥ ३ ॥ पाद्यम् ॥ भागीरथि
नमस्तुभ्यंस[illegible]नसुशोभने ॥ अनर्घ्यमर्घ्यमनघेगृह्यतामिदमुत्तमम् ॥ ४ ॥ अर्घ्यम् ॥ पंपानदिमहापुण्येसंपा
दितसुशोभने ॥ गोदावारिजलेनाद्यगृहाणाचमनीयकम् ॥ ५ ॥ आचमनीयम् ॥ दुग्धाज्येक्षुरसैःपुण्यैर्दध्नाचम
धुनातथा ॥ पंचामृतैःस्नापयिष्येपंपानदिनमोस्तुते ॥ ६ ॥ पंचामृतस्नानम् ॥ शुद्धनीलैःशुद्धजलैर्नारिकेलांबु
भिस्तथा ॥ पुण्यैःकृष्णानदीतोयैःसिंचामित्वांसरिद्वरे ॥ शुद्धोदकस्नानम् ॥ ७ ॥ महामूल्यंचकार्पासंदिव्य
वस्त्रमनुत्तमम् ॥ पंपानदिमहापुण्येपंपाशोभातिशोभने ॥ ८ ॥ वस्त्रम् ॥ श्रौतस्मार्तादिसत्कर्मफलदंपावनंशु
भम् ॥ यज्ञोपवीतमधुनाकल्पयेसरिदुत्तमे ॥ ९ ॥ यज्ञोपवीतम् ॥ कर्पूरगुटिकामिश्रंकस्तूर्याचविमर्दितम् ॥
यत्नेनकल्पितंगंधंलेपयेंगंसरिद्वरे ॥ १० ॥ गंधम् ॥ लक्षणोक्तान्हरिद्राक्तानक्षतांश्चोत्तमाञ्छुभान् ॥ पंपान
दिगृहाणेमाञ्छुभशोभातिवृद्धये ॥ ११ ॥ अक्षतान् ॥ अतसीकुसुमोपेतंपंकेरुहदलोज्ज्वलम् ॥ कुंकुमंशंकर
जटासंभूतेसरिदर्पये ॥ १२ ॥ कुंकुमम् ॥ कज्जलंत्रिजगद्वंद्येमहापुण्यतरंगिणि ॥ नेत्रयोःपादमनघंगृह्यतांसरि
तां वरे ॥ १३ ॥ नेत्रांजनम् ॥ शतपत्रैश्चकह्लारैःकुमुदैर्बकुलैरपि ॥ मल्लिकाजातिपुन्नागैःकेवलैश्चापिचंपकैः ॥
॥ १४ ॥ तुलसीदामभिश्चापितथाबिल्वदलैरपि ॥ पूजयामिमहापुण्येपंपानदिनमोस्तुते ॥ १५ ॥ पुष्पाणि ॥

अथांगपूजा ॥ गोदावर्य्यैनमःपादौपूजयामि ॥ कृष्णायै० गुल्फौ० ॥ पापहारिण्यैनमःजंघे ॥ सुभ्रुवेन० जानु
नी॥उरुतरंगिण्यै०ऊरू॥तडिदुज्ज्वलजवायै०कटिम्॥अंबुशोभिन्यै०नितंबं०॥अणुमध्यायै०मध्यं० ॥ सुस्तना
यै०स्तनौ०॥कंबुकंठायै०कंठं०॥ललितबाहुतरंगायै०बाहू०॥दीर्घवेण्यै० वेणीं०॥सुवक्रायै०वक्रं० ॥ दुर्वारवारित
पूरायै०शिरः०॥सहस्रमुखायै०सर्वांगंपूजयामि ॥१६॥ सदशांगंशुभंदिव्यंसगुग्गुलमनुत्तमम् ॥ साज्यंपरिमलो
द्भूतंधूपंस्वीकुरुपावने॥१७॥ धूपं० ॥ साज्यमग्निप्रकाशोद्यत्कोटिसूर्यसमद्युतिम्॥पश्यदीपंप्रसन्नांगेपंपानदिनमो
ऽस्तुते॥१८॥दीपं०॥शाल्यन्नंस्वर्णपात्रस्थंशाकापूपसमन्वितम् ॥ साज्यंदधिपायसंचनैवेद्यंप्रतिगृह्यताम् ॥१९॥
नैवेद्यम्॥पूगैःसुशोभनैश्चापिनागवल्लीदलैर्युतम् ॥ तांबूलंगृह्यतांदेविपंपानदिनमोऽस्तुते ॥२०॥ तांबूलं० ॥व्रतपू
र्तिमहाकीर्तिदिव्यस्फूर्तिप्रकीर्तिदम्॥कर्त्तुकामोव्रतमिदंसौवर्णपुष्पमर्पयेत्॥२१॥सुवर्णपुष्पं० ॥ प्रदक्षिणत्रयंदे
विप्रयत्नेनप्रकल्पितम् ॥ पश्याद्यपावनेदेविपंपानदिनमोऽस्तुते ॥ २२ ॥ प्रदक्षिणां० ॥ नमस्तेनमस्तेविशालो
ज्ज्वलांगेनमस्तेनमस्तेलसत्सत्तरंगे ॥ नमस्तेनमस्तेगिरिप्रांतरंगे नमस्तेनमस्तेकलद्धर्हिरंगे ॥ २३ ॥ नम
स्कारं० ॥ अपराधशतंदेविमत्कृतंचदिनेदिने ॥ क्षम्यतांपावनेदेविपंपानदिनमोऽस्तुते ॥ २४ ॥ क्षमापनम् ॥
पंपानदिमहापुण्यतरंगिणिनमोऽस्तुते ॥ त्वत्तीरेहनुमत्पूजाकृतारामेणधीमता ॥ २५ ॥ मनोरथफलावाप्तिस्त
स्याभीष्टंनसंशयः ॥ सुग्रीवेणचतीरेस्मिन्कपिवर्यपतेर्व्रतम् ॥ २६ ॥ सत्कृतंचमनोवांछासद्यस्तस्यबभूवसा ॥
अतस्त्वन्नीरपुलिनेकृतेहनुमतोव्रते ॥ २७ ॥ श्रेयांसिममसर्वाणिनविघ्नानिभवंत्विह ॥ इतिसंप्रार्थ्यपंपाख्यांन

दींशुभतरंगिणीम् ॥ २८ ॥ कलशोदकपाणिश्चगच्छेत्स्वगृहमादरात् ॥ २९ ॥ इतिपंपापूजासमाप्ता॥अथश्रीह
नुमत्पूजा ॥ पूर्वोच्चरितैवंगुणेतिदेशकालौस्मृत्वामयाआचरितस्यव्रतस्यआचीर्यमाणस्यचव्रतस्यसंपूर्णफला
वाप्त्यर्थं भार्ययासहहनूमत्पूजांकरिष्ये ॥ तदंगत्वेनप्रणवपूर्वकंगणेशपूजनंकृत्वाभूशुद्धिंभूतशुद्धिंकृत्वा क
लशाराधनंकृत्वापीठपूजांकुर्यात् ॥ पीठस्यअधोभागे ॥ अतलायनमः ॥ वितलायनमः ॥ सुतलायनमः ॥
रसातलायनमः ॥ तलातलायनमः ॥ महातलायनमः ॥ सप्तपातालायनमः ॥ तत्रअगाधसर्वतोशब्दात्म
जेनमः ॥ तत्रकमलेकमठायनमः ॥ तदुपरिसहस्रमणिफणाप्रकाशमानशेषाय० ॥ अष्टदिग्गजेभ्योन०
तदुपरिभूमंडलायनमः तदुपरिभूलोकाय० ॥ भुवर्लोकाय० ॥ सुवर्लोकाय० ॥ जनलोकाय० ॥ तपोलो
काय० ॥ महर्लोकाय० ॥ सत्यलोकाय० ॥ अष्टदिक्पालकेभ्योन० ॥ तन्मध्येमेरवेन० ॥ मेरोर्दक्षिणदिग्भागे
कस्मैचिद्द्रोणशैलाय० ॥ तन्मध्येसुरतरवेन० ॥ तन्मूलेसुवर्णवेदिकायै० ॥ वेद्यांवृक्षस्यपूर्वभागेनवरत्नखचित
चारुरत्नपीठाय०॥ एवंसंभावयित्वापंचरंगैः स्वस्तिकशंखपद्मैश्चरंगवल्लिंविलिख्य ॥ तन्मध्येत्रयोदशपद्मंविलि
ख्यतदुपरिशुभ्रतंदुलान्विनिक्षिप्य ॥ नूतनकलशंस्थापयित्वाशुद्धोदकेनकलशंपूरयित्वातदुपरिपीतांबरं सं
स्थाप्ययत्रोदशकमलमालिख्यमणिकायां ॥ ॐनमोभगवतेवायुनंदनायनमइतिवर्णबीजानिपूर्वादिदलेषुक्रमे
णविलिख्य ॥ त्रयोदशग्रंथियुक्तंहरिद्रादिनवदोरकंप्रतिष्ठाप्य ॥ प्राणायामपूर्वकंशुद्धांतःकरणउत्तराभिमुख
उपविश्य ॥ सीतासमेतश्रीरामचंद्रध्यानादिमानसंकृत्वाश्रीहनूमंतमावाहयेत् ॥ श्रीहनूमतःप्राणाइहप्राणाः

हनुमतः जीवइहस्थितः ॥ सर्वेंद्रियाणिवाङ्मनस्त्वक्चक्षुर्जिह्वाघ्राणपाणिपादपायूपस्थानिहनुमतइहागत्यसु
खंचिरंतिष्ठंतुस्वाहा ॥ श्रीरामचरणांभोजयुगुलस्थिरमानसम् ॥ आवाहयामिवरदहनूमंतमभीष्टदम् ॥ १ ॥
आवाहनम् ॥ कर्णिकारसुवर्णाभंवर्णनीयंगुणोत्तमम् ॥ अर्णवोल्लंघनोद्युक्तंतूर्णंध्यायामिमारुतिम् ॥ इति
ध्यानम् ॥ नवरत्नमयंदिव्यंचतुरस्रमनुत्तमम् ॥ सौवर्णमासनंतुभ्यंकल्पयेकपिनायक ॥ ३ ॥ आसनं० ॥ सुव
र्णकलशानीतंसुषष्ठुवासितमादरात् ॥ पादयोःपाद्यमनघप्रतिगृह्णप्रसीदमे ॥ ४ ॥ पाद्यं० ॥ कुसुमाक्षतसंमिश्रं
गृह्यतांकपिपुंगव ॥ दास्यामितेऽजनीपुत्रस्वनर्घ्यरत्नसंयुतम् ॥ ५ ॥ अर्घ्यं० ॥ महाराक्षसदर्पघ्नसुराधिप
सुपूजित ॥ विमलंशमलघ्नत्वंगृहाणाचमनीयकम् ॥ ६ ॥ आचमनं०॥मध्वाज्यक्षीरदधिभिःसगुडैर्मंत्रसंयुतैः ॥
पंचामृतैःपृथक्स्नानैःसिंचामित्वांकपीश्वर ॥ ७ ॥ पंचामृतस्नानं० ॥ सुवर्णकलशानीतैर्गंगादिसरिदुद्भवैः ॥
शुद्धोदकैः कपीशत्वामभिषिंचामिमारुते ॥ ८ ॥ शुद्धोदकस्नानं० ॥ ग्रथितांनवभीरत्नैर्मेखलांत्रिगुणीकृताम् ॥
मौंजमौंजीमयींपीतांगृहाणपवनात्मज ॥ कटिसूत्रं० ॥ कटिसूत्रंगृहाणेदंकौपीनंब्रह्मचारिणः ॥ कौशेयंकपिशा
र्दूलहरिद्रक्तंसुमंगलम् ॥ १० ॥ कौपीनं० ॥ पीतांबरंसुवर्णाभमुत्तरीयार्थमेवच ॥ दास्यामिजानकीप्राणत्राण
कारणगृह्यताम् ॥ ११ ॥ उत्तरीयं० ॥ श्रौतस्मार्त्तादिकर्तॄणांसांगोपांगफलप्रदम् ॥ यज्ञोपवीतमनघंधारयानि
लनंदन ॥ १२ ॥ यज्ञोपवीतं० दिव्यकर्पूरसंयुक्तंमृगनाभिसमन्वितम् ॥ सकुंकुमंपीतगंधंललाटेधारयप्रभो ॥
॥ १३ ॥ गंधं० ॥ हरिद्राक्तानक्षतांस्त्वंकुंकुमद्रव्यमिश्रितान् ॥ धारयश्रीगंधमध्येशुभशोभनवृद्धये ॥ १४ ॥

अक्षताः ॥ नीलोत्पलैःकोकनदैः कह्लारैः कमलैरपि ॥ कुमुदैः पुंडरीकैस्त्वांपूजयामिकपीश्वर ॥ १५ ॥ मल्लिकाजातिपुष्पैश्चपाटलैः कुटजैरपि ॥ केतकीबकुलैश्चूतैः पुंनागैर्नागकेसरैः ॥ १६ ॥ चंपकैः शतपत्रैश्चकरवीरैर्मनोहरैः ॥ पूजयेत्वांकपिश्रेष्ठसबिल्वैस्तुलसीदलैः ॥ १७ ॥ पुष्पंस० ॥ अथग्रंथिपूजा ॥ अंजनीसूनवेनमः ॥ प्रथमग्रंथिंपूजयामि ॥ हनुमतेनमः ॥ द्वितीयग्रं० ॥ वायुपुत्रायन० ॥ तृतीयग्रंथि० ॥ महाबलायनमः॥चतुर्थग्रंथिं० ॥ रामेष्टायनम० ॥ पंचमग्रंथिं० ॥ फाल्गुनसखाय० ॥ षष्ठग्रं० ॥ पिंगाक्षाय० सप्तमग्रंथिं० ॥ अमितविक्रमाय० अष्टमग्रं० ॥ कपीश्वराय० नवमग्रं० ॥ सीताशोकविनाशनायनमः दशमग्रं० ॥ लक्ष्मणप्राणदात्रेनमः एकादशग्रं० ॥ दशग्रीवदर्पघ्नाय० द्वादशग्रं० ॥ भविष्यद्ब्रह्मणेनमः त्रयोदशग्रं० ॥ अथांगपूजा ॥ हनूमतेनमः पादौपूजयामि ॥ सुग्रीवसखाय० गुल्फौ० ॥ अंगदमित्रायनमः जंघे० ॥ रामदासायनमः ऊरू पू० ॥ अक्षघ्नाय० ॥ कटिं० ॥ लंकादहनायमनः वालंपू०॥ राममणिदाय० नाभिं०॥ सागरोल्लंघनाय० मध्यमं० ॥ लंकामर्दनायन० केशावलिंपू० ॥ संजीवनीहर्त्रे० स्तनौ०॥सौमित्रिप्राणदाय० वक्षः पू० ॥ कुंठितदशकंठाय० कंठंपूजयामि ॥ रामाभिषेककारिणेनमः हस्तौ० ॥ मंत्ररचितरामायणायनमः वक्रंपू० ॥ प्रसन्नवदनाय० वदनं० ॥ पिंगनेत्राय० ॥ नेत्रेपूजयामि ॥ श्रुतिपारगायनमः श्रुतिंपू० ॥ ऊर्ध्वपुंड्रधारिणेनमः कपोलंपू० ॥ मणिकंठमालिनेन० शिरः पू० सर्वाभीष्टप्रदाय० सर्वांगंपूजयामि ॥ दिव्यंसुगुग्गुलंसाज्यंसदशांगंसवह्निकम् ॥ गृहाणमारुतेधूपंसुप्रियंघ्राणतत्परम् ॥ १८ ॥ धूपं० ॥ घृतपूरितमुज्ज्वालं सितसूर्यसमप्रभम् ॥

अतुलंतवदास्यामित्रतपूर्त्तेः सुदीपकम् ॥ १९ ॥ दीपं० ॥ सकाशापूपसूपाढ्यपायसानिचयत्नतः ॥
सक्षीरदधिसाज्यंचसपूपंघृतपाचितम् ॥ २० ॥ नैवेद्यं० ॥ गोदावरीजलंशुद्धंस्वर्णपात्राहृतंप्रियम् ॥ पानी
यंपावनोद्भूतंस्वीकुरुत्वंदयानिधे ॥ २१ ॥ पानीयं० ॥ आपोशनंमस्तेऽस्तुपापराशितृणानलम् ॥ कृष्णावे
णीजलेनैवकुरुष्वपवनात्मज ॥ २२ ॥ उत्तरापोशनं० ॥ दिवाकरसुतानीतजलेनस्पृशगंधिना ॥ हस्तप्रक्षा
लनार्थायस्वीकुरुष्वदयानिधे ॥ २३ ॥ हस्तप्रक्षालनं० ॥ रघुवीरपदन्यासस्थिरमानसमारुत ॥ कावेरीजल
पूर्णेनस्वीकुर्वाचमनीयकम् ॥ २४ ॥ शुद्धाचमनीयं० ॥ वायुपुत्रनमस्तुभ्यंपुष्पंसौवर्णकंप्रियम् ॥ पूजयिष्या
मितेमूर्ध्निनवरत्नसमुज्ज्वलम् ॥ २५ ॥ सुवर्णपुष्पं० ॥ तांबूलमनघस्वामिन्प्रयत्नेनप्रकल्पितम् ॥ अवलोकय
नित्यंतेपुरतोरचितंमया ॥ २६ ॥ तांबूलं० ॥ शतकोटिमहारत्नदिव्यमद्रत्नपात्रके ॥ नीराजनमिदंदृष्टेरति
थीकुरुमारुते ॥ २७ ॥ नीराजनं० ॥ मूर्धानंदिवो० ॥ २८ ॥ पुष्पांजलिं० ॥ पापोऽहं० ॥ २९ ॥ इतिप्रदक्षिणा ॥
नमस्तेस्तुमहावीरनमस्तेवायुनंदन ॥ विलोक्यकृपयानित्यंत्राहिमांभक्तवत्सल ॥ ३० ॥ नमस्कारं० ॥
येपुत्रपौत्रादिसमस्तभाग्यंवांछंतिवायोस्तनयंप्रपूज्य ॥ त्रयोदशग्रंथियुतंतदंकंवध्नंतिहस्तेवरदोरसूत्रम् ॥३१॥
दोरग्रहणम् ॥ अंजनीगर्भसंभूतरामकार्यार्थसंभव ॥ वरदोरकृताभासारक्षमांप्रतिवत्सरम् ॥ ३२ ॥ पूर्वदोर
कोत्तारणम् ॥ अनेनभगवान्कार्यप्रतिपादकविग्रहम् ॥ हनूमान्प्रीणयित्वाचप्रार्थितोहृदितिष्ठतु ॥ ३३ ॥
प्रार्थना ॥ यस्यस्मृत्या० ॥ ३४ ॥ वायनदानम् ॥ तदंगत्वेनब्राह्मणपूजनं ॥ ददातिप्रतिगृह्णातिहनूमानेवनः

स्वयम् ॥ व्रतस्यास्यचपूर्त्यर्थंप्रतिगृह्णातुवायनम् ॥ ३५ ॥ इतिवायनमंत्रः ॥ इतिपूजाविधानंसंपूर्णम् ॥ अथो द्यापनम् ॥ अथयजमानोमहानद्यांमाध्याह्निकस्नानंकृत्वानित्यकर्मविधायाचार्यब्रह्मऋत्विग्भिः सहोपविश्य प्राणानायम्यएवंगुणेत्यादिशुभतिथौधर्मपत्नीसमेतस्यममहनुमद्व्रतकल्पोक्तसंपूर्णफलावाप्तयेधर्मार्थकाममो क्षचतुर्विधपुरुषार्थसिद्ध्यर्थंश्रीमदांजनेयप्रीत्यर्थंहनुमद्व्रतोद्यापनाख्यंकर्मकरिष्ये ॥ अस्मिन्कर्मणिआचार्य त्वंभवंतः कुर्वंत्वितिवेदवेत्तारंकुटुंबिनं वित्तहीनंशांतमाचारवंतंब्राह्मणमाचार्यत्वेनयोज्य ॥ एवंलक्षणसंयुक्त मपरंब्राह्मणंब्रह्मत्वेनयोज्य ततः त्रयोदशकलशावाहनार्थंत्रयोदशब्राह्मणानृत्विग्विधौनियोज्यएवमावरणंकृ त्वाततोनिष्कमात्रसुवर्णेनतदर्धेनयथाशक्त्याहनुमत्प्रतिमांकृत्वाप्राणानायम्यहनुमद्व्रतोद्यापनांगत्वेनपंपापूजां कृत्वा॥ पुनः प्राणानायम्यशुभतिथौधर्मपत्नीसमेतस्यमममनोवांछाफलसिद्ध्यर्थंश्रीमदांजनेयप्रीत्यर्थमांजनेय प्रतिमापूजांकरिष्येइतिसंकल्प्यतत्प्रतिमाशुद्ध्यर्थंपंचामृतस्नपनंकृत्वामूलमंत्रेणशुद्धोदकस्नपनंकृत्वा ॥ पंच प्रस्थपरिमितश्वेततंदुलोपरिअलंकृत्य पूर्णकलशंसंस्थाप्यतदुपरिवस्त्रंनिधायतदुपरिप्रतिमामाधायप्राणप्रतिष्ठां कृत्वा ॥ ततस्त्रयोदशकलशान्प्रतिमावेष्टितांस्तंदुलेषुनिधायकलशपूजांकृत्वातेषुकलशेषुवस्त्राण्यावेष्टयतेषु नानाविधफलानिदत्वासुवर्णानिकृत्वाआंजनेयपूजार्थकलशपूजांकृत्वाततः पीठार्चनंकुर्यात् ॥ पीठस्याधस्त लाधः तलायनमः ॥ वितलाय० ॥ सुतलाय० ॥ रसातला० ॥ तलातलाय० ॥ महातलाय० ॥ पाताला य० ॥ तत्रागाधसर्वतोमुखसुधाब्धिभ्यांनमः ॥ तत्रकस्मैचित्कमठाय० ॥ तदुपरिसहस्रफणिफणामंडितम

णिप्रकाशिताशेषलोकशेषाय० ॥ अष्टदिग्गजेभ्यो० ॥ तदुपरिभूमंडलाय० ॥ दिक्पालकेभ्योनमः ॥ तन्मध्ये
मेरवेनमः ॥ मेरोर्दक्षिणदिग्भागेकस्मैचिद्रत्नसानवेन० ॥ तन्मध्येसुरतरवे० ॥ तन्मूलेसुवर्णवेदिकायैनमः ॥
वेद्यांवृक्षस्यपूर्वभागेनवरत्नखचितनूतनपीठायनमः ॥ एवंभावयित्वा ॥ स्वामिन्सर्वजगन्नाथयावत्पूजावसा
नकम् ॥ तावत्त्वंप्रीतिभावेनप्रतिमायांस्थिरोभव ॥ ततस्त्रयोदशग्रंथियुक्तदोरकंप्रतिष्ठाप्य ॥ अथध्यानम् ॥
वंदेविद्युद्वलयलसितंब्रह्मसूत्रंदधानंकर्णद्वंद्वेकनकवलयेकुंडलेधारयंतम् ॥ सत्कौपीनंकटिपरिहृतंकामरूपंक
पींद्रंनित्यंध्यायेदनिलतनयंवज्रदेहंवरिष्ठम् ॥ १ ॥ प्रतप्तजांबूनददिव्यभासंदेदीप्यमानाग्निविभासुराक्षम् ॥
प्रफुल्लपंकेरुहशोभनास्यंध्यायेहृदिस्थंपवमानसूनुम् ॥ २ ॥ अथकल्पोक्तप्रकारेणआवाहनादिषोडशोपचारा
न्कृत्वा ॥ नमःसर्वहितार्थायजगदाराध्यकर्मणे ॥ अमेयायांजनेयायपुनरर्घ्यंपुरोऽर्पयेत् ॥ ३ ॥ इतिप्रस
न्नार्घ्यं० ॥ भक्त्याप्रकल्पितैरेतैरुपचारैश्चषोडशैः ॥ भगवन्हनुमानीशप्रीयतांमेप्रियोक्तिभिः ॥ ४ ॥ उपचार
समर्पणम् ॥ यस्यस्मृत्या० ॥५॥ एवंरात्रौप्रथमयामपूजांकृत्वा ॥ तस्यांरात्र्यांप्रतियामपूजांकुर्वन्गीतवादित्रा
दिभिर्मंगलध्वनिभिर्भागवतपठनादिपुराणश्रवणादिभिर्जागरणंकृत्वा परेद्युःप्रभातेमहानद्यांब्राह्मणैःसह स्ना
नंकृत्वानित्यकर्मविधायगंधादिभिरलंकृत्यगृहमागत्यपूर्ववत्पूजांकृत्वाहनुमद्व्रतोद्यापनांगहोमंकुर्यात् ॥ क्षीरा
न्नेनआज्येनपिप्पलसमिद्भिःकल्पोक्तद्रव्येणमूलमंत्रेणाष्टोत्तरसहस्रमष्टोत्तरशतंवाहोमंकुर्यात् ॥ पूर्णाहुतिंचद ॥ ६९ ॥
त्वाब्रह्मणेदक्षिणांदत्वाततआचार्यंपूजयित्वाप्रतिमांसवस्त्रांसालंकारांसतंडुलांचदत्वातद्दानसाद्गुण्यार्थंदक्षिणांद

त्वा ॥ आचार्यायसवत्सांसालंकारांपयस्विनींगांदद्यात्॥ततऋग्विभ्यःसवस्त्रान्कलशान्दत्वादक्षिणांदत्वाविशि
ष्टपंगुदीनांधकृपणजनान्ब्राह्मणान्संतर्प्य ऋत्विगादिब्राह्मणाञ्छतंपंचाशत्पंचविंशतिंत्रयोदशवाब्राह्मणान्मिष्टा
न्नभोजनेनसंतर्प्य॥भूरिदानंविभवानुसारेणकुर्यात्॥एवंकुर्वन्यजमानःकृतार्थोभवति ॥हनुमान्सुप्रीतोवरदोभूत्वा
पुत्रपौत्रादिसर्वकामान्प्रयच्छति ॥ इतिशौनकादिकंप्रतिसूतःप्रोवाच॥१॥इतिहनुमद्व्रतोद्यापनपूजाप्रयोगविधिः
॥श्लोकाः१२८०॥ अथकथा ॥ मुनयोजाह्नवीतीरेशौनकाद्याद्विजोत्तमाः ॥ प्रणम्यजगतांनाथंरमानाथंमुहुर्मुहुः
॥ १ ॥सूतंपुराणवक्तारंमहाभागवतोद्धवम् ॥ दृष्ट्वाप्रांजलयः सर्वेप्रोचुर्व्रतपरायणाः ॥२॥ ऋषयऊचुः ॥ वासुदे
वकथाप्रश्नेव्रतानिबहुशस्त्वया ॥ प्रोक्तानिकृपयास्माकंव्रतमन्यद्वदस्वनः॥सूतउवाच॥ शृणुध्वमृषयः सर्वेमत्तः
परतरंव्रतम् ॥ चतुर्णामपिवर्णानांकर्तव्यंपावनोत्तमम् ॥ ४ ॥ गुह्याद्गुह्यतमंलोकेमंगलानांचमंगलम् ॥ आयुरा
रोग्यफलदंपुत्रपौत्रफलप्रदम् ॥ ६ ॥ संपत्करंप्रतिदिनंविद्याप्रदमनुत्तमम् ॥ कदाचिद्भगवान्व्यासःसहशिष्यैर्द
यानिधिः ॥ ६ ॥ युधिष्ठिरंद्वैतवनेद्रष्टुमभ्यागतोहठात् ॥ निर्वैरंमृगसंकीर्णंसपुष्पफलवृक्षकम् ॥ ७॥ सपंच
मपिकाकीर्णंसपङ्क्षिशिखिसंकुलम् ॥ श्रुताध्ययनसंपन्नैर्यज्वभिर्बहुवेदिभिः ॥ ८ ॥ पुत्रपौत्रैः परिवृतैः कलितं
ललितंततम् ॥ शास्त्रव्याख्यानचतुरैर्वेदघोपोपशोभितम् ॥ ९ ॥ महाभागवतोद्गीतंलीलाहरिकथाश्रय
म् ॥ नित्यान्नदाननिलयंस्तुत्यंसर्वाश्रमेषुच ॥ १० ॥ सानुजंसकलत्रंचतत्रापश्यद्युधिष्ठिरम् ॥ कृष्णद्वैपायनं
सोपिश्रुत्वाभ्यागतमादरात् ॥ ११ ॥ अतिदूरंचनिष्क्रम्यपुरस्कृत्यसहानुजैः ॥ एकांतसदनंनीत्वानिविष्टं

पर्यपूजयत् ॥ १२ ॥ द्रौपदीरचितांपूजामुररीकृत्यसद्द्विजैः ॥ सादरंकुशलंधर्मपप्रच्छेंद्रंयथागुरुः ॥ १३ ॥ वेदव्यासउवाच ॥ भद्रंखलुमहाराजकुशलंखलुपार्थिव ॥ आस्तेखलुमहावीरः सुखमेववृकोदरः ॥ १४ ॥ धनंजयःसुखीचैवयमौचसुखिनावुभौ ॥ संपादितंपाशुपतंदिव्यमस्त्रंकिरीटिना ॥ १५ ॥ अन्यद्दुह्याद्दुह्यतमंवदतः शृणुतन्मम ॥ अस्तिव्रतंमहाराजकेवलंसंपदालयम् ॥ १६ ॥ कृतेचास्मिन्व्रतेशीघ्रंभवद्राज्यागमोभवेत् ॥ धर्मपुत्रउवाच ॥ किंनामव्रतमाहात्म्यमैश्वर्यंतस्यकीदृशम् ॥ देवतातत्रकाप्रोक्ताकोविधिःपूजनंकथम् ॥ ॥ १७ ॥ कस्मिन्मासेचकैः पूर्वंव्रतमाचरितंप्रभो ॥ इदानीमेवतत्कुर्यांयदिशीघ्रफलप्रदम् ॥ १८ ॥ इत्थंत्वयातिदुःखार्तेकृपाचेन्मयिसानुजे ॥ भवादृशानांमहतांबांधवोममनापरः ॥ १९ ॥ युधिष्ठिरेणसमुनिःसविश्वासमुदीरितः ॥ प्रत्युवाचस्मरञ्चित्तेहनुमंतंमुहुर्मुहुः ॥ २० ॥ व्यासउवाच ॥ शृणुराजेंद्रतन्नामहनुमद्व्रतमद्भुतम् ॥ उच्चारणादेवतस्यकार्यसिद्धिर्नसंशयः ॥ २१ ॥ दुष्टग्रहोच्चाटनंचमहाज्वरनिवारणम् ॥ अलंहिवहुभिर्वाक्यैरभीष्टदमितिस्मृतम् ॥२२॥ पुराहिभगवान्कृष्णः पांचाल्याप्रार्थितोभृशम् ॥ आचचक्षेव्रतमिदंसविशेषंहनूमतः॥ २३ ॥ तत्प्रभावादेवलब्धास्त्वयापरमसंपदः ॥ कदाचिदपिपांचाल्याःकंठस्थंव्रतदोरकम् ॥ २४ ॥ दृष्ट्वा धनंजयः प्राहकिमेतद्धृतमित्यलम् ॥ साचचक्षेसुमधुरंव्रतागमनमुत्तमम् ॥२५॥ श्रुत्वैतद्दैववशगः पार्थःक्रोधसमाकुलः॥ प्राहवैपरुषंवाक्यंसोच्चैश्वर्यातिगर्वितः॥२६॥ध्वजेममनिवद्धोयंवानरोनिरतंमया॥ किंदास्यतिममब्रूहि वटुर्वन्याशनोमृगः ॥२७॥ तिर्यग्जन्मपराधीनोयोपितोबुद्धिरीदृशी॥ एतादृशैर्व्रतैरस्मान्नवंचयितुमर्हसि ॥२८॥

इत्युक्तासातिदुःखार्ताप्राहतथ्यंधनंजयम् ॥ भोराजन्सुकुमारेणआख्यातंममसुप्रियम् ॥ २९ ॥ जगन्नाथे
नकृष्णेनतथातस्मान्मयाधृतम् ॥ अर्जुनउवाच ॥ दुःशीलेछद्मनातुभ्यंतेनहास्यात्समीरितम् ॥३०॥मन्निबद्धस्य
तस्यैवमदधीनस्यदासवत्॥पूजातेनकथंप्रोक्तादुष्टचित्तेनविष्णुना ॥३१॥पतिव्रतानचत्वंवैपतिवाक्यपरायणा ॥
त्याज्यंतद्दोरकंतेतुव्रतांगंव्रतमप्युत ॥३२॥ इतीरितेयंसंत्रस्तापतित्वात्पतिदेवता॥त्यक्त्वातुदोरकंतत्रन्यस्तंचो
द्यानमध्यमे॥ ३३ ॥ ततः सकलसंपत्तिर्यथागतमगात्तदा ॥ भवद्भिरीदृशंप्राप्तमायासाद्वनसेवनम् ॥३४॥ त्रयो
दशग्रंथियुक्तदोरस्योल्लंघनेनवै ॥ भोक्तव्यंतत्फलंसौख्यंवत्सरैश्चत्रयोदशैः ॥ इत्येतत्सकलंश्रुत्वाकृष्णास
स्मारतद्व्रतम् ॥ ३५ ॥ सत्यमित्याहसर्वेषांपतीनांपुरतस्तदा ॥ व्यासउवाच ॥ अपरंश्रोतुमिच्छाते इतिहासंव
दामिते ॥ पुराहिराघवः सीतांद्रष्टुकामः सलक्ष्मणः ॥ ३६ ॥ ऋष्यमूकमुपागम्यहनुमंतंददर्शह ॥ ससुग्रीवेणते
नासौरामः सख्यंचकारह ॥ ३७ ॥ श्रीहनूमानुवाच ॥ रामराममहाबाहोयद्वक्ष्येशृणुतद्वचः ॥ भक्तस्यतवमे
रामकार्यातुरवशेरितः ॥ ३८ ॥ अहंपुरामघवतावज्रेणहनुताडितः ॥ तदाप्रभृतिहनुमानितिख्यातोस्मिभूतले ॥
तदामांमूर्छितंदृष्ट्वापितामेवायुरब्रवीत् ॥ ३९ ॥ यतोनिपातितः पुत्र इतिक्रुद्धस्तिरोदधे ॥ तदाब्रह्मा
दयोदेवाः साक्षाद्भूत्वावदंतिह ॥ आंजनेयचिरंजीवत्वममेयपराक्रमः ॥ ४० ॥ अशेषरामकार्याणिसाधय
यत्वंकपीश्वर ॥ वायुपुत्रप्लवंगेशहनुमद्व्रतनायकम् ॥ ४१ ॥ तद्यश्चकारविमलंभृशंप्रियतमोद्भुतम् ॥ तस्यसर्वा
णिकार्याणिसिध्यंतीतिवरंददुः ॥ ४२ ॥ कार्यार्थिनाराघवेणकृतमित्यब्रवीच्चमाम् ॥ स्मृतंतद्वैरामवाक्यंकुरु

स्वामिन्मयेरितम् ॥ ४३ ॥ नमंतव्यं वृथानाथसत्यंमंतव्यमीश्वर ॥ रोचतेयदिलच्चित्तेतत्कुरुष्वार्थसिद्धये ॥
॥ ४४ ॥ इत्युक्त्वासंस्थितेतास्मिन्तदासंक्रमतेहठात् ॥ आकाशवाणीतत्रोच्चैर्यदुक्तंसत्यमेवतत् ॥ ४५ ॥
इति रामप्रसन्नश्चश्रुत्वागगनभाषितम् ॥ चिकीर्षयाव्रतस्यास्यहनुमंतमथाब्रवीत् ॥ ४६ ॥ हनुमन्कोविधि
स्तस्यकदाकर्तव्यमेवतत् ॥ ब्रूहीतिवचनंश्रुत्वाप्रत्युवाचमरुत्सुतः ॥ ४७ ॥ मार्गशीर्षेसितेपक्षेत्रयोदश्यांजय
प्रदे ॥ अभिजिन्निकटेकालेत्रयोदशघटीयुते ॥ ४८ ॥ त्रयोदशग्रंथियुतंदोरकंकलशेस्थितम् ॥ हरिद्राभंततस्तत्र
मामावाह्यप्रपूजयेत् ॥ ४९ ॥ पीतगंधंपीतपुष्पंपीतद्रव्यंविशेषतः ॥ नमोभगवतेवायुनंदनायेतिमंत्रतः ॥ ५० ॥
ॐ कारेणानेनपूजांकुर्यात्षोडशयत्नतः॥ सोपचारंब्राह्मणायदद्याद्वायनमुत्तमम् ॥५१॥ त्रयोदशापूपमात्रंगोधू
मान्नंप्रदापयेत् ॥ सदक्षिणंसतांबूलंब्राह्मणान्भोजयेत्तदा ॥ ५२ ॥ प्रारंभेत्वस्यकार्याणिसिध्यंत्येवनसंशयः ॥
तावत्कर्तव्यमेतद्वैयत्नतश्चत्रयोदश ॥ इति ॥५३॥ उद्यापनंयथान्यायंकुर्यात्कलशवस्त्रकैः ॥ संपूर्णमपिचेत्युक्त
मित्युक्त्वाविररामह ॥५४॥ रामोपिसहसुग्रीवः सानुजस्तच्चकारह॥कार्यसिद्धिरभूत्तस्यसुग्रीवश्चविभीषणः
॥ ५५ ॥ विभीषणादिरामोक्तंव्रतंकृत्वायथोदितम्॥तदाप्रभृतिलोकेस्मिन्विश्रुतंहनुमद्व्रतम् ॥५६॥ भवेत्सहायो
हनुमान्कृतेतस्यव्रतेशुभे ॥ तस्मात्त्वयापिकर्त्तव्यंव्रतमेतन्नृपोत्तम ॥ ५७ ॥ मासानांमार्गशीर्षोहमित्युक्तंस्वामि
नास्वयम् ॥ तस्मात्त्वमपितत्कृत्वालब्धराज्योभविष्यसि ॥ ५८ ॥ इत्याकर्ण्यवचस्तस्यसर्वेपिमुदमाययुः ॥अथ
सायमभूत्तत्रसूर्येवाराशिमागते॥५९॥ ॥ वाराशिंजलराशिंसमुद्रमित्यर्थः ॥ नीत्वारात्रिंततःप्रातउत्थायतपसः
सुतः ॥ व्यासस्यपुरतश्चक्रेव्रतमेतत्सुविस्तरम् ॥६०॥ उद्यापनंतथाहोमंसघृतंपायसैः शुभैः ॥ मूलमंत्रोक्त

सूक्तेनव्रतांगमकरोत्ततः ॥६१॥ साक्षाद्धनुमतः पूजापांचाल्यासहकल्पिता ॥ अथसंवत्सरेतीतेपांडवोराज्य
माययौ ॥ ६२ ॥ तस्मात्कुरुध्वंमुनयोव्रतानामुत्तमंव्रतम् ॥ इतिकृत्वाभवंतश्चप्राप्ताभीष्टमनोरथाः ॥ ६३ ॥
तेपिचक्रुर्यथान्यायंव्रतमेतत्सुमंगलम् ॥ इतिश्रीहनुमत्कल्पंलिखितंयस्यवेश्मनि ॥ ६४ ॥ कृतेव्रतेचयत्पुण्यं
तत्पुण्यफलमश्नुते॥पठतेयोहनुमतःकल्पंयःशृणुयान्नरः॥६५॥वाचयेद्यस्तुसद्भक्त्यासससंपूर्णमनोरथः ॥ वेदविद्ब्रा
ह्मणःश्रीमान्क्षत्रियोमितविक्रमः ॥६६॥ वैश्योपिचधनाध्यक्षोशूद्रःकृषिमहाधनः॥रोगार्त्तोमुच्यतेरोगात्सुतार्थी
लभतेसुतान्॥६७॥मोक्षार्थीलभतेमोक्षंधनार्थीलभतेधनम् ॥ इदंव्रतंनरःकृत्वासांगोपांगंहनूमतः॥६८॥ ॐ नमो
भगवतेवायुनंदनायेतिमंत्रतः ॥ ६९ ॥ अभिमंत्र्यत्रिवारंयोगंधंहस्तेनलेपयेत् ॥ ललाटेधारयेद्यस्तुतस्य
लोपोवशीभवेत् ॥ ७० ॥ धृत्वाललाटेतिलकंयोराजगृहमन्वगात् ॥ नृपतिस्तस्यवशगोप्रत्यहंजायतेध्रुवम्
॥ ७२ ॥ हनुमंतंस्मरन्रामप्रयाणंयदिगच्छति ॥ सर्वत्रविजयीभूत्वापुनरागच्छतिध्रुवम् ॥ ७२ ॥ हनुमत्कल्प
मेतत्तुभक्तियुक्तःकरोतियः ॥ राजद्वारेचयुद्धेचसभायांव्यावहारिके ॥ ७३ ॥ हुताशनेचपवनेव्याघ्रसिंहभये
पुच ॥ समस्तकार्योद्योगेचसर्वत्रविजयीभवेत् ॥ ७४ ॥ त्रयोदशग्रंथियुक्तंव्रतदोरंहनूमतः ॥ धारयेद्यःकंठमूले
दक्षिणेप्यथवाकरे॥७५॥तस्यसर्वाभीष्टसिद्धिर्भवत्येवनसंशयः॥ ब्राह्मणक्षत्रियविशांशूद्रादीनांचसर्वशः ॥ ७६ ॥
व्रतंसंपत्करंशीघ्रंस्त्रीणांचैवविशेपतः॥सत्यंसत्यंपुनःसत्यंव्रतमेतद्विधानतः ७७॥ नमस्तेनमस्तेमहावायुसूनोनम
स्तेनमस्तेभविष्यद्विधातः॥नमस्तेनमस्तेसदाभीष्टदातर्नमस्तेनमस्तेऽनिशंरामभक्त ॥७८॥ इतिश्रीभविष्योत्तर
पुराणेव्यासप्रोक्तहनुमद्व्रतकथा ॥ श्लोकाः १२९८ ॥ अथहनुमद्व्रतोद्यापनकल्पः ॥ ऋषयऊचुः ॥ सूतसूत पुनः

प्राज्ञसर्वशास्त्रविशारद ॥ हनुमद्व्रतमाहात्म्यंत्वयासम्यगुदीरितम् ॥१॥ उद्यापनविधिंसम्यक्सूतनोवक्तुमर्हसि॥
उद्यापनंविनानैवव्रतस्यफलहेतुकम् ॥ २ कर्तव्यंतुकथंभक्तैरखंडफलभोक्तृभिः ॥ एतत्सर्वसमाचक्ष्वफलंचनि
यमंतथा ॥ ३ ॥ सूतउवाच ॥ शृण्वंतुऋषयः सर्वेव्रतस्योद्यापनक्रमम् ॥ मार्गशीर्षेतथामाघेवैशाखेश्रावणेतथा
॥ ४ ॥ कार्तिकेफाल्गुनेचैवमूढदोषविवर्जिते ॥ आदौमध्येतथाचांतेकुर्यादुद्यापनंबुधः ॥ ५ ॥ शुक्लपक्षेत्रयो
दश्यांपूर्वाह्णेस्नानमाचरेत् ॥ नित्यकर्मविधायादौपूजास्थानंसमाविशेत् ॥ ६ ॥ पुण्याहवाचनंकुर्याद्गीतवा
दित्रमंगलैः ॥ आचार्यंवरयेत्पश्चाद्विधिज्ञंवेदपारगम् ॥७॥ ब्रह्माणंवरयेत्तत्रवेदवेदांगपारगम् ॥ ऋत्विजश्चापि
वरयेत्त्रयोदशगुणान्वितान् ॥ ८ ॥ मंडपंकारयेद्रम्यंचतुर्द्वारसमन्वितम् ॥ कदलीस्तंभसंयुक्तंवितानाद्यैर्विराजि
तम्॥९॥फलपुष्पसमायुक्तंतोरणाद्यैरलंकृतम् ॥ मंडपस्यतुमध्येचगोमयेनोपलिप्यते॥१०॥द्विपट्दलसमायुक्तं
पद्मंचपरिकल्पयेत् ॥ चातुर्वर्णकरंगैश्चस्वलंकृतंप्रयत्नतः ॥११॥ दलेषुस्थापयेत्कुंभान्दद्यात्ताम्रमयाञ्छुभान् ॥
पद्मस्यकर्णिकायांतुसौवर्णंकलशंन्यसेत् ॥ १२ ॥ एषुकुंभेषुवस्त्राणिप्रच्छाद्यसुसमाहितः ॥ मापमात्रसुवर्णेन
तदर्धार्धेनवापुनः ॥ १३ ॥ प्रतिमांकारयेत्तत्रवायुपुत्रस्यधीमतः ॥ वस्त्रद्वयेन संवेष्टयसंस्थाप्यकलशोपरि ॥
॥ १४ ॥ पूर्ववत्पूजयेद्भक्त्याकल्पोक्तविधिनाततः ॥ सौवर्णराजतंवापितंतुकुर्याद्दृढंनवम् ॥ १५ ॥ त्रयोदशग्रंथि
युतंपूजयित्वायथाविधि ॥ यावज्जीवंततोधार्यंसर्वसंपत्प्रदायकम् ॥ १६ ॥ रात्रौजागरणंकृत्वाप्रतियामंप्रपूज
येत् ॥ ततः प्रभातसमयेस्नानंकृत्वायथाविधि ॥ १७ ॥ पूर्ववत्पूजयेद्देवंरामदूतंकपीश्वरम् ॥ स्वगृह्योक्तविधा
नेनप्रतिष्ठाप्यानलंद्विजः ॥ १८ ॥ क्षीराज्येनघृतेनाज्यसमिद्भिः पिप्पलोद्भवैः ॥ फलैर्नानाविधैःपक्वैर्मधुनाचवि

शेषतः ॥ १९ ॥ होमंकुर्यात्प्रयत्नेनमूलमंत्रेणचव्रती ॥ अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा ॥ २० ॥ होमशेषंततः
कृत्वापूर्णाहुतिमथाचरेत् ॥ आचार्यंपूजयेत्पश्चाद्वस्त्रालंकारभूषणैः ॥ २१ ॥ ब्राह्मणानृत्विजश्चापिपूजयित्वा
तथैवच ॥ आचार्यायसुशांतायश्रोत्रियायकुटुंबिने ॥ २२ ॥ प्रतिमांवस्त्रसंयुक्तांदद्याद्वैदक्षिणान्विताम् ॥ कल
शान्वस्त्रसंयुक्तानृत्विग्भ्यश्चप्रदापयेत् ॥ २३ ॥ व्रतस्यफलसिद्ध्यर्थंधेनुंदद्यात्पयस्विनीम् ॥ हेमशृंगींरौप्य
खुरींसवत्सांवस्त्रसंयुताम् ॥२४॥ब्राह्मणेदक्षिणांदत्वाब्राह्मणान्भाजयेत्ततः॥भुंजीयाद्बंधुभिः सार्धंवायुपुत्रंहृदिस्म
रन् ॥ २५ ॥ एवंयः कुरुतेमर्त्यः कपिभक्तिसमन्वितः ॥ पुत्रपौत्रैः परिवृतोधनधान्यसमाकुलः ॥ २६ ॥ इह
भुक्त्वाखिलान्भोगान्प्रसादाच्चहनूमतः ॥ सर्वपापविनिर्मुक्तः सयातिब्रह्मणः पदम् ॥ २७ ॥ एवंश्रुत्वाशौनका
द्याः संतुष्टाः स्वाश्रमंगताः ॥ येपठंतीदमाख्यानंशृण्वंतिश्रद्धयान्विताः ॥ २८ ॥ तेसर्वेपापनिर्मुक्तायास्यंतिप
रमांगतिम् ॥ २९ ॥ इति श्रीभविष्योत्तरपुराणेसूतशौनकसंवादेहनुमद्व्रतोद्यापनकल्पः ॥ १०७ ॥ इति
श्रीहरिकृष्णविनिर्मितेबृ० ध० उपासनास्तबकेहनुमदुपासनाध्यायेहनुमद्व्रतपूजापंपापूजाव्रतोद्यापनपूजापद्ध
तिकथोद्यापनविधानानांनिरूपणंनामप्रकरणंषड्विंशम् ॥ २६ ॥ श्लोकाः १३२७ ॥ श्रीगणेशायनमः ॥ अस्यश्री
हनुमत्सहस्रनामस्तोत्रमंत्रस्यब्रह्माऋषिः हनुमान्देवताअनुष्टुपछंदः रांबीजं मंशक्तिः श्रीहनुमत्प्रीत्यर्थंतद्दिव्य
सहस्रनामभिरमुकसंख्यार्कपुष्पादिद्रव्यसमर्पणेविनियोगः ॥अथध्यानं ॥ उद्यदादित्यसंकाशमुदारभुजविक्र
मम् ॥ कंदर्पकोटिलावण्यंसर्वविद्याविशारदम् ॥ १ ॥ श्रीरामहृदयानंदंभक्तकल्पमहीरुहम् ॥ अभयंवरदंदो
र्भ्यांचिंतयेन्मारुतात्मजम् ॥ २ ॥ इतिध्यानम् ॥

१ हनुमतेनमः
२ श्रीपदायनमः
३ वायुपुत्रायनमः
४ रुद्रायनमः
५ अनवायनमः
६ अजरायनमः
७ अमृत्यवेनमः
८ वीरवीरायनमः
९ ग्रामवासायनमः
१० जनाश्रयायनमः
११ धनदायनमः
१२ निर्गुणायनमः
१३ कायायनमः
१४ वीरायनमः
१५ निधिपतयेनमः
१६ मुनयेनमः
१७ पिंगाक्षायनमः
१८ वरदायनमः
१९ वाग्मिनेनमः
२० सीताशोकविनाश-
नायनमः
२१ शिवायनमः
२२ शर्वायनमः
२३ परायनमः
२४ अव्यक्तायनमः
२५ व्यक्तव्यक्तायनमः
२६ रसाधरायनमः
२७ पिंगकेशायनमः
२८ पिंगरोम्णेनमः
२९ श्रुतिगम्यायनमः
३० सनातनायनमः
३१ अनादयेनमः
३२ भगवतेनमः
३३ देवायनमः
३४ विश्वहेतवेनमः
३५ निराश्रयायनमः
३६ आरोग्यकर्त्रेनमः
३७ विश्वेशायनमः
३८ विश्वनायकायनमः
३९ हरीश्वरायनमः
४० भर्गायनमः
४१ रामायनमः
४२ रामभक्तायनमः
४३ कल्याणायनमः
४४ प्रकृतिस्थिरायनमः
४५ विश्वंभरायनमः
४६ विश्वमूर्तयेनमः
४७ विश्वाकारायनमः
४८ विश्वदायनमः
४९ विश्वात्मनेनमः
५० विश्वासेव्यायनमः
५१ विश्वायनमः
५२ विश्वहरायनमः
५३ रवयेनमः
५४ विश्वचेष्टायनमः
५५ विश्वागम्यायनमः
५६ विश्वधेयायनमः
५७ कलाधरायनमः
५८ प्लवंगमायनमः
५९ कपिश्रेष्ठायनमः
६० ज्येष्ठायनमः
६१ विद्यायनमः
६२ वनेचरायनमः
६३ बालायनमः
६४ वृद्धायनमः
६५ युनेनमः
६६ तत्वायनमः
६७ तत्वगम्यायनमः
६८ सख्येनमः
६९ अजायनमः
७० अंजनीसूनवेनमः
७१ अव्यग्रायनमः
७२ ग्रामस्वांतायनमः
७३ धराधरायनमः
७४ भूर्लोकायनमः
७५ भुवर्लोकायनमः
७६ स्वर्लोकायनमः
७७ महर्लोकायनमः
७८ जनोलोकायनमः
७९ तपसेनमः

८० अव्ययायनमः
८१ सत्यायनमः
८२ ओंकारगम्यायनमः
८३ प्रणवायनमः
८४ व्यापकायनमः
८५ अमलायनमः
८६ शिवायनमः
८७ धर्मप्रतिष्टात्रेनमः
८८ रामेष्टायनमः
८९ फाल्गुनप्रियायनमः
९० गोष्पदिनेनमः
९१ कृतवारीशायनमः
९२ पूर्णकामायनमः
९३ धराधिपायनमः
९४ रक्षोघ्नायनमः
९५ पुंडरीकाक्षायनमः

९६ शरणागतवत्सला
यनमः
९७ जानकीप्राणदात्रेनमः
९८ रक्षःप्राणापहारका-
यनमः
९९ पूर्णायनमः
१०० सस्यायनमः
१ पीतवाससेनमः
२ दिवाकरसमप्रभा-
यनमः
३ द्रोणहर्त्रेनमः
४ शक्तिनेत्रेनमः
५ शक्रयेनमः
६ राक्षसमारकायनमः
७ रक्षोघ्नायनमः
८ रामदूतायनमः

९ शाकिनीजीविकाह-
रायनमः
११० भुभुकारहताराते-
नमः
११ गर्वायनमः
१२ पर्वतच्छेदनायनमः
१३ हेतवेनमः
१४ अहेतवेनमः
१५ प्रांशवेनमः
१६ विश्वभर्त्रेनमः
१७ जगद्गुरवेनमः
१८ जगन्नेत्रेनमः
१९ जगन्नाथायनमः
१२० जगदीशायनमः
२१ जनेश्वरायनमः
२२ जगच्छ्रितायनमः

२३ हरयेनमः
२४ श्रीशायनमः
२५ गरुडस्मयभंजका-
यनमः
२६ पार्थध्वजायनमः
२७ वायुपुत्रायनमः
२८ अमितपुच्छायनमः
२९ अमितप्रभायनमः
१३० ब्रह्मपुच्छायनमः
३१ परब्रह्मणेनमः
३२ पुच्छरोमेष्टायनमः
३३ सुग्रीवादियुतायनमः
३४ ज्ञानिनेनमः
३५ वानरायनमः
३६ वानरेश्वरायनमः
३७ कल्पस्थायिनेनमः

३८ चिरंजीविनेनमः
३९ प्रसन्नायनमः
१४० सदाशिवायनमः
४१ सन्नतायनमः
४२ सद्गतयेनमः
४३ युक्तयेनमः
४४ मुक्तिदायनमः
४५ कीर्तिनायकायनमः
४६ कीर्तयेनमः
४७ कीर्तिप्रदायनमः
४८ समुद्रायनमः
४९ श्रीप्रदायनमः
१५० शिवायनमः
५१ उदधिक्रमणायनमः
५२ देवायनमः

५३ संसारभयनाशना-
यनमः
५४ वालिबंधकृतेनमः
५५ विश्वजेत्रेनमः
५६ विश्वप्रतिष्ठितायनमः
५७ लंकारयेनमः
५८ कालपुरुषायनमः
५९ लंकेशगृहभंजना-
यनमः
१६० भूतावासायनमः
६१ वासुदेवायनमः
६२ वसवेनमः
६३ त्रिभुवनेश्वरायनमः
६४ श्रीरामरूपायनमः
६५ कृष्णायनमः
६६ लंकाप्रासादभंजका-
यनमः

६७ कृष्णायनमः
६८ कृष्णस्तुतायनमः
६९ शांतायनमः
१७० शांतिदायनमः
७१ विश्वपावनायनमः
७२ विश्वभोक्त्रेनमः
७३ मारिघ्नायनमः
७४ ब्रह्मचारिणेनमः
७५ जितेंद्रियायनमः
७६ ऊर्ध्वगायनमः
७७ लांगूलिनेनमः
७८ मालिनेनमः
७९ लांगूलाहतराक्षसा-
यनमः
१८० समीरतनुजायनमः
८१ वीरायनमः

८२ वीरमारायनमः
८३ जयप्रदायनमः
८४ जगन्मंगलदायनमः
८५ पुण्यायनमः
८६ पुण्यश्रवणकीर्तना-
यनमः
८७ पुण्यकीर्तयेनमः
८८ पुण्यगीतयेनमः
८९ जगत्पावनपावना-
यनमः
१९० देवेशायनमः
९१ मितमारायनमः
९२ रामभक्तिविधायका-
यनमः
९३ धात्रेनमः
९४ ध्येयायनमः

९५ भगायनमः
९६ साक्षिणेनमः
९७ चेत्रेनमः
९८ चैतन्यविग्रहायनमः
९९ ज्ञानदायनमः
२०० प्राणदायनमः
१ प्राणायनमः
२ जगत्प्राणायनमः
३ समीरणायनमः
४ विभीषणप्रियाय-
नमः
५ शूरायनमः
६ पिप्पलाश्रयायनमः
७ सिद्धिदायनमः
८ सिद्धाश्रयायनमः
९ कालायनमः

२१० कालभक्षकायनमः
११ भर्जितायनमः
१२ लंकेशनिधनस्थायि-
नेनमः
१३ लंकाविदाहकायनमः
१४ ईश्वरायनमः
१५ चंद्रसूर्याग्निनेत्राय-
नमः
१६ कालाग्नयेनमः
१७ प्रलयांतकायनमः
१८ कपीनायनमः
१९ कपीशायनमः
२२० पुण्यराशयेनमः
२१ द्वादशराशिगायनमः
२२ सर्वाश्रयायनमः
२३ अप्रमेयात्मनेनमः

२४ रेवत्यादिनिवारका-
यनमः
२५ लक्ष्मणप्राणदात्रेनमः
२६ सीताजीवनहेतुका-
यनमः
२७ रामध्येयायनमः
२८ हृषीकेशायनमः
२९ विष्णुभक्तायनमः
२३० जटिनेनमः
३१ बलिनेनमः
३२ सिद्धायनमः
३३ देवारिदर्पघ्नेनमः
३४ होत्रेनमः
३५ धात्रेनमः
३६ कर्त्रेनमः
३७ जगत्प्रभवेनमः

३८ नगरग्रामपालायनमः
३९ शुद्धायनम
२४० बुद्धायनमः
४१ निरंतनायनमः
४२ निरंजनायनमः
४३ निर्विकल्पायनमः
४४ गुणातीतायनमः
४५ भयंकरायनमः
४६ हनुमतेनमः
४७ दुराराध्यायनमः
४८ तपस्साध्यायनमः
४९ अमरेश्वरायनमः
५० जानकीधनशोको-
त्थतापहर्त्रेनमः
५१ पराशरायनमः
५२ वाङ्मयायनमः

५३ सदसद्रूपायनमः
५४ कारणायनमः
५५ प्रकृतेःपरायनमः
५६ भाग्यदायनमः
५७ निर्मलायनमः
५८ नेत्रेनमः
५९ पुच्छलंकाविदाहका-
यनमः
२६० पुच्छबद्धायनमः
६१ यातुधानायनमः
६२ यातुधानरिपुप्रिया-
यनमः
६३ छायापहारिणेनमः
६४ भूतेशायनमः
६५ लोकेशायनमः
६६ सद्गतिप्रदायनमः

६७ प्लवंगेश्वरायनमः
६८ क्रोधायनमः
६९ क्रोधसंरक्तलोचना-
यनमः
२७० क्रोधहर्त्रेनमः
७१ तापहर्त्रेनमः
७२ भक्ताभयायनमः
७३ वरप्रदायनमः
७४ भक्तानुकंपिनेनमः
७५ विश्वेशायनमः
७६ पुरुहूतायनमः
७७ पुरंदरायनमः
७८ अग्नयेनमः
७९ विभावसवेनमः
२८० भास्वतेनमः
८१ यमायनमः

८२ निर्ऋतयेनमः
८३ वरुणायनमः
८४ वायुगतिमतेनमः
८५ वायवेनमः
८६ कुबेरायनमः
८७ ईश्वरायनमः
८८ रवयेनमः
८९ चंद्रायनमः
२९० कुजायनमः
९१ सौम्यायनमः
९२ गुरवेनमः
९३ काव्यायनमः
९४ शनैश्चरायनमः
९५ राहवेनमः
९६ केतवेनमः
९७ मरुतेनमः

९८ होत्रेनमः
९९ धात्रेनमः
३०० हर्त्रेनमः
१ समीरजायनमः
२ मशकीकृतदेवार-
येनमः
३ दैत्यारयेनमः
४ मधुसूदनायनमः
५ कामायनमः
६ कपयेनमः
७ कामपालायनमः
८ कपिलायनमः
९ विश्वजीवनायनमः
३१० भागीरथोपदांभो-
जायनमः
११सेतुबंधविशारदायनमः
१२ स्वाहाकारायनमः
१३ स्वधाकारायनमः
१४ हविषेनमः
१५ कव्यायनमः
१६ हव्यायनमः
१७ प्रकाशकायनमः
१८ स्वप्रकाशायनमः
१९ महावीरायनमः
३२० लघवेनमः
२१ अमितविक्रमायनमः
२२ भंडानोड्डानगतिमते
नमः
२३ सद्गतयेनमः
२४ पुरुषोत्तमायनमः
२५ जगदात्मनेनमः
२६ जगद्योनयेनमः
२७ जगदंतायनमः
२८ अनंतकायनमः
२९ विपाप्मनेनमः
३३० निष्कलंकायनमः
३१ महतेनमः
३२ महदहंकृतयेनमः
३३ खायनमः
३४ वायवेनमः
३५ पृथिव्यैनमः
३६ आपायनमः
३७ वह्नयेनमः
३८ दिक्कालायनमः
३९ एकस्थायनमः
३४० क्षेत्रज्ञायनमः
४१ क्षेत्रहंत्रेनमः
४२ पल्वलीकृतसागरा-
यनमः
४३ हिरण्मयायनमः
४४ पुराणायनमः
४५ खेचरायनमः
४६ भूचरायनमः
४७ मनसेनमः
४८ हिरण्यगर्भायनमः
४९ सुत्राम्णेनमः
३५० राजराजायनमः
५१ विषांपतयेनमः
५२ वेदांतवेद्यायनमः
५३ उद्गीथायनमः
५४ वेदायनमः
५५ वेदांगपारगायनमः
५६ प्रतिग्रामस्थितयेनमः
५७ सद्यःस्फूर्तिदात्रेनमः
५८ गुणाकरायनमः
५९ नक्षत्रमालिनेनमः
३६० भूतात्मनेनमः
६१ सुरभयेनमः
६२ कल्पपादपायनमः
६३ चिंतामणयेनमः
६४ गुणनिधयेनमः
६५ प्रजाद्वारायनमः
६६ अनुत्तमायनमः
६७ पुण्यश्लोकायनमः
६८ पुरारातयेनमः
६९ ज्योतिष्मतेनमः
३७० शर्वरीपतयेनमः
७१ किलिकिलिरावसंत्र-

स्तभूतप्रेतपिशाच-
कायनमः
७२ ऋणत्रयहरायनमः
७३ सूक्ष्मायनमः
७४ स्थूलायनमः
७५ सर्वगतयेनमः
७६ पुंसेनमः
७७ अपस्मारहरायनमः
७८ स्मर्त्रेनमः
७९ श्रुतयेनमः
३८० गाथायैनमः
८१ स्मृतयेनमः
८२ मनवेनमः
८३ स्वर्गद्वारायनमः
८४ प्रजाद्वारायनमः
८५ मोक्षद्वारायनमः

८६ यतीश्वरायनमः
८७ नादरूपायनमः
८८ परब्रह्मणेनमः
८९ ब्रह्मणेनमः
३९० ब्रह्मपुरातनायनमः
९१ एकायनमः
९२ अनेकायनमः
९३ जनायनमः
९४ शुक्लायनमः
९५ स्वयंज्योतिषेनमः
९६ अनाकुलायनमः
९७ ज्योतिर्ज्योतिषेनमः
९८ अनादयेनमः
९९ सात्विकायनमः
४०० राजसायनमः
१ तमसेनमः

२ तमोहर्त्रेनमः
३ निरालंबायनमः
४ निराकारायनमः
५ गुणाकरायनमः
६ गुणाश्रयायनमः
७ गुणामयायनमः
८ बृहत्कायायनमः
९ बृहद्यशसेनमः
४१० बृहद्धनुषेनमः
११ बृहत्पादायनमः
१२ बृहन्मूर्ध्नेनमः
१३ बृहत्स्वनायनमः
१४ बृहत्कायायनमः
१५ बृहन्नासायनमः
१६ बृहद्बाहवेनमः
१७ बृहत्तनवेनमः

१८ बृहद्यत्नायनमः
१९ बृहत्कार्यायनमः
४२० बृहत्पुच्छायनमः
२१ बृहत्करायनमः
२२ बृहद्गतयेनमः
२३ बृहत्सेव्यायनमः
२४ बृहल्लोकायनमः
२५ फलप्रदायनमः
२६ बृहच्छक्तयेनमः
२७ बृहद्वांच्छाफलदाय-
नमः
२८ बृहदीश्वरायनमः
२९ बृहल्लोकनुतायनमः
४३० द्रष्ट्रेनमः
३१ विद्याद्दात्रेनमः
३२ जगद्गुरवेनमः

३३ देवाचार्यायनमः
३४ सत्यवादिनेनमः
३५ ब्रह्मवादिनेनमः
३६ कलाधरायनमः
३७ सप्तपातालगामिने-
नमः
३८ मलयाचलसंश्रयाय-
नमः
३९ उत्तराशास्थितायनमः
४० श्रीदायनमः
४१ दिव्यौषधीवशायनमः
४२ खगायनमः
४३ शाखामृगायनमः
४४ कर्पीन्द्रायनमः
४५ पुराणायनमः
४६ प्राणचंचुरायनमः

४७ चतुरायनमः
४८ ब्राह्मणायनमः
४९ योगिनेनमः
४५० योगगम्यायनमः
५१ परावरायनमः
५२ अनादयेनमः
५३ निधनायनमः
५४ व्यासायनमः
५५ वैकुंठायनमः
५६ पृथिवीपतयेनमः
५७ अपराजितयेनमः
५८ जितारातयेनमः
५९ सदानंददायनमः
४६० ईशित्रेनमः
६१ गोपालायनमः
६२ गोपतयेनमः

६३ योक्त्रेनमः
६४ कलयेनमः
६५ कालायनमः
६६ परात्परायनमः
६७ मनोवेगिनेनमः
६८ सदायोगिनेनमः
६९ संहारभयनाशनाय-
नमः
४७० तत्वदात्रेनमः
७१ तत्वज्ञायनमः
७२ तत्वायनमः
७३ तत्वप्रकाशायनमः
७४ शुद्धायनमः
७५ बुधायनमः
७६ नित्ययुक्तायनमः
७७ भक्ताकारायनमः

७८ जगद्रथायनमः
७९ प्रलयायनमः
४८० अमितमायायनमः
८१ मायातीतायनमः
८२ विमत्सरायनमः
८३ मायानिर्जितरक्षसे-
नमः
८४ मायानिर्मितविष्टपा-
यनमः
८५ मायाश्रयायनमः
८६ निर्लेपायनमः
८७ मायानिवर्त्तकायनमः
८८ सुखायनमः
८९ सुखासुखप्रदायनमः
४९० नागायनमः

९१ महेशकृतसंस्तवाय-
नमः
९२ महेश्वरायनमः
९३ सत्यसंधायनमः
९४ शरभायनमः
९५ कलिपावनायनमः
९६ रसायनमः
९७ रसज्ञायनमः
९८ सन्मानायनमः
९९ रूपायनमः
५०० चक्षुषेनमः
१ स्तुतयेनमः
२ रवायनमः
३ प्राणायनमः
४ गंधायनमः
५ स्पर्शायनमः

६ स्पर्शनायनमः
७ अहंकारमानगायनमः
८ नेतिनेतीतिगम्या-
यनमः
९ वैकुंठभजनप्रियायनमः
५१० गिरिशायनमः
११ गिरिजाकांतायनमः
१२ दुर्वाससेनमः
१३ कवयेनमः
१४ अंगिरसेनमः
१५ भृगवेनमः
१६ वसिष्ठायनमः
१७ च्यवनायनमः
१८ नारदायनमः
१९ तुंबरायनमः
५२० अमलायनमः

२१ विश्वक्षेत्रायनमः
२२ विश्वबीजायनमः
२३ विश्वनेत्रायनमः
२४ विश्वपायनमः
२५ याजकायनमः
२६ यजमानायनमः
२७ पावकायनमः
२८ पित्रेनमः
२९ श्रद्धायैनमः
५३० बुद्ध्यैनमः
३१ क्षमायैनमः
३२ तंद्रायैनमः
३३ मंत्रायनमः
३४ मंत्रयित्रेनमः
३५ सुरायनमः
३६ राजेंद्रायनमः

३७ भूपतयेनमः
३८ रुंडमालिनेनमः
३९ संसारसारथयेनमः
५४० नित्यायनमः
४१ संपूर्णकामायनमः
४२ भक्तकामदुघेनमः
४३ उत्तमायनमः
४४ गणपायनमः
४५ केशवायनमः
४६ भ्रात्रेनमः
४७ पित्रेनमः
४८ मात्रेनमः
४९ मारुतयेनमः
५५० सहस्रमूर्धेनमः
५१ सहस्रास्यायनमः
५२ सहस्राक्षायनमः

५३ सहस्रपादायनमः
५४ कामजिसेनमः
५५ कामदहनायनमः
५६ कामायनमः
५७ काम्यफलप्रदायनमः
५८ मुद्रापहारिणेनमः
५९ रक्षोघ्नायनमः
५६० क्षितिभारहरायनमः
६१ अकलायनमः
६२ नखदंष्ट्रायुधायनमः
६३ विष्णवेनमः
६४ भक्ताभयवरप्रदा-
यनमः
६५ दर्पघ्नेनमः
६६ दर्पदायनमः
६७ इष्टायनमः

६८ शतमूर्तयेनमः
६९ अमूर्तिमतेनमः
५७० महानिधयेनमः
७१ महाभागायनमः
७२ महागर्भायनमः
७३ महर्द्धिदायनमः
७४ महाकारायनमः
७५ महायोगिनेमः
७६ महातेजसेनमः
७७ महाधुतयेनमः
७८ महाकर्मणेनमः
७९ महानादायनमः
५८० महामंत्रायनमः
८१ महामतयेनमः
८२ महाशयायनमः
८३ महोदरायनमः

८४ महादेवात्मकायनमः
८५ विभवेनमः
८६ रुद्रकर्मणेनमः
८७ अकृतकर्मणेनमः
८८ रत्ननाभायनमः
८९ कृतागमायनमः
५९० अंभोनिधिलंघना-
यनमः
९१ सिंहायनमः
९२ सत्यधर्मायनमः
९३ प्रमोदनायनमः
९४ जितामित्रायनमः
९५ जयायनमः
९६ सोमायनमः
९७ विजयायनमः
९८ वायुवाहनायनमः

५९ जीवायनमः
६०० धात्रेनमः
१ सहस्रांशवेनमः
२ मुकुंदायनमः
३ भूरिदक्षिणायनमः
४ सिद्धार्थायनमः
५ सिद्धिदायनमः
६ सिद्धसंकल्पायनमः
७ सिद्धिहेतुकायनमः
८ सप्तपातालचरणा-
यनमः
९ सप्तर्षिगणवंदिताय
नमः
६१०सप्ताब्धिलंघनायनमः
११ वीरायनमः

१२ सप्तद्वीपोरुमंडला-
यनमः
१३ सप्तांगराज्यसुखदा-
यनमः
१४ सप्तमातृनिवेशिता-
यनमः
१५ सप्तस्वर्लोकमुकुटा-
यनमः
१६ सप्ताहोत्रेनमः
१७ स्वराश्रयायनमः
१८ सप्तछंदायनमः
१९ निधयेनमः
६२० सप्तछंदसेनमः
२१ सप्तजनाश्रयायनमः
२२ सप्तसामायनमः
२३ उपगीतायनमः

२४ सप्तपातालसंश्रया-
यनमः
२५ बलभीमायनमः
२६ पातालदेवताहंत्रेनमः
२७ शास्त्रेनमः
२८ चातुर्यसागरायनमः
२९ उद्यदक्षिणदोर्दंडा-
यनमः
६३० चपलांगायनमः
३१ प्रतोपकायनमः
३२ वैष्णवायनमः
३३ विश्वरूपात्मनेनमः
३४ वनारयेनमः
३५ कल्पभूरुहायनमः
३६ लोहितांगायनमः
३७ गदापाणयेनमः

३८ धूर्त्तायनमः
३९ सिंदूरलेपनायनमः
६४० कोटिकंदर्पसौंदर्या-
यनमः
४१ कपिवृंदप्रपूजिता-
यनमः
४२ रुद्रावतारायनमः
४३ गंभीरायनमः
४४ गंभीरध्वानसंभवा-
यनमः
४५ सामगैकशिरोरत्ना-
यनमः
४६ गानविद्याप्रकाशका-
यनमः
४७ स्वर्णयज्ञोपवीतिने-
नमः

४८ कुमारायनमः
४९ ब्रह्मदीक्षितायनमः
६५० अश्रमायनमः
५१ परमोत्साहायनमः
५२ ऐश्वर्यौदार्यसागरा-
यनमः
५३ पंचाननायनमः
५४ विराडात्मनेनमः
५५ स्वराजेनमः
५६ एकादशाननायनमः
५७ विधिस्तुतायनमः
५८ कृपामूर्त्तयेनमः
५९ रामहृदेनमः
६६० भक्तवत्सलायनमः
६१ अदाह्यायनमः
६२ अच्छेद्यायनमः

६३ आधारायनमः
६४ वज्रांगायनमः
६५ भुजविक्रमायनमः
६६ श्रीरामहृदयानंदा-
यनमः
६७ चिरायुषेनमः
६८ पूर्णपिंडजायनमः
६९ ध्यानशीलायनमः
६७० प्रशांतात्मनेनमः
७१ रामनामामृताशना-
यनमः
७२ मेघरूपायनमः
७३ मेघवृष्टिनिवारका-
यनमः
७४ मेघजीवनहतवेनमः
७५ मेघश्यामायनमः

७६ परात्मकायनमः
७७ समीरतनयायनमः
७८ बोध्रेनमः
७९ तत्वविद्याविशारदा-
यनमः
६८० अमोघायनमः
८१ अमोघहृष्टयेनमः
८२ दिष्टदायनमः
८३ अनिष्टनाशायनमः
८४ अर्थायनमः
८५ अनर्थापहारिणेनमः
८६ समर्थायनमः
८७ रामसेवकायनमः
८८ अर्थिनेनमः
८९ धन्यायनमः
६९० सुराराताये नमः

९१ पुंडरीकाक्षायनमः
९२ आत्मभुवेनमः
९३ संकर्षणायनमः
९४ विशुद्धात्मनेनमः
९५ विद्याराशयेनमः
९६ सुरेश्वरायनमः
९७ अचलोद्धारकायनमः
९८ नित्यायनमः
९९ सेतुकृतेनमः
७०० रामसारथयेनमः
१ आनंदायनमः
२ परमानंदायनमः
३ मत्स्यायनमः
४ कूर्मायनमः
५ निधयेनमः
६ शूरायनमः

७ वराहायनमः
८ नारसिंहायनमः
९ वामनायनमः
७१० जमदग्निजायनमः
११ रामायनमः
१२ कृष्णायनमः
१३ शिवायनमः
१४ बुद्धायनमः
१५ कल्पिनेनमः
१६ रामाश्रयायनमः
१७ हरायनमः
१८ नंदिनेनमः
१९ शृंगिणेनमः
७२० चंडिनेनमः
२१ गणेशायनमः
२२ गणसेवितायनमः

२३ कर्माध्यक्षायनमः
२४ सुरारामायनमः
२५ विश्रामायनमः
२६ जगतीपतयेनमः
२७ जगन्नाथायनमः
२८ कपीशायनमः
२९ सर्वावासायनमः
७३० सदाश्रयायनमः
३१ सुग्रीवादिस्तुता
यनमः
३२ दांतायनमः
३३ सर्वकर्मणेनमः
३४ प्लवंगमायनमः
३५ नखदारितरक्षसेनमः
३६ नखयुद्धविशा-
रदायनमः

३७ कुशलायनमः
३८ सुधनायनमः
३९ शेषायनमः
७४० वासुकयेनमः
४१ तक्षकायनमः
४२ सुवर्णवर्णायनमः
४३ बलाढ्यायनमः
४४ पुरजेत्रेनमः
४५ अघनाशनायनमः
४६ कैवल्यदीपायनमः
४७ कैवल्यायनमः
४८ गरुडायनमः
४९ पन्नगायनमः
७५० गुरवेनमः
५१ क्लिक्लिरावहता-
रातयेनमः

५२ गर्वायनमः
५३ पर्वतभेदनायनमः
५४ वज्रांगायनमः
५५ वज्रवज्रायनमः
५६ भक्तायनमः
५७ भक्तवज्रनिवारणाय-
नमः
५८ नखायुधायनमः
५९ मणिग्रीवायनमः
७६० ज्वालिनेनमः
६१ मालिनेनमः
६२ भास्करायनमः
६३ प्रौढप्रतापायनमः
६४ स्रपनायनमः
६५ भक्ततापनिवारका
यनमः

६६ शरणायनमः
६७ जीवनायनमः
६८ भोक्रेनमः
६९ नानाचेष्टायनमः
७७० चंचलायनमः
७१ स्वस्थायनमः
७२ अस्वास्थ्यघ्नेनमः
७३ दुःखशांतनायनमः
७४ पवनात्मजायनमः
७५ पावनायनमः
७६ पवनायनमः
७७ कांतायनमः
७८ भक्तांगायनमः
७९ सहनायनमः
७८० बलायनमः
८१ मेघनादरिपवेनमः

८२ मेघनादसंहतराक्ष-
सायनमः
८३ क्षरायनमः
८४ अक्षरायनमः
८५ विनितात्मनेनमः
८६ वानरेशायनमः
८७ सतांगतयेनमः
८८ श्रीकंठायनमः
८९ शितिकंठायनमः
७९० सहायायनमः
९१ असहनकायनमः
९२ अस्थूलायनमः
९३ अनणवेनमः
९४ भर्गायनमः
९५ देवायनमः
९६ संसृतिनाशायनमः

९७ अध्यात्मविद्यायनमः
९८ सारायनमः
९९ अध्यात्मकुशला-
यनमः
८००सुधियेनमः
१ अकल्मषायनमः
२ सत्यहेतवेनमः
३ सत्यदायनमः
४ सत्यगोचरायनमः
५ सत्यगर्भायनमः
६ सत्यरूपायनमः
७ सत्यायनमः
८ सत्यपराक्रमायनमः
९ अंजनीप्राणलिंगाय-
नमः
८१० वायुवंशोद्भवायनमः

११ अश्रुतयेनमः
१२ भद्ररूपायनमः
१३ सुरूपायनमः
१४ चित्ररूपधृषेनमः
१५ मैनाकवंदितायनमः
१६ सूक्ष्मदर्शनायनमः
१७ विजयायनमः
१८ जयायनमः
१९ क्रांतदिङ्मंडला-
यनमः
८२० रुद्रायनमः
२१ प्रकटीकृतविक्रमा-
यनमः
२२ कंबुकंठायनमः
२३ प्रसन्नात्मनेनमः
२४ ह्रस्वनासायनमः

२५ वृकोदरायनमः
२६ लंबोष्ठायनमः
२७ कुंडलिनेनमः
२८ चित्रमालिनेनमः
२९ योगविदांवरायनमः
८३० विपश्चितेनमः
३१ कवयेनमः
३२ आनंदविग्रहायनमः
३३ अनव्यशासनायनमः
३४ फल्गुनीसूनवेनमः
३५ अव्ययायनमः
३६ योगात्मनेनमः
३७ योगतत्परायनमः
३८ योगविदेनमः
३९ योगकर्त्रेनमः
८४० योगयोनयेनमः

४१ दिगंबरायनमः
४२ अकारादिहकारां-
तायनमः
४३ वर्णनिर्मितायनमः
४४ विग्रहायनमः
४५ उलूखलमुखायनमः
४६ सिद्धायनमः
४७ संस्तुतायनमः
४८ प्रथमेश्वरायनमः
४९ श्लिष्टजंघायनमः
८५० श्लिष्टपाणयेनमः
५१ श्लिष्टजानवेनमः
५२ शिखाधरायनमः
५३ सुशर्मणेनमः
५४ अमितशर्मिणेनमः

५५ नारायणपरायणा-
यनमः
५६ जिष्णवेनमः
५७ भविष्णवेनमः
५८ रोचिष्णवेनमः
५९ ग्रसिष्णवेनमः
८६० स्थास्नवेनमः
६१ हरयेनमः
६२ रुद्रानुकृतेनमः
६३ वृक्षकंपनायनमः
६४ भूमिकंपनायनमः
६५ गुणप्रवाहायनमः
६६ सूत्रात्मनेनमः
६७ वीतरागायनमः
६८ स्तुतिप्रियायनमः

६९ नागकन्याभयध्वंसि-
नेनमः
८७० ऋतुपर्णायनमः
७१ कपालभृतेनमः
७२ अनाकुलायनमः
७३ भगायनमः
७४ अपायायनमः
७५ अनपायायनमः
७६ वेदपारगायनमः
७७ अक्षरायनमः
७८ पुरुषायनमः
७९ लोकनाथायनमः
८८० ऋक्षप्रभवेनमः
८१ दृढायनमः
८२ अष्टांगयोगायनमः
८३ फलभुवेनमः

८४ सत्यसंधायनमः
८५ पुरुहुतायनमः
८६ श्मशानस्थाननिल-
यायनमः
८७ प्रेतविद्रावणायनमः
८८ श्रमायनमः
८९ पंचाक्षरपरायनमः
८९० पंचमातृकायनमः
९१ रंजनायनमः
९२ ध्वजायनमः
९३ योगिनेनमः
९४ वृंदवंद्यायनमः
९५ श्रियायनमः
९६ शत्रुघ्नायनमः
९७ अनंतविक्रमायनमः
९८ ब्रह्मचारिणेनमः

९९ इंद्रियरिपवेनमः
९०० धृतदंडायनमः
१ दशात्मकायनमः
२ अप्रपंचायनमः
३ सदाकारायनमः
४ शूरसेनाविदारका-
यनमः
५ वृद्धायनमः
६ प्रमोदायनमः
७ आनंदायनमः
८ सप्तजिह्वपतयेनमः
९ धरायनमः
९१० नवद्वारपुराधारा-
यनमः
११ प्रत्यग्रायनमः
१२ सामगायकायनमः
१३ षट्चक्रधाम्नेनमः

१४ स्वर्लोकायनमः
१५ भयहृतेनमः
१६ मानदायनमः
१७ अमदायनमः
१८ सर्ववश्यकरायनमः
१९ शक्तयेनमः
९२० अनंतायनमः
२१ अनंतमंगलायनमः
२२ अष्टमूर्तिधरायनमः
२३ नेत्रेनमः
२४ विरूपायनमः
२५ स्वरसुंदरायनमः
२६ धूमकेतवेनमः
२७ महाकेतवेनमः
२८ सत्यकेतवेनमः
२९ महारथायनमः

९३० नंदीप्रियायनमः
३१ स्वतंत्रायनमः
३२ मेखलिनेमः
३३ डमरूप्रियायनमः
३४ लोहांगायनमः
३५ सर्वविदेनमः
३६ धन्विनेनमः
३७ खड्गदायनमः
३८ शर्वायनमः
३९ ईश्वरायनमः
९४० फलभुजेनमः
४१ फलहस्तायनमः
४२ सर्वकर्मफलप्रदा-
यनमः
४३ धर्माध्यक्षायनमः
४४ धर्मफलायनः

४५ धर्मायनमः
४६ धर्मप्रदायनमः
४७ अर्थदायनमः
४८ पंचविंशतितत्वज्ञा-
यनमः
४९ तारकब्रह्मतत्परा-
यनमः
९५० त्रिमार्गवसतिनेनमः
५१ भीमायनमः
५२ सर्वदुष्टनिबर्हणा-
यनमः
५३ ऊर्जस्वतेनमः
५४ निष्कलायनमः
५५ शूलिनेनमः
५६ मालिनेनमः
५७ गर्जायनमः
५८ निशाचरायनमः

५९ रक्तांबरधरायनमः
९६० रक्तायनमः
६१ रक्तमालाविभूषणा-
यमनः
६२ वनमालिनेनमः
६३ शुभांगायनमः
६४ श्वेतायनमः
६५ श्वेतांबरायनमः
६६ यूनेनमः
६७ जयायनमः

६८ अजेयायनमः
६९ परीवादायनमः
९७० सहस्रवदनायनमः
७१ कवयेनमः
७२ शाकिनीडाकिनी-
यक्षरक्षोभूतप्रभंज-
कायनमः
७३ सद्योजातायनमः
७४ कामगतयेनमः
७५ ज्ञानमूर्त्तयेनमः

७६ यशस्करायनमः
७७ शंभुतेजसेनमः
७८ सार्वभौमायनमः
७९ विष्णुभक्तयेनमः
९८० प्लवंगमायनमः
८१ चतुर्नवतिमंत्रज्ञा-
यनमः
८२ पौलस्त्यबलदर्पघ्ने-
नमः
८३ सर्वलक्ष्मीप्रदायनमः

८४ श्रीमतेनमः
८५ अंगदप्रियायनमः
८६ ईतितुदेनमः
८७ स्मृतयेनमः
८८ बीजायनमः
८९ सुरेशायनमः
९९० संसारभयनाशना-
यनमः
९१ उत्तमायनमः

९२ श्रीपरिवारायनमः
९३ श्रीभुवेनमः
९४ उग्रायनमः
९५ कामदुघेनमः
९६ तारकायनमः
९७ भगवतेनमः
९८ त्रात्रेनमः
९९ स्वस्तिदात्रेनमः
१००० सुमंगलायनमः

अनेनसहस्रनाम्नाऽमुकद्रव्यसमर्पणेनश्रीहनुमद्देवताप्रीयताम् ॥ इति श्रीबृ० ध० उपासनास्तबकेहनुमदुपासनाध्यायेहनुमत्सहस्रनामावलीनिरूपणंनामप्रकरणंसप्तविंशम् ॥ २७ ॥

अथ हनुमज्जन्ममाहात्म्यकथा ॥ ॥ अथ तेसंप्रवक्ष्यामिजयंतीव्रतमुत्तमम् ॥ पुरातुकेसरीनामवानरोवानरर्ष
भः ॥ १ ॥ तस्यभार्यांजनीनामऋष्यमूकगिरौतपः ॥ चकारसुमहद्घोरंसप्तवर्षसहस्रकम् ॥ २ ॥ तपसातेन
संतुष्टःशंभूवाचवरंव्रणु ॥ सापिवव्रेयशस्वंतंमहाभक्तंमहाबलम् ॥ ३ ॥ वज्रदेहंपुत्रवरमुमाकांतस्तदाब्रवीत् ॥
एकादशोमहारुद्रस्तवपुत्रोभविष्यति ॥ ४ ॥ हस्तांजलिंप्रसार्यैवममध्यानपराभव ॥ नेत्रेपिधायतिष्ठस्ववायु
श्चात्रागमिष्यति ॥ ५ ॥ तवांजलौप्रसादंचदत्वांतर्धानमेष्यति ॥ तत्प्रसादंभक्षयित्वातवपुत्रोभविष्यति ॥ ६ ॥
इत्युक्त्वांतर्दधेशंभुःसांजनीतत्रसंस्थिता ॥ एतस्मिन्नंतरेराज्ञोयज्ञेदशरथस्यच ॥७॥ कैकेयीहस्ततोःपिंडंजहा
रचिल्हिपक्षिणी ॥ गच्छंत्याकाशमार्गेणतदावायुर्महानभूत् ॥ ८ ॥ तुंडात्प्रगलितेपिंडेवायुर्नीत्वांजलौंजनेः ॥
क्षिप्तवान्सापितंपिडंभक्षयामासतत्क्षणात् ॥ ९ ॥ नवमासेगतेपुत्रंसुषुवेसांजनीशुभम् ॥ चैत्रेमासिसितेपक्षे
पौर्णमास्यांकुजेऽहनि ॥ १० ॥ मौंजीमेखलयायुक्तःकौपीनपरिधारकः ॥ कर्णयोकुंडलेप्रातस्तथायज्ञोपवीत
कम् ॥ ११ ॥ प्रवालसदृशोवर्णोमुखेपुच्छेचरक्तकः ॥ एवंवानररूपेणप्रकटोऽभूत्क्षुधातुरः ॥१२॥ आलोकय
न्दशदिशंक्षुधाक्रांतस्तदांजनी ॥ अंतर्गृहेजगामाशुफलानयनकाम्यया ॥ १३ ॥ तदातुक्षुधितोबालोरुदन्द
दर्शार्कमंडलम् ॥ आरक्तंचफलंमत्वाचोत्पपाततिचंचलः ॥ १४ ॥ जगर्जसिंहवन्नादंकरपादौप्रसार्यच ॥ सहा
चलाभुवश्चेलुर्दिशः सर्वाःप्रजज्वलुः ॥ १५ ॥ तदासचांजनीपुत्रोःमनोवेगेनमारुतिः ॥ मुखंप्रसार्यनिकटंय
यौसूर्यस्यचांजसा ॥ १६ ॥ तत्रैवसिंहिकापुत्रंग्रसंतम्ि दारुणम् ॥ पुच्छेनताडयामाससोपतद्भयविह्वलः ॥

॥ १७ ॥ पुरंदरमथागत्यपुच्छद्दुःखंनिवेदयत् ॥ श्रुत्वाश्चर्यंतदाचेंद्रोवज्रमादायसत्वरम् ॥ १८ ॥ देवसे
नासमायुक्तोसराहुस्तत्रचाययौ ॥ एतस्मिन्नंतरेवायुनंदनःसूर्यमंडलम् ॥ १९ ॥ हस्तेगृहीत्वानैवास्तिफल
मित्याहमारुतिः ॥ त्यक्त्वार्कमंडलंपश्चान्मातुर्निकटमाययौ ॥ २० ॥ तदातुमार्गमध्येंद्रंराहुंदेवगणैःसह ॥
युद्धोद्यतंचदृष्ट्वैवक्रोधसंरक्तलोचनः ॥ २१ ॥ राहुंचताडयामाससेंद्रान्देवगणाँस्तथा ॥ जघानक्षणमात्रेणयुद्धं
कृत्वासुदारुणम् ॥ २२ ॥ तदातिव्याकुलश्चेंद्रोगृहीत्वावज्रमुत्तमम् ॥ जघानवायुपुत्रस्यहनुदेशेमहाबलः ॥
॥ २३ ॥ हाहाकारस्तदाचासीत्पतितेवायुनंदने ॥ मूर्च्छितंचसुतंदृष्ट्वावायुःक्रोधसमाकुलः ॥ २४ ॥ उवा
चवचनंतत्रदेवानांतत्रशृण्वताम् ॥ येनमेघातितोबालस्तमिंद्रंघातयाम्यहम् ॥ २५ ॥ अहंसर्वस्यजगतःप्राण
वायुर्नसंशयः ॥ इत्युक्त्वाऽऽकर्षयामासश्वासोच्छ्वासंत्रिलोकजम् ॥ २६ ॥ तदाव्याकुलिताःसर्वाब्रह्मरुद्रा
दिदेवताः ॥ क्षणात्तत्रसमागत्यवायुंप्रोवाचपद्मभूः ॥ २७ ॥ पुत्रमुद्दिश्यजगतांनाशंकस्मात्करोपिहि ॥
वायुरुवाच ॥ ॥ नोत्थितोयदिमेपुत्रस्तदाहन्मिक्षणात्सुरान् ॥ २८ ॥ वायोर्वचनसाकर्ण्यविष्णुर्वचनमब्रवीत् ॥
पूर्णपिंडात्समुत्पन्नस्तवपुत्रोतिनिर्भयः ॥ २९ ॥ ब्रह्मणःकल्पपर्यंतंचिरंजीवीभविष्यति ॥ शिवउवाच ॥
ममनेत्रसमुत्पन्नश्चाग्निःसर्वान्दहिष्यति ॥ ३० ॥ तथापितवसंतानंनैवबाधांकरिष्यति ॥ शूलादिममशस्त्राणि
यानिमान्यानिमेतथा ॥ ३१ ॥ ब्रह्मोवाच ॥ ब्रह्मास्त्रंब्रह्मदण्डश्चब्रह्मशापस्तथैवच ॥ अन्यानिममशस्त्राणि
नबाधंतेसुतंतव ॥ ३२ ॥ इंद्रउवाच ॥ ममशस्त्रवरंवज्रंनैवबाधांकरिष्यति ॥ अस्यवज्रसमोदेहोभविष्यतिनसं

शयः ॥३३॥ हनौचपतितंवज्रंहनुमान्नामनामतः ॥ कुबेरउवाच ॥ बहुधाचासुरक्षयस्तवपुत्राद्भविष्यति ॥३४॥
यमउवाच ॥ कालदंडाद्भयंनैवतवसूनोर्भविष्यति ॥ वरुणउवाच ॥ भोवायोतवपुत्रस्यममशक्तिर्भविष्यति ॥
॥ ३५ ॥ युद्धंकुर्वञ्च्छ्रमस्तत्रनकदाचिद्भविष्यति ॥ अम्लानपंकजांमालांविश्वामित्रोददौमुदा ॥ ३६ ॥ एवंदे
वावरंदत्वास्वंस्वंधामययुस्ततः ॥ वायुः स्वपुत्रमादायचांजनीनिकटंययौ ॥ ३७ ॥ अंजनीमारुतिंवीक्ष्यरुदन्
प्रेम्णाततः परम् ॥ स्वांकेनिवेश्यचालिंग्यप्रेम्णास्तनमपाययत् ॥३८॥ एवंतेहनुमज्जन्मकथितंचसमासतः ॥
जयंतीदिनमासाद्यनिराहारोजितेंद्रियः ॥ ३९ ॥ पूजांचमहतींकृत्वारात्रौजागरणंचरेत् ॥ गीतवाद्यकथालापै
र्नामसंकीर्त्तनादिभिः ॥४०॥ हनुमन्नाटककथाप्रसंगेनविशेषतः ॥ ब्राह्मणान्भोजयेत्प्रातःस्वयंभुंजीतवाग्यतः ॥
॥४१॥ पठनाच्छ्रवणाच्चैवहनुमद्भक्तिमान्भवेत् ॥४२॥चैत्रस्यशुक्लैकादश्यांमारुतेर्जन्मचोचिरेत्॥तकल्पभेदवि
षयोविज्ञेयोनात्रसंशयः ॥ ४३ ॥ इतिश्रीहरिकृष्णविनिर्मिते बृ०ध० उपासनास्तवकेहनुमदुपासनाध्यायेहनु
मज्जयंतिव्रतकथानिरूपणंनामप्रकरणंअष्टाविंशम्॥२८॥अथग्रंथालंकारः॥ ॥श्रीमद्वाजसनेयगौतमकुलोत्पन्नो
तिविद्यावतांमान्योगुर्जरपंडितोपपदकौदीच्यः सहस्राह्वकः ॥ ज्योतिः शास्त्रविशारदोतिमतिमाञ्छ्रीव्यङ्कटा
ख्योद्विजस्तज्जोवैहरिकृष्णसंज्ञकइमंचक्रेविदांप्रीतये ॥ १ ॥ दक्षिणेसुमहाराष्ट्रदेशेदेवगिरेः पुरः॥औरंगाबाद
नगरंचास्तितत्रजनिर्मम ॥ २ ॥ प्रार्थयेसर्वविदुषांक्षमध्वंमेपराधकम् ॥ यद्यत्रकुकृतंवास्यादधिकंयत्रकुत्रचि ॥ ७७ ॥
त् ॥ ३ ॥ रोषमुत्सृज्यतत्सर्वंनिर्मलंकुरुतादरात् ॥ अत्रावशिष्टोयोभागः सतुशेषेभविष्यति ॥४॥ इति श्रीमत

ज्योतिर्वित्कुलावतंसव्यङ्कटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिपार्णवेऽष्टमेधर्मस्कंधेतृतीयेउपासनास्तब केहनुमदुपासनानिरूपणंनामचतुर्दशोत्तरशततमोध्यायः ॥ ११४ ॥ श्लोकाः १४३५ समुदित ग्रंथसंख्या २७०० ॥ ॥ समाप्तश्चायंहनुमदुपासनाध्यायः ॥ ॥ अथाग्रेश्रीसीतोपासनाध्यायोभविष्यति ॥

इदं पुस्तकं मुम्बय्यां खेमराज श्रीकृष्णदास इत्यनेन–स्वकीये "श्रीवेङ्कटेश्वर"
मुद्रणागारे मुद्रयित्वा प्रकाशितम् । शके १८२०, संवत् १९५५.

इति बृहज्ज्योतिषार्णवे धर्मस्कन्धे हनुमदुपासनाऽध्यायः समाप्तः ।

विक्रय्यपुस्तकोंकी संक्षिप्त-सूची।

नाम.	की. रु. आ.	नाम.	की. रु. आ.
दुर्गासप्तशती–सातटीकाओं समेत	३–०	औषधी कल्पाध्याय	१–८
दुर्गोपासनाकल्पद्रुम	३–८	प्रशंसाध्याय	१–४
बृहज्ज्योतिषार्णव संहितास्कंध अ०	३–०	समस्या प्रवेलिका अपह्नुती संग्रहाध्याय ३	०–३
उपोद्घातशिवालिखित	०–९	कूटश्लोक संग्रहाध्याय सटीक	०–५
भूबलाध्याय सटीक	०–१०	क्रियागुप्त चित्राख्यान अन्तर्बहिर्लापिकाध्याय ४	०–४
युद्धेमंत्र यंत्र तंत्र बलाध्याय	०–६	सदाचाराध्याय	०–१
सेनाव्यूह लक्षणाध्याय	०–४	जातिनिरूपणं	०–१
राजनीति राजधर्माध्याय	१–०	धर्मवृत्ति निरूपणं	०–१
छाया पुरुष लक्षण	०–१॥	पापवृत्ति निरूपणं	०–१
उदकार्गलाध्याय भाषाटीका	०–४	अन्योक्ति संग्रह	१–७
वर्णसंकरजाति विवेकाध्याय	१–५	भूतविद्या कौतुक वर्षचर्या	०–१
देवतावास निरूपणाध्याय	०–२	जन्मचर्या	०–१॥
बालशिक्षाध्याय	०–॥	दिनचर्या	०–१२
बालग्रह निरूपणाध्याय	०–१४	रात्रिचर्या	०–४
विवेकाध्याय	०–१	ताम्बूल वर्णन	०–१॥

संपूर्ण पुस्तकोंका " बड़ा सूचीपत्र " अलग है आध आनेका टिकट भेजकर मँगवाइये।

पुस्तकोंके मिलनेका पता–खेमराज श्रीकृष्णदास, " श्रीवेङ्कटेश्वर " छापाखाना–बंबई.

॥ इति बृहज्ज्योतिषार्णवे धर्मस्कन्धे हनुमदुपासनाऽध्यायः ॥